

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

Free

10

# संस्कृतकौमुदी

## दशमी कक्ष्या

## (प्राच्यपाठशालानाम्)

10th Sanskrit Reader
(Main Language)



तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

SCERT TELANGANA

# छात्रेभ्यः सूचनाः

- ★ छात्राः....!
- ★ भवन्तः सर्वे धारालतया संस्कृतं पठितुं समर्थाः भवेयुः । ज्ञातं विषयं लिखेयुः । यदि भवन्तः पठनं, लेखनं कर्तुं न शक्नुवन्ति भवताम् उपाध्यायानां साहाय्येन पठनं लेखनं शिक्षन्ताम् ।
- ★ अध्ययनांशान् दृष्टौ निधाय संस्कृतपाठ्यपुस्तकं भवद्भ्यः निर्मितम् । अस्मिन् पाठ्यपुस्तके भवद्भिः ''साधनीयानि समर्थ्यानि'' दशम (X) पृष्टे दत्तानि । आशैक्षिकवर्षं परिसमाप्तेः एतानि सामर्थ्यानि भवन्तः अवश्यं प्राप्नुयुः ।
- ★ 'छात्रेभ्यः सूचनाः' इति पट्टिकायां सूचनाः पठन्तु । तासामनुसारम् अभ्यासादिकम् कुर्वन्तु ।
- ★ कक्ष्यायां चर्चासमये सामूहिककृत्येषु भागग्रहणसमये च अभ्यासानुद्दिश्य सम्भाषणं कुर्युः । आवश्यकतानुसारं प्रश्नानपि पृच्छेयुः ।
- ★ पाठ्यांशबोधनसमये अवश्यम् अज्ञातानि पदानि वाक्यानि विषयान् च उद्दिश्य अध्यापकं पृच्छन्तु । चर्चया तान् अवगच्छन्तु ।
- ★ प्रत्येकमपि पाठ्यांशस्य अन्ते ''एतानि कुर्वन्तु'' इति नाम्ना अभ्यासाः सन्ति । ते च ''भावावगमनम् प्रतिस्पन्दनम्, भावव्यक्तीकरणम् - सर्जनात्मकता, भाषांशाः, परियोजनाकार्यम् इति । एतेषु अभ्यासेषु दत्तानां प्रश्नानां समाधानानि भवन्तः स्वयं विचिन्त्य लिखेयुः । कदापि मर्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study Material) प्रश्ननिधिं (Question Bank) मित्राणां पुस्तिकाः (Friends Notebooks) दृष्ट्वा न लिखेयुः । यदि तथा लिख्यन्ते तर्हि मूल्याङ्कने भवद्भ्यः अङ्काः न प्रदीयन्ते ।
- ★ 'भावावगमनम् - प्रतिस्पन्दनम्' इत्यस्मिन् दत्ताः अभ्यासाः स्वीय भाषणसामर्थ्यं, अवगमनसामर्थ्यम् च अभिवर्धयितुं प्रदत्ताः । एतेषु श्लोकानां प्रतिपदार्थलेखनम्, अपरिचितगद्यं पठित्वा दत्तप्रश्नानां समाधानलेखनं, पाठ्यांश-अवगमनावश्यकाः अभ्यासाः सन्ति । एतान् भवन्तः पठित्वा, मननं कृत्वा स्वयं लिखन्तु ।
- ★ 'भावव्यक्तीकरणम् - सर्जनात्मकता' इत्यस्मिन् अभ्यासे आलोच्य लेखनार्थं प्रश्नाः सन्ति । एतेषां सम्बद्धान् अभ्यासान् उद्दिश्य पूर्वम् उपाध्यायः चर्चाः निर्वहति । भवन्तः चर्चायां भागं गृह्णन्तु । अज्ञातान् विषयान् पृष्ट्वा जानन्तु । स्वयम् अभ्यासान् लिखन्तु । आवश्यकतानुसारं सहविद्यार्थिभिः सह अभ्यासान् कुर्वन्तु ।
- ★ भाषांशेषु दत्तां पदजालाभिवृद्धिं कर्तुं कोशस्य / निघण्टोः / पाठ्यपुस्तकस्यान्ते दत्तस्य 'पदकोशस्य' वा उपयोगं कुर्वन्तु । व्याकरणांशैः / साहित्यांशैः सम्बद्धान् अभ्यासान् अवगन्तुम् आदौ उदाहरणानि दत्तानि । तेषामाधारेण अभ्यासादिकं कुर्वन्तु ।
- ★ प्रत्येकस्मिन् पाठे दत्तं परियोजनाकार्यं स्वयं कुर्वन्तु । तदर्थं विद्यालयग्रन्थालयं गत्वा पुस्तकपठनम् अभ्यस्येयुः । आवश्यकतायां सत्याम् अन्तर्जालतः समाचारं सङ्गृह्णीयुः ।
- ★ पाठशालास्तरे दशमी कक्ष्या अन्तिमा । अस्याः दशमकक्ष्यायाः प्रभुत्वसञ्चालितपरीक्षा (Board exam) भवति। अस्यां परीक्षायां दीयमाने प्रश्नपत्रे पुस्तकसम्बद्धाः प्रश्नाः न भवेयुः । तत्सदृशप्रश्नाः भवेयुः । अतः पुस्तके प्रत्येकस्मिन् पाठे दत्तान् अभ्यासान् भवन्तः स्वयं लिखित्वा कुर्वन्ति चेदेव परीक्षासु सम्यक् लेखितुं प्रभवेयुः । नोचेत् पुस्तकस्थानाम् अभ्यासानां कण्ठस्थीकरणेन, दृष्टलेखनेन वा लेखितुं न शक्नुयुः ।
- ★ अस्मिन् पाठ्यपुस्तके ''छात्रैः साधितव्यानि सामर्थ्यानि'' इति पृष्टं वर्तते । अस्मिन् पृष्टे आवर्षसमाप्ति भवन्तः किं किं साधयेयुः इति विवरणं प्रदत्तम् । तद्विवरणं पठन्तु । अनुदिनं पाठ्यांशपरिसमाप्तिमभिलक्ष्य, तेषां पाठ्यांशानामाधारेण भवन्तः किं किं कुर्वन्तीति स्वयं जानन्तु । भवतां भाषासामर्थ्यानि अभिवर्धयन्तु ।
- ★ विद्यालये भवन्मित्रैः उपाध्यायैः सह च संस्कृतभाषया एव भाषितुं प्रयतन्ताम् ।
- ★ पाठ्यांशसम्बद्धान् ग्रन्थान् पाठशालाग्रन्थालये पठन्तु ।
- ★ भवन्तः कोशानाम् उपयोगम् अवश्यं कुर्वन्तु । वार्तापत्रिकाः, मासपत्रिकाः, कथाः - इत्यादीनां पठनाभ्यासं कुर्वन्तु ।
- ★ केषुचित् पाठेषु नाटकीकरणम्, एकपात्राभिनयः, रागयुक्ततया गीतालापनम्, श्लोकानां कण्ठस्थीकृत्य गानम् इत्येतादृशाः विषयाः वर्तन्ते । भवन्तः एतान् अभ्यस्तुं प्रयतन्ताम् ।
- ★ निबन्धः, लेखः, घोषणवाक्यानि, करपत्रं, भित्तिपत्रं, सम्भाषणम् इत्येतान् भवन्तः अवश्यं लिखेयुः ।

SCERT TELANGANA



चरणौ मृदुलौ स्वल्पौ
मावगच्छ निरर्थकौ ।
प्रश्नवारिदमारुह्य
ज्ञानवृष्टिकणान् पिब ॥

**सम्प्रति समस्तच्छात्राणां विद्यायाम् अधिकारः अस्ति ।**
**यतो हि अधुना विद्यास्वाम्यनियमः ( R T E ) आगतः**

# संस्कृतकौमुदी

## दशमी कक्ष्या

(प्राच्यपाठशालानाम्)

10th Sanskrit Reader ( Main Language )

**सम्पादकमण्डली**


**आचार्य विरिवेण्टि मुरलीधरशर्मा**
शिक्षाविभागः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)तिरुपतिः

**श्री नल्लगोण्ड पुरुषोत्तमशर्मा**
विश्रान्तोपन्यासकः
श्रीराजराजेश्वरसंस्कृतकलाशाला
वेमुलवाडा, करीनगर्जिल्ला

**डा. दोर्बल प्रभाकरशर्मा**
विश्रान्तप्राचार्यः
संस्कृतकलाशाला
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**संयोजिका**

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्

**विषयनिपुणौ**

**आचार्य रमाकान्त अग्निहोत्री**
विश्रान्तप्रवाचकः
दिल्लीविश्वविद्यालयः, नवदेहली

**सुवर्ण विनायकः**
संयोजकः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्


**पाठ्यपुस्तकविकासमुद्रापकसमितिः**


**प्रधाननिर्वहणाधिकारी**
**जी. गोपाल रेड्डि,**
सञ्चालकः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**निर्वाहकः**
**आचार्य नन्नूरु उपेन्दर् रेड्डि**
आचार्यः, विद्याप्रणालिकापाठ्यपुस्तकविभागः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**प्रधानव्यवहारनिर्वाहकः**
**श्री बि.सुधाकरः**
सञ्चालकः
प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,
हैदराबाद्


सत्यमेव जयते
विद्या ददाति विनयम्

धर्मो रक्षति रक्षितः
कृषितो नास्ति दुर्भिक्षम्

## तेलंगाणप्रभुत्वप्रकाशनम्

SCERT TELANGANA

© Government of Telangana, Hyderabad

*First Published 2014*
*New Impression 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

SCERT TELANGANA

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19**

***Printed in India***
at the Telangana Govt. Text Book Press
Mint compound, Hyderabad
Telangana

# पुरोवाक्

पाठशालाशिक्षायां दशमकक्ष्या अन्तिमा । चिन्तनाभिव्यक्तीकरणे प्रधानोद्देश्यत्वेन स्वीकृत्य तृतीयकक्ष्यातः संस्कृतभाषापाठ्यपुस्तकानि सज्जीकृतानि । दशमकक्ष्यासमाप्तेः परं छात्रेषु श्रुतस्य पठितस्य च विमर्शनात्मिका विश्लेषणसमता वृद्धिं गच्छेत् । ते व्यावहारिकाणि मौखिकलिखितभाषारूपाणि (भाषाप्रक्रियाः) सम्यगवगत्य सन्दर्भानुसारं विनियुञ्जीरन्, साहित्यपठनेन भाषासौन्दर्यं, शैलीं, कवीन्, रचयितॄन् प्रशंसितुं शक्नुयुः, विमर्शनदृष्ट्या विविधरचनानां भावान्, अन्तरार्थान् विश्लिष्य अवगच्छेयुः, ताँस्तान् भावान्, आन्तरिकार्थान् च समकालिकांशैः समन्वेतुं प्रभवेयुः वाचनमभ्यासत्वेन सम्पाद्य समुन्नतव्यक्तित्वम्, उदात्ताभिवृत्तीश्च वर्धयेयुः आत्मनो ज्ञानपरिधिं विस्तरेयुः, एतदर्थम् अतिरिक्तपठनसामग्र्याः, उपयुक्तग्रन्थानाञ्च अध्ययनं, विषयविशेषज्ञैः भाषाविशेषज्ञैस्सह चर्चाञ्च अभ्यस्येयुः ।

उपर्युक्तांशान् साधयितुं ''संस्कृतकौमुदी''नाम्ना इदं दशमकक्ष्यापाठ्यपुस्तकं सज्जीकृतम् । इदञ्च पाठ्यपुस्तकं तृतीयकक्ष्यावधि छात्रैः सम्पादितानां भाषासामर्थ्यानां, सर्जनात्मकतायाश्च अनुवर्तकरूपेण सन्नद्धीकृतम् । सावगमन-प्रतिस्पन्दनसामार्थ्यानि, स्वीयरचनाशक्तिं, सर्जनात्मकक्षमतां च छात्राः यथा आत्मनि वर्धयितुं प्रभवेयुः तथा पाठ्यपुस्तकमिदं समारचितम् । सामाजिकचेतना, मानवीयमूल्यानि, मानवसम्बन्धाः स्त्रीगौरवं, श्रममहत्त्वम् इत्यादिमूल्यानाम् अभिवर्धनं यथा सुचारुतया स्यात् छात्रेषु, तथा तदुपादेयाः पाठ्यांशाः प्राचीनाधुनिकसाहित्येभ्यः चित्वा पाठ्यपुस्तकेऽस्मिन् संनिरूपिताः ।

प्रत्येकस्मिन् पाठे सामर्थ्यसम्पादनानुरूपाः अभ्यासाः 'एतानि कुर्वन्तु' इति शीर्षिकया उपनिबद्धाः । चिन्तनं, प्रतिस्पन्दनम्, अभिप्रायव्यक्तीकरणं विभिन्नदृशा विश्लेषणम्, सहेतुकविवरणम्, अन्वयनम् इत्यादिरूपाः इमे अभ्यासाः सर्जनात्मकाः, प्रशंसात्मकाश्च सन्ति । पाठ्यपुस्तकपरिधिम् अतिक्रम्य यथा छात्राः अधिगच्छेयुः तथा परियोजनाकार्याण्यस्मिन् उपनिबद्धानि । इमानि च परियोजनाकार्याणि स्वाध्यायं, सम्बद्धग्रन्थाध्ययनञ्च प्रोत्साहयन्ति ।

यथा उपाध्यायाः सोपानक्रममनु पाठ्यांशान् बोधयेयुः तथा पाठगताः विषयाः सुसज्जिताः । विना प्रयासं व्याकरणमधिगन्तुम् अपेक्षितानि उदाहरणानि अत्र समुपनिबद्धानि भाषोपाध्यायाः पाठ्यविषयसीमिताः न भवेयुः । ते पाठ्यांशपूर्वभागस्थैः अंशैः प्रारभ्य ततः पाठ्यांशं चर्चाभिः प्रतिचर्चाभिश्च सम्बोध्य छात्रैः अभ्यासान् सम्पादयेयुः । ते पाठ्यांशगतान् पदबन्धान् मुख्यसन्देशात्मकवाक्यानि उद्दिश्य गहनचर्चानिर्वहणपूर्वकं छात्रेषु विमर्शनदृष्टिम् अभिवर्धयेयुः । छात्रेषु भाषासामर्थ्यसंसाधने पाठ्यपुस्तकम् उपाध्यायस्य साधनमात्रं भवेत् न तु साध्यम् । सः सन्दर्भग्रन्थान्, पाठशालाग्रन्थालयञ्च सम्यगुपयुञ्जानः छात्राः अपि यथा विनियुञ्जीरन् तथा भाषावातावरणं सुष्ठु सृजेत् ।

एतत्पाठ्यपुस्तकरूपकल्पने उपकृतवद्भ्यः सम्पादकेभ्यः विषयनिपुणेभ्यः, उपाध्यायेभ्यः, चित्रकारेभ्यः परामार्शदातृभ्यश्च हार्दाः धन्यवादाः आविष्क्रियन्ते । एतस्मिन् पाठ्यपुस्तके पाठ्यांशतया स्वप्रकाशनेभ्यः विविधरचनाः सङ्ग्रहीतुम् अनुमतिं दत्तवत्यै संस्कृतभारत्यै विशेषधन्यवादाः । पाठ्यपुस्तकमिदं छात्राणां भाषाभिरुचेः साहित्याभिलाषस्य, भाषासामर्थ्यानाञ्च संवर्धने, उत्तमपौरत्वसम्पादने च साधनं भविष्यतीति आशास्महे ।

**सञ्चालकः**
**राज्यविद्यापरिशोधनशिक्षणसंस्था,**
**हैदराबाद् ।**



SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- पाठ्यपुस्तकस्य उपयोगात् पूर्वमेव पाठ्यपुस्तकद्वारा अपेक्षितानि सामर्थ्यानि ज्ञातव्यानि । तदर्थं पुरोवाक्, विषयसूची, अध्यापकेभ्यः सूचनाः इति शीर्षिकास्थान् विषयान् अध्यापकाः अवश्यं पठेयुः ।
- पाठ्यपुस्तकस्थं पद्यभागं, गद्यभागं च बोधयितुं प्रतिदिनम् प्रत्येकम् एकः कालांशः भवति । इत्थम् एकस्मिन् विद्यासंवत्सरे पद्यभागस्य गद्यभागस्य च बोधनार्थं 180 कालांशाः भवन्ति ।
- अत्रस्थः पद्यभागः, गद्यभागो वा 150 कालांशेषु यथा बोधयितुं शक्येत तथा उपनिबद्धः अस्ति ।
- एकस्य पाठ्यांशस्य बोधनार्थं 14-17 कालांशाः उपयोक्तव्याः। तदनुगुणमत्र अभ्यसनस्य रूपकल्पनं करणीयम् ।
- पाठ्यभागस्य बोधनाय कालांशविभजनम् एवं कर्तुं शक्नुमः -
- उन्मुखीकरणार्थम् (1), पाठ्यांशबोधनार्थम् (3/4/5), भावावगमनम् - प्रतिस्पन्दनम् इत्यस्य कृत्यस्य कृते (2), भावव्यक्तीकरणम् - सर्जनात्मकता इत्यस्य कृत्यस्य कृते (4), भाषांशानां कृते (3/4), परियोजनाकार्यार्थम् (1), आहत्य 14/17 कालांशान् विनियोक्तुं शक्नुमः।
- पाठ्यांशबोधनं नाम केवलं सारांशस्य बोधनं न । परन्तु निर्दिष्टे सर्वस्मिन्नपि अंशे छात्राणाम् अवगमनम्, अधिकारश्च यथा जायेताम् तथा तादृशवातावरणस्य प्रकल्पनमेव ।
- सर्वस्यापि पाठ्यांशस्य बोधनार्थम् अधिकाधिकं पञ्च कालांशाः उपयोक्तव्याः । अन्यकालांशाः अभ्यासानां साधनाय उपयोक्तव्याः।
- प्रत्येकमपि पाठस्य आरम्भे दत्ताः ''पठन्तु-विचिन्त्य वदन्तु'' इत्यस्मिन् स्थिताः अंशाः उन्मुखीकरणसम्बद्धाः । एतान् सम्पूर्णकक्ष्याकृत्यत्वेन निर्वहेत् ।
- पाठ्यांशोद्देश्यम् / नेपथ्यम्, पाठ्यांशविवरणम्, कविपरिचयः, इतीमान् अंशान् आधृत्य छात्रैः चर्चापूर्वकपठनं कारयेत् ।
- 'छात्रेभ्यः सूचनाः' इत्यस्मिन् स्थितानि अर्थसङ्ग्रहणकृत्यानि व्यक्तिशः निर्वहेत् । तदर्थम् अवश्यं कक्ष्याप्रकोष्ठे कोशाः स्थापनीयाः ।
- छात्राणां पाठ्यांशविषयावगमनकल्पनाय पाठ्यांशस्वभावं मनसि निधाय चर्चा - प्रश्नोत्तर - कथाकथन - प्रदर्शना - नाटकीकरणविधीन् प्रयुञ्जीत ।
- पाठने नैकविषयविवरणं पाठस्थमूल्यानि, कविहृदयं, निगूढार्थं च छात्राः अवगच्छेयुः। तदर्थम् आलोचनात्मकप्रश्नान् पृच्छेत् । चर्चया, प्रश्नकरणेन छात्राः स्वयम् आलोचनात्मक-सन्देशात्मकवाक्यानि अवगच्छेयुः । शिक्षकः छात्रैः अभिप्रायकथनं, समकालीनांशैः अन्वयनं, बहुकोणेषु विश्लेषणं कारयेत् ।
- 'एतानि कुर्वन्तु' इत्यस्मिन् अभ्यासाः छात्राणां भाषासामार्थ्याभिवृद्धिसम्बद्धाः । एतान् स्वयं छात्राः लिखन्तीति वेति परिशीलयेत् ।
- प्रत्येकस्मै अभ्यासाय एकः कालांशः दत्तः । अतः तत्तत्कालांशेषु अभ्यासलेखनावगमनं कल्पयेत् । छात्रलिखितांशान् परिशील्य समीकुर्यात् ।
- दशमकक्ष्यावार्षिकपरीक्षा प्रभुत्वसञ्चालितपरीक्षा (Board Exam) । अतः छात्रान् कक्ष्यायां स्वयं लेखितुं प्रोत्साहयेत्। मार्गदर्शिनी (Guide),अध्ययनसमग्री (Study Matrial) इत्यादीनाम् उपयोगं निषिध्येत् । किमर्थमिति चेत् वार्षिकपरीक्षायां पुस्तकस्थप्रश्नाः यथातथं न पृच्छन्ते । केवलं तत्सदृशप्रश्नाः पृच्छ्यन्ते । पाठ्यांशाभ्यासान् ये छात्राः स्वयं लेखितुं प्रभवन्ति ते छात्रा एव परीक्षायां समाधानानि लेखितुं शक्नुवन्ति ।
- अवगमनम् - प्रतिस्पन्दनम् इत्यस्मिन् सामर्थ्ये शृण्वन्तु - विचिन्त्य वदन्तु इत्यस्मिन् अभ्यासे च स्थिताः प्रश्नाः कक्ष्याकृत्यत्वेन निर्वोढव्याः । पठन्तु - अवगच्छन्तु इत्यस्मिन् स्थितान् प्रश्नान् व्यक्तिशः निर्वहेत् । पाठं पठित्वा समाधानलेखनार्थं स्थितान् प्रश्नान् 'गृहकार्यरूपेण' दद्यात् ।
- भावव्यक्तीकरणम् - सर्जनात्मकता' इत्यस्मिन् स्वीयरचना, सर्जनात्मकता, प्रशंसा, इतीमानि सामर्थ्यसम्बद्धानि । एतेषु लघुसमाधानप्रश्नान् गृहकार्यरूपेण दद्यात् । निबन्धरूपसमाधानलेखनार्थं कल्पितान् प्रश्नान् उद्दिश्य कक्ष्यायां चर्चां निर्वहेत् । तदनन्तरं व्यक्तिशः लेखयेत् । पठनमपि कारयेत् । छात्रैः लिखितांशान् भावात्मकवाक्यानि, पदानि, अक्षरदोषाः इत्येवं वर्गीकृत्य समीकुर्यात् ।
- सर्जनात्मकतासम्बद्धप्रश्नानां समाधानानि छात्राः स्वयं लिखेयुः । तदर्थं समुचितोदाहरणानि दद्यात् । तदनन्तरं समूहकृत्येन लेखयेत् । लिखितांशान् प्रदर्श्य चर्चया समीकुर्यात् । तदनन्तरं एतान् गृहकार्यरूपेण दत्त्वा व्यक्तिशः लेखयेत् ।


SCERT TELANGANA

* परियोजनाकार्यमपि एवं प्रकारेणैव निर्वहेत् ।
* पाठसमाप्तिः नाम ''पठन्तु - विचिन्त्य वदन्तु'' इत्युन्मुखीकरणांशादिप्रभृति पाठस्य अन्ते दत्तसूक्तिपर्यन्तम्'' सर्वान् अंशान् प्रणालीरूपेण बोधनाभ्यसनप्रक्रियाः निरुह्य अवगमनं कल्पयेत् ।
* एतदर्थम् अध्यापकाः वार्षिक, पाठ्यप्रणालिकाः रचयेयुः ।
* वार्षिकप्रणालिकायाम् अधो लिखितांशाः भवन्ति ।

१. कक्ष्या २. विषयः ३. अपेक्षितकालांशानां सङ्ख्या
४. विद्यासंवत्सरसमाप्तेः पूर्वं साधितव्यानि सामर्थ्यानि ५. मासक्रमेण पाठविभजनम्

| मासनाम | बोध्यमानपाठः | अपेक्षित - कालांशाः | बोधनव्यूहाः | अपेक्षितसंसाधनानि / सामग्री | व्याख्या |
|---|---|---|---|---|---|
| | | | | | |

६. उपाध्यायस्य प्रतिस्पन्दनानि ७. प्रधानोपाध्यायस्य परामर्शाः सूचनाश्च

* प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम - २. पाठं बोधयितुम् आवश्यककालांशाः -
३. साधितव्यानि सामर्थ्यानि - ४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री /संसाधनानि |
|---|---|---|---|
| | | | |

५. पाठ्यबोधनार्थम् अपेक्षितविषयसङ्ग्रहणम् (अध्यापककृत्यम्)।
६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

* अध्यापकः 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकः अंशः कतिभिः छात्रैः साधितः इति परिशीलयेत् । आवश्यकतानुसारं वैकल्पिकांशान् बोधयेत् ।
* सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material)वा दृष्ट्वा प्रश्नानां समाधानानाम् अभ्यासानां वा लेखनं न कारयेत् । यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्ते इति वदेत् । छात्रैः स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।
* पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।
II. **पाठ्यांशबोधनस्य / सामर्थ्यस्य अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, छात्राणां बाह्यपठनम् अध्यापकस्य आदर्शपठनम्, छात्राणां मौनपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा अवगमनमञ्च ।
III. **अवगमनपरिशीलनम्** - पाठितविषयाणां छात्रावगमनस्य परिशीलनम् ।
IV. **गृहकार्यम्** - (प्रशंसा - परियोजनाकार्यम् - बोधितविषयैः सम्बद्धं गृहकार्यम्)

* पाठ्यांशानाम् आधारेण यथावकाशं मानवीयमूल्यानि, पर्यावरणम्, कलाः, अनुभवः, जीववैविध्यम् इत्यादिविषयाः चर्चनीयाः।
* अनुबन्धे शब्दाः, धातवः दत्ताः सन्ति । पाठ्यांशेषु कृत्यानाम् अभ्याससमये सन्दर्भानुसारम् अनुबन्धे दत्तानां शब्दानां धातूनां च अभ्यासः छात्रैः कारयितव्यः ।
* संस्कृतसाहित्ये अभिरुच्युत्पादनार्थं पाठशालाग्रन्थालये संस्कृतस्य प्राचीनग्रन्थाः आधुनिकग्रन्थाः च स्थापनीयाः।
* जीवने विविधसन्दर्भेषु भाषाम् उपयोक्तुम् आवश्यकं शिक्षणं छात्रेभ्यः दातव्यम् । (उदा - सभानिर्वहणं, प्रसङ्गः, चर्चासु भागग्रहणं, लेखानां लेखनं, अपरिचितान् अंशान् पठित्वा अवगमनं, विषयविशेषस्य विश्लेषणात्मकं विवरणम् इत्यादिकम्)

SCERT TELANGANA

# वन्दे मातरम्

- बङ्किम्चन्द्र छटर्जी

वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम् ।

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ पठत ॥

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाणमुख्यकविभिः ॥ पठत ॥

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिधां वराम् ॥ ॥ पठत ॥

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम् ॥ ॥ पठत ॥

SCERT TELANGANA

# राष्ट्रियगीतम्

- रवीन्द्रनाथ् ठागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्गा !
विन्ध्य हिमाचल यमुना गङ्गा,
उच्चलजलधितरङ्गा !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

# प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव्

भारतदेशः मम मातृभूमिः। भारतीयास्सर्वे मम सहोदराः।

अहं मम देशं प्रीणामि । सुसम्पन्ना बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि । सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां च विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

SCERT TELANGANA

# पाठ्यपुस्तकरूपकर्तारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्

**श्री कोम्पल्लि शिवकुमारः**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
पर्लपल्लि, करींनगर् जिल्ला

**श्री डा. विरिवेण्टि सुब्रह्मण्यम्**
उपसञ्चालकः
संस्कृत अकाडमी
उस्मानिया विश्वविद्यालयः, हैदराबाद्

**श्री सि.हेच. वेङ्कटसाम्बशिवरावः**
शिक्षितस्नातकाध्यापकः (संस्कृतम्)
आन्ध्रप्रदेशावासविद्यालयः, सिद्धिपेट, मेदक् जिल्ला

**श्री के रङ्गराजु**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
रङ्गापुरम्, रङ्गारेड्डिजिल्ला

**श्री जि.वि.वि. सुब्रह्मण्यम्**
प्रधानोपध्यायः
एस्.एम्.एस्. संस्कृततोन्नतपाठशाला
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**श्री के. रमेशबाबु**
भाषोपाध्यायः (संस्कृतम्)
जिल्लापरिषत् बालिकोन्नतपाठशाला
कोत्तपेट, प्राग्गोदावरी जिल्ला

**श्री आर्. राजेश् प्रभुः**
भाषोपाध्यायः (संस्कृतम्)
जिल्लापरिषत् प्राच्योन्नतपाठशाला
वरिगोण्डा, नेल्लूरुजिल्ला.

**श्री के.एन्.एस्. रामम्**
भाषोपाध्यायः (संस्कृतम्)
जिल्लापरिषत् बालोन्नतपाठशाला
अमलापुरम्,प्राग्गोदावरी जिल्ला

**श्री डा. मरुधूरि नरसिंहाचार्यः**
सहाध्यापकः (संस्कृतम्)
नगरपालकोन्नतपाठशाला
विजयवाडा, कृष्णाजिल्ला

**श्री नमिलिकोण्ड. हरिप्रसाद्**
विश्रान्तप्रधानोपाध्यायः
श्रीराजराजेश्वरसंस्कृतपाठशाला
वेमुलवाडा, करींनगर्जिल्ला

**श्री एस्. हरिचन्दनकुमार्**
भाषोपाध्यायः (संस्कृतम्)
जिल्लापरिषत् संस्कृतोन्नतपाठशाला
पार्वतीपुरम्, विजयनगरम् जिल्ला

**श्री डा. धूलिपाल रामकृष्णः**
संस्कृतविभागाध्यक्षः
मारिस् टेल्ला कलाशाला
विजयवाडा, कृष्णा जिल्ला

**श्रीमती मादिराजु विजयलक्ष्मीः**
विश्रान्तसंस्कृताध्यापिका
श्री मलयालस्वामिसंस्कृतपाठशाला
कोवेलकुण्ट्ल, कर्नूल् जिल्ला

**श्रीमती पि.माधवी**
अध्यापिका
भारतीयविद्याभवन्
दिल्शुक् नगर, हैदराबाद्

**श्री भुवनगिरि वेङ्कटलक्ष्मीनारायणः**
परिशोधनाधिकारी
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः, चित्तूरुजिल्ला

**श्री तुर्लपाटि शिवरामकृष्णः**
संस्कृताध्यापकः
दिल्ली पब्लिक् स्कूल्
नाचारम्, हैदराबाद्

# चित्रकाराः

**के.बाबु,** प्रधानाध्यापक :, जिल्लापरिषत् उन्नतपाठशाला, वज्ञुपल्लि, निजामाबाद् जिल्ला.
**टि.वि. रामकृष्णः,** चित्रलेखनाध्यापकः, जि.प.उ. पाठशाला, दुद्देड, मेदक् जिल्ला.
**वड्डेपल्लि वेंकटेश्वर्लु,** अध्यापकः, प्राथमिकपाठशाला, सोमवारं नल्गोण्ड जिल्ला.
**कस्तूरि प्रभाकर्,** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, पिल्लमर्रि, नल्गोण्ड जिल्ला
**कूरेल्ल श्रीनिवास्,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, कुर्मेड्, नल्गोण्ड जिल्ला

# रूपरेखारचना:

**श्री काज राजेश्वरीकौण्डिन्यशास्त्रिवर्यौ,** दीप्तिमुद्रणालयः, गान्धीनगर्, हैदराबाद् ।

SCERT TELANGANA

# विषयसूची

## पद्यभागः


| | पाठस्य नाम | प्रधानांशः | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|---|---|
| प्रथमभागः | १. ध्येयपथिक साधक ! | व्यक्तित्वविकासः | गीतम् | जून् | 01 - 07 |
| | २. श्लोकरत्नानि | नैतिकमूल्यानि | नीतिश्लोकाः | जुलै | 08 - 17 |
| | ३. मेघसन्देशः | प्रकृतिवर्णनम् | काव्यश्लोकाः | जुलै | 18 - 26 |
| द्वितीयभागः | ४. परमो धर्मः | सामाजिकमूल्यानि | इतिहासश्लोकाः | आगष्ट् | 27 - 37 |
| | ५. द्रौपदीपरिदेवना | स्त्रीवैदुष्यम् | प्राचीनकाव्यश्लोकाः | आगष्ट् | 38 - 47 |
| | ६. मन्दाकिनी | प्रकृतिः | आधुनिकगीतम् | सेप्टेम्बर् | 48 - 57 |
| तृतीयभागः | ७. भक्तिरेव गरीयसी | जीवनमूल्यानि | काव्यश्लोकाः | सेप्टेम्बर् | 58 - 66 |
| | ८. चाणक्यनीतिः | लौकिकज्ञानम् | सूक्तिश्लोकाः | अक्टोबर् | 67 - 74 |
| | ९. अष्टावक्रः | मानवसम्बन्धाः | प्राचीनश्लोकाः | नवम्बर् | 75 - 84 |
| | १०.अवतारिका | साहित्याभिरुचिः | चम्पूः | डिसेम्बर | 85 - 92 |


## गद्यभागः


| | पाठस्य नाम | प्रधानांशः | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|---|---|
| प्रथमभागः | १. हिरण्यकवृत्तान्तः | व्यक्तित्वविकासः | चम्पूः | जून् | 93 - 101 |
| | २. देशभूषा हि भारती | भाषाभिरुचिः | निबन्धः | जुलै | 102 - 110 |
| | ३. शाकुन्तलायाः - पतिगृहप्रस्थानम् | जीवनमूल्यानि | नाटकम् | जुलै | 111 - 121 |
| द्वितीयभागः | ४. अणुशास्त्रज्ञः - कणादमहर्षिः | शास्त्रीयविज्ञानम् | निबन्धः | आगष्ट् | 122 - 129 |
| | ५. चन्द्रापीडस्य - विद्याभ्यासः | साहित्याभिरुचिः | प्राचीनगद्यम् | आगष्ट् | 130 - 137 |
| | ६. किं जलम् उत्तमम्? | श्रमैकजीवनम् | अधुनिककथा | सेप्टेम्बर् | 138 - 146 |
| तृतीयभागः | ७. शठं प्रति शाठ्यम् | सामाजिकमूल्यानि | आधुनिकनाटकम् | सेप्टेम्बर् | 147 - 158 |
| | ८. भिषजोभैषज्यम् | सामाजिकमूल्यानि | कथा | अक्टोबर् | 159 - 166 |
| | ९. प्रतिभासम्मानः | भाषासाहित्यम् | कथा | नवम्बर् | 167 - 174 |
| | १०.नालन्दावैभवम् | संस्कृतिः | यात्राचरितम् | डिसेम्बर् | 175 - 182 |
| | पुनश्चरणम् | | जनवरी, फिब्रवरी, मार्चि | | |


### अनुबन्धः


| | |
|---|---|
| शब्दाः | 183 - 185 |
| धातवः | 186 - 188 |
| पदकोशः | 189 - 194 |
| क्रियापदकोशः | 195 - 198 |


☞ अध्यापकः पाठ्यांशस्थान् नक्षत्रचिह्नितान् श्लोकान् छात्रैः कण्ठस्थान् कारयेत् । तेषां प्रतिपदार्थं भावञ्च बोधयेत् ।

SCERT TELANGANA

## अनेन पाठ्यपुस्तकेन छात्रैः सम्पादनीयानि सामर्थ्यानि

### 1. भावावगमनम् - प्रतिस्पन्दनम्

★ संस्कृतेन निबद्धानां सरलगद्यपद्यांशानां श्रवणावगमनसामर्थ्यम् ।

★ नाटकानाम् अवगमन-कथनसामर्थ्यम् ।

★ काक्वादीनां विशेषस्वराणाम् अवगमनसामर्थ्यं व्यक्तीकरणसामर्थ्यञ्च ।

★ पाठ्यभागेषु संवर्णितानां पात्राणां स्वभावानां मनोभावानां च अवगमनसामर्थ्यम् ।

★ पाठशालासु विविधदिनोत्सवेषु स्वेच्छया आत्मविश्वासेन सम्भाषणपाटवम् ।

★ पठितम् अंशमधिकृत्य तार्किकचिन्तनस्य प्रश्नकरणस्य च सामर्थ्यम् ।

★ प्रतिमासं द्वित्राणां कथापुस्तकानां पत्रिकाणां च पठनम् ।

### 2. भावव्यक्तीकरणम् - सर्जनात्मककार्यम्

★ कथावैज्ञानिककाल्पनिकादिविविधप्रक्रियाणां पठनम्, अवगमनं, स्वीयवाक्यैः व्यक्तीकरणं च ।

★ दत्तानां प्रश्नानां विश्लेषणात्मकसमाधानलेखनम् ।

★ अपरिचितान् अंशान् पठित्वा तद्विषयकप्रश्नानां समाधानलेखनम् ।

★ पाठ्यांशानाम् आधारेण दत्तानां परियोजनाकार्याणां सम्पादनं, तेषां निवेदिकायाः समर्पणम् ।

★ प्रक्रियायाः परिवर्तनाभ्यासः ।

★ लेखने विरामचिह्नानां समुचितोपयोगः। तद्वारा लेखनसामर्थ्यम् ।

★ करपत्राणि, निवेदिकाः, आह्वानपत्रिकाः, लेखाः इत्यादीनां लेखनम् ।

★ भाषासङ्घे सभ्यतासम्पादनं साहित्यगोष्ठीनां निर्वहणं च ।

★ पाठेभ्यः स्वीकृतानाम् अंशानां व्यक्तित्वनिर्माणार्थम् उपयोक्तुम् अभ्यासः।

★ स्वीयवाक्यैः श्लोकानां भावस्य कथनं लेखनं च ।

★ मातृभाषातः संस्कृतेन अनुवादः ।

★ बहुभाषात्वस्य अवगमनं तद्विषयकम् अभिनन्दनं च । इतरभाषासम्बद्धाभिः कथागीतादिप्रक्रियाभिः उपनिबद्धानाम् इतिवृत्तानाम् प्रशंसापूर्वकलेखनम् ।

### 3. भाषांशाः

★ सर्वनामशब्दनाम् अजन्तहलन्तानां च प्रयोगसामर्थ्यम् ।

★ दिवादि-तुदादि-गणीयानां धातूनां भेदस्य अवगमनम् ।

★ पूर्वरूप,पररूप, प्रकृतिभावसन्धीनाम् विघटनसामर्थ्यं पदद्वयस्य सन्धानसूत्रीकरणसामर्थ्यं च ।

★ कर्मधारय-अव्ययीभावसमासयोः अवगमनं प्रयोगश्च ।

★ क्त-क्तवतु-तव्यत्-अनीयर्-मतुप्प्रत्ययानां योजनेन पदनिर्माणस्य सामर्थ्यम् ।

★ शिखरिणी, मन्दाक्रान्ता, वंशस्थं, मालिनी इत्यादीनाम् छन्दसाम् अभिज्ञानम् ।

★ उल्लेख-दुष्टान्त-अप्रस्तुतप्रशंसा-दीपकादीनाम् अलङ्काराणाम् अवगमनसामर्थ्यम् । तेषां भेदग्रहणसामर्थ्यम् ।

★ सन्धीनां, समासानां, वृत्तानाम् अलङ्काराणं च लक्ष्य-लक्षणसमन्वयश्च ।

★ विविधवाक्यभेदानाम् अवगमनं प्रयोगसामर्थ्यं च ।


तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

# पद्यभागः

SCERT TELANGANA




SCERT TELANGANA

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

प्रथमः भागः

# १. ध्येयपथिक साधक !

## पठन्तु, विचिन्त्य वदन्तु

वन्दे भारतमातरं वद भारत वन्दे मातरम्
जन्मभूरियं वीरवराणां त्यागधनानां धीराणाम्
मातृभूमये लोकहिताय च नित्यसमर्पितचित्तानाम्
जितकोपानां कृतकृत्यानां वित्तं तृणवद्दृष्टवताम्
मातृसेवनादात्मजीवनं सार्थकतामानीतवताम् ।।

**प्रश्नाः**

१. गीतमिदं कस्य वैशिष्ट्यं वदति ?
२. गीते देशभक्तस्य के गुणाः वर्णिताः ?
३. ईदृशं देशभक्तिबोधकं गीतमेकं गायन्तु ।

## उद्देश्यम्

* भारतीयैः अस्माभिः अस्माकं सर्वस्वं समाजहिताय समर्पणीयमिति भावनायाः विकासनम् ।
* भारतमातुः वैभवसम्पादनमेव भारतीयस्य सर्वस्यापि ध्येयम् इति भावनायाः उद्बोधनम् ।
* संस्कृतगीताध्ययने अभिरुचिसम्पादनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

## कविपरिचयः

गीतमिदं 'गेयसंस्कृतम्' इति संस्कृतगीतपुस्तकात् सङ्गृहीतम् । पुस्तकेऽस्मिन् आधुनिककविभिः विरचितानि बहूनि गीतानि सन्ति । प्रस्तुतगीतमिदं 'जनार्दन हेगडे' महोदयेन विरचितम् । महोदयोऽयं बेङ्गलूरुनगरे वसन् संस्कृतभारती नाम स्वच्छन्दसंस्थाद्वारा संस्कृतप्रचारोद्यमे बहूनां मार्गदर्शनं करोति ।

## प्रवेशिका

सर्वोऽपि मानवः सामाजिकः । समाजे एव जीवति । तेन नित्यमभिवर्धते च । समाजे वसन् सः विविधानि सौविध्यानि अनुभवति । तादृशसमाजोन्नतये योगदानं सर्वस्यापि कर्तव्यम् । अत एव अस्मत्पूर्वजाः "सर्वजनहिताय - सर्वजनसुखाय" इति ध्येयेन स्वजीवनं यापितवन्तः । प्रस्तुतसमाजे अस्माभिः दृश्यमानानि सुफलानि सर्वाणि महापुरुषोत्तमचरिताख्यवृक्षात् प्राप्तानि एव । तानि आस्वादयन्तः, अस्मज्जीवनमपि तस्य ध्येयस्य सम्पादने यापयन्तः अग्रे गच्छेम ।

ध्येयपथिक साधक.....

कार्यपथे साधय......

मृदु हसन्, मधु किरन् मातरं सदा स्मरन्
जीवनं न शाश्वतं वैभवं न हि स्थिरम्
स्वार्थलेपनं विना यत्कृतं हि तच्चिरम्
सरलता स्वजीवने चिन्तने सदोच्चता
समाजपोषिता वयं समाजपोषकाश्चिरम् ॥ध्येय..॥



यच्च मनसि चिन्त्यते यच्च कीर्त्यते गिरा
तच्च मूर्तरूपताम् एति नित्यजीवने
जनन्यनन्यचरणयोः समर्पितस्वजीवनाः
ध्येयसाधनव्रता वयं भवेम सङ्गताः ॥ध्येय..॥

स्मरत्विहाग्रजन्मनां त्यागबलिसमर्पणम्
सिंहकुलसमुद्भवाः सिंहविक्रमा वयम्
सन्तु कष्टकोटयो ........भवतु विघ्नवर्षणं
सकृत्प्रतिज्ञका वयं भजेम नो पलायनम् ॥ध्येय..॥

## गीतस्य भावः

हे लक्ष्यसाधनमार्गे स्थित ! हे साधक ! त्वं मन्दहासं कुर्वन्, मधुस्यन्दीनि वचांसि व्यापयन् सर्वदा भारतमातरं स्मरन् कार्यसाधनमार्गे पुरतः चल !

मानवस्य जीवनं वैभवं वा अशाश्वतमिति चिन्तय स्वार्थचिन्तनं विना लोकहिताय वयं यत्कार्यं कुर्मः, तदेव शाश्वतं भवतीति चिन्तय । अतः आडम्बररहितं जीवनम् आश्रय । उन्नतस्तरं चिन्तनं वयं कुर्याम । वयं समाजेन पोषिताः स्मः । अतः सदा समाजसेवकाः एव भवेम ।

वयं मनसि यद् अधिकृत्य चिन्तयामः तदेव नित्यजीवने वाग्भिः वदामः । यद् वदामः तदेव कार्यरूपेण आचरामः । अतः वयं मनसि एवं चिन्तयामः यत् ध्येयसाधनव्रताः सन्तः 'भारतमातुः पुनर्वैभवप्राप्तये दीक्षिताः तस्याः पादतले स्वजीवनानि समर्पयन्तः ऐकमत्येन जीवनं कुर्मः इति ।

हे साधक ! अस्मिन् देशे पूर्वजानां जनानां त्यागान् बलिदानानि च सम्यक् स्मर । वयम् एतादृशानां सिंहपराक्रमवतां कुले जाताः । अतः वयं सिंहपराक्रमाः । कोटिकष्टानि भवन्तु, विघ्नानां वर्षं भवतु, वयं तु पलायनं न कुर्मः । लक्ष्यसाधनाय पुरतः एव चलामः । यतः भारतीयाः वयम् एकवारं प्रतिज्ञां कुर्मः चेत् तत् आजीवनं पालयामः च ।

### विचिन्त्य वदन्तु

* 'जीवनं सम्पच्च अशाश्वते' इति गीते अस्ति खलु ! तथापि केचन 'अजरामराः' इति कीर्त्यन्ते ? केन कारणेन तेषां तादृशकीर्तिर्भवतीति वदन्तु ?
* अस्य गीतस्य भावः अवगतः खलु ! भवतां ध्येयं लक्ष्यं किमिति वदन्तु । तत् साधयितुं भवद्भिः अनुसरणीयमार्गः कः इति सूचयन्तु ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. गीतं रागयुक्तं गात्वा तस्य भावं स्ववाक्यैः वदन्तु ।

२. 'जीवनं न शाश्वतं, वैभवं न हि स्थिरम्' इत्येतदुद्दिश्य चर्चां कुर्वन्तु ।

३. गीतस्य अन्यशीर्षिकां सूचयन्तु । किमर्थमित्यपि वदन्तु ।

**आ) गीते स्थितानि सन्देशात्मकवाक्यानि लिखन्तु ।**

उदा - कार्यपथे साधय ।

**इ) अधः दत्तौ श्लोकौ पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

१) मृषावादं परिहरेत्कुर्यात्प्रियमयाचितः ।
न च कामान्न संरम्भान्न द्वेषाद्धर्ममुत्सृजेत् ॥

२) प्रिये नातिभृशं हृष्येदप्रिये न च सञ्चरेत् ।
न मुह्येदर्थकृच्छ्रेषु न च धर्मं परित्यजेत् ॥

SCERT TELANGANA

१. श्लोकौ किं बोधयतः?

२. 'असत्यम्' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

३. द्वितीयश्लोके प्रथमपादस्य भावः कः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. 'समाजपोषिताः वयम्' । इत्यस्य भावः कः ?

२. "स्वार्थलेपनं विना यत्कृतं हि तच्चिरम्" इति विषये भवतामभिप्रायं विवृण्वन्तु ।

३. केचन कार्यमारभ्य मध्ये एव त्यजन्ति । कार्यं भवन्तः कथं समापयन्ति ?

४. "सिंहकुलसमुद्भवाः" इति कथने कवेः अभिप्रायः कः ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. ध्येयपथिकसाधकः कार्यपथे कथं साधयति ?

२. अस्मात् पाठात् भवन्तः किं ज्ञातवन्तः इति लिखन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. एतादृशं स्वीयं गीतमेकं लिखन्तु ।

२. अधः दत्तं पद्यं संस्कृतेन अनुवदन्तु ।

సత్ప్రవర్తనంబు, సౌఖ్యంబు మర్యాద
మంచి వారి పొందు మనకు నిచ్చు
కలుషమతుల పొందు కలహాలు గొని తెచ్చు
లలితసుగుణజాల ! తెలుగుబాల !

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ) रेखाङ्कितपदानां समानार्थकपदानि पाठात् चित्वा तानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. वयं प्रतिदिनं प्रातः <u>जननीं</u> नमामः ।

२. जनः <u>वाचा</u> यत् वदति, तदेव तेन करणीयम् ।

३. अस्माकम् <u>आलोचने</u> उत्तमता भवेत् ।

४. अधिकचलनेन <u>पादयोः</u> वेदना भवति ।

### आ) पाठं पठित्वा अधः दत्ते पदे विवृण्वन्तु ।

१. समाजपोषकाः २. समाजपोषिताः

SCERT TELANGANA

इ) रेखाङ्कितपदानां विरुद्धार्थकपदानि पाठात् चित्वा तानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. वयं कदाचित् संस्कृतसम्भाषणं कुर्मः ।
२. चिन्तने नीचता न भवेत् ।
३. धनं नश्वरं भवति ।

## २. व्याकरणांशाः

अ) सन्धिं कृत्वा सन्धिनाम लिखन्तु ।

१. सदा+उच्चता २. यत् + च
३. सिंहविक्रमाः + वयम् ४. उत् + भवाः

आ) सन्धिविच्छेदं कृत्वा सन्धिनाम लिखन्तु ।

१. तच्चिरम् २. जनन्यनन्यचरणयोः

इ) पाठं पठित्वा अधः दत्तानि समाससम्बद्धानि पदानि चित्वा लिखन्तु ।

१. बहुव्रीहिः २. तत्पुरुषः

ई) समुचितविभक्त्या वाक्यपूर्तिं कुर्वन्तु ।

१. छात्राः --------------- क्रीडन्ति । (क्रीडाङ्गणेन / क्रीडाङ्गणस्य / क्रीडाङ्गणे)
२. शिशुः ----------------- विना न तिष्ठति । (मातरं / मात्रे / मातरि)
३. जनकः ---------------- चाकलेहं ददाति । (पुत्रे / पुत्रः / पुत्राय)

**परियोजनाकार्यम्**

एतादृशानि प्रेरणात्मकगीतानि संकलय्य भित्तिपत्रे लिखित्वा कक्ष्यायाम् आलम्बयन्तु ।

**उत्तिष्ठत ! जाग्रत ! प्राप्यवरान्निबोधत ।**



SCERT TELANGANA

प्रथमः भागः

# २. श्लोकरत्नानि

**पठन्तु, विचिन्त्य वदन्तु**

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्या हि काव्यं मधुरं तस्मादपि सुभाषितम् ॥

**प्रश्नाः**

१. सर्वासु भाषासु मधुरा भाषा का ?
२. संस्कृतभाषायां किं मधुरम् ?
३. काव्यात् किं मधुरम् ?
४. सुभाषितं नाम किम् ?

SCERT TELANGANA

**उद्देश्यम्**

* छात्रेषु नैतिकमूल्याभिवर्धनं नीतिश्लोकाध्ययने अभिरुच्युत्पादनञ्च ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

## कविपरिचयः

१. **भर्तृहरिः** - अयं च कविः 'सुभाषितत्रिशतिः' इत्याख्यं ग्रन्थं व्यरचयत् । अस्मिन् ग्रन्थे नीतिशतकं, शृङ्गारशतकं, वैराग्यशतकञ्चेति शतकत्रयमस्ति । प्रस्तुतपाठ्यांशे ३,४,६,७,१० श्लोकाः सुभाषितत्रिशत्यां नीतिशतकात् सङ्गृहीताः ।

२. **भवभूतिः** - "उत्तरे रामचरिते भवभूतिर्विशिष्यते" इति उक्तेः भवभूतेः वैदुष्यं स्फुटीभवति । प्रस्तुतपाठ्यांशे द्वितीयश्लोकः भवभूतिप्रणीतोत्तररामचरितात् स्वीकृतः।

३. **कालिदासः** - अयं कविः प्रपञ्चकविषु अग्रगण्यः । "उपमा कालिदासस्य" इति अस्य कवेः प्रशस्तिः प्रथिता । प्रस्तुतपाठ्यांशगतः अष्टमश्लोकः कालिदासविरचितात् मालविकाग्निमित्रनाटकात् स्वीकृतः ।

४. **भारविः** - भारविः किरातार्जुनीयं नाम महाकाव्यं व्यरचयत् । "भारवेरर्थगौरवमिति' अस्य कवितायाः प्रशंसा प्रसिद्धा । प्रस्तुतपाठ्यभागे भारविविरचित-किरातार्जुनीयमहाकाव्यात् ५,९ श्लोकद्वयं स्वीकृतम् ।

५. **राजशेखरः** - अयं कविः विद्धशालभाञ्जिकां व्यरचयत् । प्रस्तुतपाठ्यांशस्य प्रथमश्लोकः विद्धशालभाञ्जिकातः स्वीकृतः । विद्धशालभञ्जिका रूपकभेदेषु नाटिकाख्या प्रक्रिया ।

६. **विदुरनीतिः** - व्यासविरचितं महाभारतं धर्मप्रतिपादकेषु अतिमहत्त्वपूर्णं काव्यम् । अस्मिन् महाभारते धृतराष्ट्रविदुरयोर्मध्ये यः संवादः संवृत्तः स एव विदुरनीतिरिति नाम्ना प्रसिद्धः । प्रस्तुतपाठ्यांशगतं ११,१२ श्लोकद्वयं विदुरनीतौ प्रथमाध्यायात् स्वीकृतम् ।

### प्रवेशिका

'मनुष्येषु ज्ञानं हि विशेषः' इति आर्योक्तिः । इतरप्राणिभ्यः ज्ञानाधिक्येनैव मानवः गरीयानिति कीर्त्यते । तादृशं ज्ञानं सन्मार्गे प्रयुक्तं सत् लोककल्याणकारकं भवति ।अविनीतिमार्गे प्रयुक्तं सत् लोकविनाशकारकं भवति । पूर्वम् ऋषयः,कवयः ज्ञानं समाजहिताय कथमुपयोक्तव्यमिति आलोच्य सम्यक् परिशील्य उत्तमश्लोकरूपेण अस्मभ्यं दत्तवन्तः। तेषु कानिचन श्लोकरत्नानि भवतां पुरतः उपस्थाप्यन्ते तानि पठित्वा नन्दन्तु ।

**सुजनपद्धतिः**

१. श्रियं प्रदुग्धे विपदो रुणद्धि
यशांसि सूते मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धिः किल कामधेनुः ॥

\- विद्धसालभञ्जिका


SCERT TELANGANA



२. शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षः त्वयि तु मम भक्तिं द्रढयति ।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्याऽसि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न वयः ॥

- उत्तररामचरितम्

**विचिन्त्य वदन्तु**

* ''गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः'' इति भवभूतिः अवोचत् खलु ! इदानीन्तनकाले इत्थं सम्भवति वेति चर्चयन्तु ?

### परोपकारपद्धतिः

* ३. तृष्णां छिन्दि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ।

- भर्तृहरिनीतिशतकम्



४. सुजनो न याति वैरं परहितरतो विपत्तिकालेऽपि ।
छेदेऽपि चन्दनतरुस्सुरभीकरोति मुखं कुठारस्य ॥

- भर्तृहरिनीतिशतकम्

### अर्थपद्धतिः

* ५. सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धास्स्वयमेव सम्पदः ॥

- किरातार्जुनीयम्

६. यद्धात्रा निजफालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥

- भर्तृहरिनीतिशतकम्

SCERT TELANGANA

* ७. दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।

- भर्तृहरिनीतिशतकम्

८. पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ।।

- मालविकाग्निमित्रम्

९. शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ।।

-किरातार्जुनीयम्

१०. क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत्किमु भूषणैस्सुकविता यद्यस्ति राज्येन किम् ।।

- भर्तृहरिनीतिशतकम्

११. क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टोऽप्युपयुङ्क्ते परार्थे
तत्प्रज्ञानं प्रथमं पण्डितस्य ।।

- विदुरनीतिः

१२. नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ।।

- विदुरनीतिः

### विचिन्त्य वदन्तु

* 'अविवेकः परमापदां पदम्' इत्यमुं विषयं युक्तैः दृष्टान्तैः समर्थयन्तु ।
* 'पुराणमित्येव न साधु सर्वम्' इति कालिदासः अवदत् खलु ! अमुं विषयं समर्थयन्ति उत विरुध्यन्ति? सकारणं वदन्तु ।

### विचिन्त्य वदन्तु

* 'सुकविता यद्यस्ति राज्येन किम्' इति भर्तृहरिवाक्यस्य विश्लेषणं कुर्वन्तु ।
* 'विज्ञाय चार्थं भजते न कामात्' इति विदुरनीतेः भावं वदन्तु ।


SCERT TELANGANA

**भावाः -**

१. बुद्धिः परिशुद्धा भवति चेत् कामधेनुरिव सम्पत्तिं ददाति । आपदम् अपनुदति । कीर्तिं ददाति । पापं निवारयति । सत्संस्कारैः शुद्धत्वेन च जनं पवित्रं करोति ।

२. (भवभूतिविरचिते उत्तररामचरितनाटके सीतादेवीं प्रति अरुन्धतीदेव्या कथितः एषः विषयः) हे जानकि ! त्वं बाला वा छात्रा वा भवसि इत्ययं सम्बन्धः साधारणः । सः तथा अन्यत्र भवतु । प्रकृते जन्मतः विद्यमानः पवित्रतायाः उत्कर्षः मदीयां भक्तिभावनां दृढीकरोति । भवत्याः बाल्यं, स्त्रीत्वं वा भवतु त्वं लोकानां पूजनीया असि । तथाहि गुणा एव पूजास्थानमर्हन्ति । पुरुषादिलिङ्गं वा अधिकं वयो वा पूजनीयताहेतुः न भवति । गुणवत्सु राजमानाः गुणा एव पूजास्थानं भवन्ति ।

३. आशां कर्तय । क्षमागुणमाश्रय । गर्वं त्यज । पापासक्तः मा भूः । सत्यं वद । सज्जनमार्गमनुसर। पण्डितसेवां कुरु । मान्यान् पूजय । शत्रून् अपि अनुनयेन वशीकुरु । गुरौ भक्त्या प्रवर्तस्व । नम्रतां विधेहि । आत्मश्लाघां मा कुरु । कीर्तिमार्जय । दुःखिते जने दयां कुरु । एतत्सर्वं सताम् उचितमभीष्टं कार्यजातम् ।

४. परहिततत्परः सज्जनः आपत्कालेऽपि आपत्कर्तारं न द्वेष्टि । प्रत्युत उपकरोति । तथाहि चन्दनतरुः छेदनं कुर्वतः कुठारस्यापि अग्रं सुगन्धीकरोति । तेन वृक्षभेदकस्य पुरुषस्याऽपि स्वसौरभेण आह्लादं जनयति ।

५. किमपि कार्यम् अनालोच्य हठात् न कर्तव्यम् । विवेकराहित्यम् आपदां स्थानं भवति । सम्यक् सदसद्विमर्शनं कृत्वा कार्याणि कुर्वतः जनान् स्वयं गुणलुब्धाः सम्पदः आश्रयन्ते । अविचारितं कर्म न कर्तव्यमिति भावः ।

६. ब्रह्मणा स्वकीयफालभागे यत् लिखितम् अल्पं वा महत् वा तद्धनं मरुस्थले पर्वते वा लभ्यते । अधिकं तु नैव प्राप्यते । अतो धीरो भव । धनिनः दृष्ट्वा दीनत्वं न प्राप्नुहि । तथाहि कूपे समुद्रे च घटः समानमेव जलं स्वीकरोति खलु । अनतिक्रमणीयो विधिर्नाम ।

७. धनव्ययस्य त्रयः मार्गाः भवन्ति । ते च दानं, स्वयंभोगः विनाशश्च । यः न ददाति, नानुभवति, तस्य धनस्य तृतीयमार्गः विनाश एव भवति । तादृशजनस्य इहपरसौख्यं शशविषाणप्रायमेव ।

८. पुरातनम् इति हेतोः सर्वम् समीचीनम् इति न मन्तव्यम् । नवीनमिति हेतोः आधुनिककाव्यादिकम् निन्द्यमिति न भावनीयम् । सज्जनाः गुणदोषौ सम्यक् परीक्ष्य विषयं स्वीकुर्वन्ति । गुणदोषौ स्वयम् अविचिन्त्य नवीनमेव प्राचीनमेव सम्यगिति विश्वासस्थापनं मूर्खत्वमेव । साधारणजनोक्तिं विश्वस्य पुराणमेव साधु नवीनम् असाधु इति विश्वस्यन् जनः मूर्खः एव भवति ।

SCERT TELANGANA

९. शास्त्रज्ञानमेव मानवशरीरं शोभयति । शास्त्रज्ञानस्य सहनमेव आभरणम् । न तु केवलपाण्डित्यप्रदर्शनम् । सहनस्य आभरणं विक्रमः भवेत् । स च विक्रमः नीतियुक्तकार्यसाधनभूषणात्मकः भवेत् । सः प्रसङ्गानुरोधेन पराक्रमः प्रदर्शनीयः । सर्वदापि नीतिं न परित्यजेत् इति सारांशः ।

१०. मनुष्याणां तितिक्षा भवति चेत् कवचेन प्रयोजनं नास्ति । तितिक्षैव कवचमिव रक्षति । अकारणेन कोपः भवति चेत् शत्रुभिः किं क्रियते ? कोपः एव शत्रुरित्यर्थः । कोपेनाऽपि आत्मविनाशः भवतीति भावः। जनस्य दायभागः भवति चेत् अग्नेः आवश्यकता नास्ति । अग्निर्यथा दहति तथा दायभागोऽपि अस्मान् पीडयतीत्यर्थः । सन्मित्रं विद्यते चेत् उत्तमौषधैः प्रयोजनं नास्ति । मित्रमपि औषधवत् मानसिकरोगं निवारयतीत्यर्थः । दुर्जनाः भवन्ति चेत् सर्पाणाम् आवश्यकता नास्ति । सर्पाः दुर्जनाः गूढतया अस्मान् घ्नन्तीति भावः। निर्दुष्टविद्यासम्पत्तिमतां निधीनामावश्यकता नास्ति । विद्यैव निधिरित्यर्थः। लज्जा विद्यते चेत् आभरणैः प्रयोजनं नास्ति । मनुष्याणाम् अहं दुष्कार्यं करोमि वा इति भावरूपा लज्जैवालङ्कारः इति भावः । सत्कवित्वं विद्यते चेत् राज्येन प्रयोजनं नास्ति । कविः सर्वत्र सम्भाव्यते इत्यर्थः। (कवच-शत्रु-अग्नि-औषध-सर्प-धन-भूषणराज्येभ्यः सहन-क्रोध-दायभाग (ज्ञाति) - मित्र-दुर्जन-विद्या-लज्जा-कविताः अत्यन्तं शक्तियुक्ताः भवन्ति इति भावः।

११. पण्डितः विवेकी सन् विषयं शीघ्रं जानाति । प्रस्तूयमानं विषयं तु अवहितस्सन् चिरम् आकर्णयति । न तु स्वेच्छया साररूपार्थं स्वीकरोति । नाऽपृष्टः इतरविषयेषु स्वप्रज्ञां उपयुङ्क्ते । एतादृशी प्रवृत्तिरेव पण्डितस्य लक्षणम् भवति ।

१२. पण्डितमतयः (विवेकिनः) मानवाः अप्राप्यं किमपि न वाञ्छन्ति । विनष्टं मनसि निधाय शोकासक्ताः न भवन्ति । विपत्काले विवेकं न त्यजन्ति ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. पाठे स्थितानां श्लोकानां भावं वदन्तु ।

२. पाठे स्थितान् श्लोकान् रागयुक्ततया गायन्तु ।

३. अधः दत्तविषयान् पाठाधारेण चर्चयन्तु ।

१. सुजनः २. परोपकारः ३. धनम् ४. विद्वत्ता

४. पाठस्थेषु सुभाषितश्लोकेषु भवद्रोचकाः श्लोकाः के ? किमर्थमिति वदन्तु ।

आ) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि कोष्ठकेषु सूचयन्तु ।**

१. का सम्पत्तिं प्रसूते । ( )

१. धेनुः २. लक्ष्मीः

३. शुद्धा बुद्धिः ४. शक्तिः

२. मानवेषु पूजास्थानं........... ( )

१. लिङ्गं २. वयः

३. गुणाः ४. उद्योगः(उपाधिः)

३. विपत्तिकाले कः वैरं न याति ? ( )

१. दुर्जनः २. मित्रम्

३. सुजनः ४. बन्धुः

४. घटः कुत्र समानं जलं स्वीकरोति ? ( )

१. समुद्रे २. कूपे

३. तडागे ४. त्रिषु

५. धनस्य गतयः कति ? ( )

१. चतस्रः २. षट्

३. एका ४. तिस्रः

इ) **अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

''दानं प्रियवाक्सहितम् ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तम् दुर्लभमेतच्चतुष्टयम् ॥''

१. धनं कीदृशं भवेत् ?

२. प्रियवाक्सहितं किं भवेत् ?

३. ज्ञानं कथं भवेत् ?

४. लोके दुर्लभं किम् ?

५. उपरितनश्लोकस्य शीर्षिकां सूचयन्तु ।

ई) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. परिशुद्धा बुद्धिः किं करोति ?

२. सतां चेष्टितं कीदृशं भवति ?

३. सज्जनः आपत्काले किं करोति ?

४. सम्पदः कीदृशं पुरुषं वरयन्ते ?

५. सज्जनमूर्खयोः दृष्टिः कथं भवति ?

६. पण्डितलक्षणानि लिखन्तु ।



SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. 'गुणाः पूजास्थानम्' इति विषये भवतामभिप्रायः कः ?

२. ''गुणलुब्धाः स्वयमेव सम्पदः'' इति किमर्थमुक्तम् ?

३. 'यद्धात्रा निजफालपट्टलिखितम्' इत्यस्य श्लोकस्य भावं स्वीयवाक्यैः लिखन्तु ।

४. 'सहसा विदधीत न क्रियां' किमर्थमिति लिखन्तु ।

५. 'सुकविता यद्यस्ति राज्येन किम्' इत्यत्र भवान् किं सूचयति ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. नीतियुक्तः फलदश्च पराक्रमः इदानीन्तनसमाजे कथमुपयोक्तव्यः इति स्वीयवाक्यैः लिखन्तु ।

२. ''तृष्णां छिन्दि'' इति श्लोकेन सज्जनानां चेष्टितं ज्ञातम् । अद्यतनकाले जनानां चेष्टितं कथमस्तीति स्वीयवाक्यैः लिखन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. मानवव्यवहारस्य मार्गनिर्देशने नीतिश्लोकाः कथमुपकुर्वन्ति ?

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

లేచి నిలబడు, ధైర్యంగా బలిష్ఠంగా ఉండు. మొత్తం బాధ్యతనంతా నీ భుజస్కంధాల మీదనే వేసుకో. నీ భవిష్యత్తుకు నీవే బాధ్యుడవని తెలుసుకో. నీకు కావలిసిన బలం, శక్తి ... అన్నీ నీలోనే ఉన్నాయి.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

### अ) अधः दत्तानां क्रियापदानाम् अर्थान् क्रियापदकोशसाहाय्येन ज्ञात्वा स्वीयवाक्यानि लिखन्तु ।

उदा - कुरु - सद्बुद्धिं कुरु सर्वदा ।

| | | | |
|---|---|---|---|
| १. प्रदुग्धे | २. ऋणद्धि | ३. सूते | ४. प्रमार्ष्टि |
| ५. पुनीते | ६. छिन्दि | ७. जहि | ८. ब्रूहि |
| ९. अनुयाहि | १०. सेवस्व | | |

SCERT TELANGANA

आ) अधः दत्तानि अव्ययपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

| | | |
|---|---|---|
| १. च | २. मा | ३. अपि |
| ४. न | ५. किम् | ६. चेत् |

इ) अधः दत्तानां रेखाङ्कितपदानां पर्यायपदानि लिखन्तु ।

१. आपत्कालेषु बुद्धिरेव गरीयसी ।

२. मानवपतनस्य तृष्णा एव कारणभूता ।

३. जलजन्तवः पयोनिधौ अत्यधिकं निवसन्ति ।

४. आहारे व्यवहारे च व्रीडा परित्यक्तव्या ।

५. पराक्रमः यथावसरं धर्मरक्षणार्थं च प्रदर्शनीयः ।

## २. व्याकरणांशाः

अ) अधः दत्तानि पदानि संयोज्य सन्धिनामानि लिखन्तु ।

| | |
|---|---|
| १. अभि + उदयः | २. प्रशम + आभरणम् |
| ३. शान्तिः + चेत् | ४. दिव्य + औषधैः |
| ५. चेत् + अनलेन | |

आ) प्रस्तुतपाठे अधो दत्तानां सन्धीनां सम्बद्धानि पदानि पाठे अन्विष्य क्रमेण सूचयन्तु ।

| | |
|---|---|
| १. यणादेशसन्धिः | २. विसर्गसन्धिः |
| ३. सवर्णदीर्घसन्धिः | ४. जश्त्वसन्धिः |

इ) अधो दत्तानां समासानां प्रस्तुतपाठे उदाहरणानि पाठात् चित्वा तेषां विग्रहवाक्यानि सूचयन्तु ।

१. विशेषणपूर्वपदकर्मधारयसमासः

२. षष्ठीतत्पुरुषसमासः

३. नञ् तत्पुरुषसमासः

ई) अधो दत्तस्य श्लोकस्य अलङ्कारं लक्ष्यलक्षणपूर्वकं विवृण्वन्तु ।

श्रियं प्रदुग्धे विपदो रुणद्धि<br>
यशांसि सूते मलिनं प्रमार्ष्टि ।<br>
संस्कारशौचेन परं पुनीते<br>
शुद्धा हि बुद्धिः किल कामधेनुः ॥

उ) अधः दत्तेषु श्लोकपादेषु स्थितं छन्दः गणविभजनपुरस्सरं सूचयन्तु ।

१. पुराणमित्येव न साधु सर्वम् ।

२. सहसा विदधीत न क्रियाम् ।

SCERT TELANGANA

* **अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च कथं कृतमिति अवगच्छन्तु।**

''यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां''

| I U U | U U U | I I I | I I U | U I I | I | U |
|---|---|---|---|---|---|---|
| यदालो | के सूक्ष्मं | व्रजति | सहसा | तद्विपु | ल | तां |
| य | म | न | स | भ | ल | गु |

अत्र क्रमशः य-म-न-स-भ-ल-गु इतीमे गणाः वर्तन्ते ।

एवं वर्तन्ते चेत् ''शिखरिणीच्छन्दः'' भवति ।

**शिखरिणीच्छन्दसः लक्षणानि -**

१. श्लोके पादचतुष्टयं भवति ।

२. प्रतिपादं क्रमेण य म न स भ ल गु इतीमे गणाः भवन्ति ।

३. षष्ठस्थाने एकादशस्थाने च यतिर्भवति ।

४. प्रतिपादं सप्तदशाक्षराणि भवन्ति ।

**लक्षणम् -**

''रसैः रुद्रैश्छिन्ना यमनसभलगाः शिखरिणी'' ।

अस्मिन् पाठे शिखरिणीवृत्तसबद्धश्लोकोऽस्ति । तम् उद्धृत्य लक्ष्यलक्षणसमन्वयं कुर्वन्तु ।

**परियोजनाकार्यम्**

भवद्भिः अधीतनीतिश्लोकेभ्यः पाठ्यांशनीतिश्लोकेभ्यश्च सूक्तीः सङ्गृह्य भित्तिपत्रे विलिख्य प्रदर्शयन्तु ।

**पिबन्तु वाङ्मयसुधां तरन्तु भवसागरम् ।**

SCERT TELANGANA

प्रथमः भागः

# ३ . मेघसन्देशः

## पठन्तु, विचिन्त्य वदन्तु

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥

**प्रश्नाः**

१. एतस्य श्लोकस्य भावः कः ?
२. रामस्य क्षेमवार्तां सीतां, सीतायाः सन्देशं रामं च कः श्रावितवान्?

SCERT TELANGANA

## उद्देश्यम्

* काव्यस्य रसास्वादनक्षमतायाः अभिवर्धनम् ।
* प्राचीनभारतीयभौगोलिकस्थितीनामवगमनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

## कविपरिचयः

महाकविः कालिदासः प्रथमशताब्द्यां विक्रमादित्यकाले आसीत् इति केचन, भोजराजास्थाने आसीत् षष्ठशताब्दीय इति केचन वदन्ति । भवतु यत्किमपि नाम कालिदासस्य उपमाप्रियत्वं, काव्यमाधुर्यं न कदापि विस्मरामः । कविकुलतिलकोऽयं रघुवंशं कुमारसम्भवं चेति महाकाव्ये मेघसन्देशम् ऋतुसंहारः इति खण्डकाव्यद्वयम्, अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं, विक्रमोर्वशीयम् इति नाटकत्रयं च लिखितवान्। अस्य शैली द्राक्षापाकपरिपूर्णा ।

## प्रवेशिका

भारते कालिदासस्य जीवनकालः स्वर्णयुगत्वेन परिगण्यते । ग्रामाः, जनपदानि, नगराणि धनधान्यादिसमृद्धिभिः, सकलकला - वाणिज्यादि - रङ्गानाम् औन्नत्येन च विराजन्ते स्म । महाकवि - कालिदासः स्वयं प्रत्यक्षं दृष्ट्वा तेषां नगराणां वर्णनं सर्वाङ्गशोभिततया स्वकाव्येषु अकरोत् । तादृशनगरवर्णनं प्रस्तुतपाठ्यांशे निक्षिप्तम् । पठित्वा आनन्दमाप्नुवन्तु ।

१. कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

२. तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तस्स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

३. प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥

SCERT TELANGANA



* ४.   सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥

* ५.   मार्गं तावच्छृणु कथयत स्वप्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्यगन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥

६.   पाण्डुच्छायोपवनवृतयः केतकैस्सूचिभिन्नै-
र्नीडारम्भैः गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥

७.   वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मास्मभूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैर्यत्र पौराङ्गणानां
लीलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितः स्थाः ॥

## विचिन्त्य वदन्तु

* वृष्टिकालारम्भसमये प्रकृतिः कथं भवतीति वर्णयन्तु ।

* यक्षः मेघेन सन्देशं प्रेषयितुमिष्टवान् खलु ! एतद् युक्तं न वेति विश्लेषणं कुर्वन्तु।

* ‘वक्रः पन्थाः अपि उज्जयिनीं पश्यन् गच्छ’ इति मेघं यक्षः प्रोक्तवान् खलु ! तथा किमर्थमुक्तवानिति वदन्तु ।

*   ८.   प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥

९.   त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतोवातः परिणमयिता काननोदुम्भराणाम् ॥

१०.   तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामागात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ।

११.   ब्रह्मावर्तं जनपदमथ छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः ।
राजन्यानां सितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥

१२.   तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥

१३.   आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥

१४.   गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥

*   १५.   तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रबृन्दम् ॥

**विचिन्त्य वदन्तु**

* गङ्गानदीं कालिदासः वर्णितवान् खलु ! गङ्गावतरणाय भगीरथेन कृतं प्रयत्नमुद्दिश्य वदन्तु ।

**विचिन्त्य वदन्तु**

* भारतदेशे नैरृतिपवनाः इत्याख्यानाम् ऋतुपवनानां प्रयाणमार्गस्य कालिदासोपवर्णित-प्रयाणमार्गस्य च मध्ये स्थितस्य सारूप्यस्य विश्लेषणं कुर्वन्तु ।

SCERT TELANGANA

## भावाः

१. स्वाधिकारात् प्रमत्तं यक्षं प्रभुः कुबेरः शप्तवान् । शापेन तस्य यक्षस्य सामर्थ्यं लुप्तमभवत् । चित्रकूटस्य आश्रमेषु सीतास्नानपुण्योदकेषु छायातरुषु विश्रमन् संवत्सरकालभोग्यशापे कतिपयमासान् यापितवान् ।

२. चित्रकूटपर्वते भार्याविरहेण शुष्कः यक्षः आषाढस्य प्रथमदिवसे, आक्रान्तशिखरं, वप्रक्रीडायां तिर्यग्दन्तप्रहारितगजप्रेक्षणीयं मेघं ददर्श ।

३. यक्षः अनन्तरकाले विरहेण पीडितायाः भार्यायाः प्राणरक्षणार्थं प्रियायै स्वीयकुशलवार्तां प्रेषयितुमभिलषितवान् । तदर्थं मेघाय स्वागतं कुर्वन् कुशलं पृष्टवान् ।

४. हे मेघ ! त्वम् आतपेन संताप्तानां जनानां जलप्रोक्षणैः तापपरिहारेण रक्षकोऽसि । अहमपि विरहाग्निना संतप्तः । अतः कुबेरस्य शापेन पीडितस्य मदीयकुशलवार्तां मम भार्यां प्रति उक्त्वा तस्याः प्राणरक्षको भव । मम भार्या अलकापुर्यां निवसति । तत्र बहिः उद्याने शिवः अस्ति । तस्य शिरसि स्थितस्य चन्द्रलेखायाः ज्योत्स्नया तस्मिन् पत्तने महाधनिकानां सदनानि शोभन्ते ।

५. हे जलद ! इदानीं तव प्रयाणस्य अनुकूलमार्गं वदिष्यामि । श्रृणु ! यदि मध्ये मार्गायासः भवति तर्हि पर्वतशिखरेषु विश्रान्तो भव । क्षीणबलः भवसि चेत् गुरुत्व (पथ्य) दोषरहितासु नदीषु जलं पीत्वा पुनः तुष्टः पुष्टः सन् गच्छ ।

६. हे मेघ ! तव गमनमार्गे दशार्णदेशः दृश्येत । तत्र उपवनं कैतकीपुष्पैः धवलवर्णेन शोभते । तत्र ग्रामवीथीषु रथ्यावृक्षाः बृहदाकरेण विस्तार्य वायसादिपक्षिभिः आश्रिताः शोभन्ते । तथापि भवतः आगमनं दृष्ट्वा हंसाः पत्तनं त्यक्त्वा शनैः गन्तुम् उद्युक्ताः भविष्यन्ति ।

७. हे जलधर ! उत्तरस्यां दिशि प्रस्थितस्य भवतः उज्जयिनी दूरे भवति । तथापि उज्ञयिनीसौधानाम् उपरि क्षणं स्थित्वा उज्ञयिन्याः शोभां न द्रक्ष्यसि चेत् तत्र सञ्चरन्तीनां विद्युल्लतासदृशानाम् अङ्गनानां चकितचंचललोचनानि न पश्यसि चेत् तव जन्म वृथा एव ।

८. हे मेघ ! निर्विन्ध्यानदीं तीर्त्वा अवन्तीदेशं प्रविश । अवन्त्याः राजधानी उज्जयिनी । तत्र उदयनेन कृताः वासवदत्तापहरणादिगाथाः इदानीमपि ग्रामवृद्धाः वदेयुः । ताः त्वमपि श्रोतुमर्हसि । स्वर्गे स्थितानां जनानाम् अवशिष्टे स्वर्गफले पुनः भूमौ जन्म प्राप्य शेषान् स्वर्गभोगान् अनुभोक्तुं स्वर्गात् आनीतं तादृशस्वर्गखण्डमिव कान्तिविशेषेण भाति वा इति भावना जनिष्यति ।

९. हे जलद ! त्वं गम्भीरानदीं तीर्त्वा देवगिरिपर्वतं प्रति गच्छतु । त्वद्वर्षणेन जनितेन परिमलभरितवायुना तव श्रमम् अपनोदय । गजाः भूमेः तादृशसुगन्धम् आस्वाद्य आनन्देन घींकारं कुर्युः । तान् पश्य। तत्र वनेषु उदुम्बरफलानां परिणमयितारं पश्यन् शीतलवायुम् आस्वादयन् गच्छ ।

१०. हे मेघ ! ततः चर्मण्वतीं नदीं तीर्त्वा दशपुरनगरं गच्छ । तत्र सौन्दर्यवत्यः स्त्रियः भ्रूलताविलासैः त्वां प्रीत्या पश्येयुः । तासां पक्ष्म उत्क्षेपणात् आकाशे विलसितकृष्णशारकान्तीनाम् कुन्दानुसारिणं, मधुकरणां शोभां तिरस्कुर्वन्तीव स्थितां तासां नेत्रशोभां पश्यन् गच्छ ।

११. हे मेघ ! ततः ब्रह्मावर्तदेशं छायया प्रविश ! तदेव महापुण्यक्षेत्रम् कुरुक्षेत्रम् । अद्यापि तत्र कपालः कुरुपाण्डवयुद्धसूचकः तथैव अर्जुनः गाण्डीवेन अनेकशत्रूणां शिरांसि चिच्छेद इति विषयं सूचयति ।

१२. हे जलद ! कुरुक्षेत्रात् कनखलाद्रेः समीपे गङ्गानदीं सेवस्व । सा गङ्गा हिमालयात् अवतीर्णा, सगरतनयानां स्वर्गप्राप्तिसाधनभूतां जह्नुमहर्षेः पुत्रीं, भ्रुकुट्या कोपं प्रदर्शयन्तीं गौरीं स्वफेनैः वक्रहासं प्रदर्शयन्तीव, चन्द्ररेखागतैः तरङ्गकृत्स्नैः शिवस्य केशग्रहणं कुर्वन्तीव स्थितां गङ्गानदीं प्रति गच्छ ।

१३. हे जलद ! तत्र हिमालयं गच्छतु, यत्र पर्वते उपविष्टानां कस्तूरिकामृगाणां नाभिगन्धैः शिलाः सुगन्धीकृताः । तुषारैः श्वेतवर्णं गङ्गोत्पत्याः कारणभूतं हिमालयं प्राप्य तत्र वस । तत्र हिमाद्रेः श्रृङ्गे निषण्णः सन्, शिवस्य वृषभेण विदारितपङ्कोपमेयशोभां विधत्से ।

१४. हे मेघ ! ततः ऊर्ध्वं च गत्वा कैलासपर्वतं गच्छ । (स्फटिकत्वात् वा रजतत्वात् वा) शिवसेवार्थम् आगतानां देवतास्त्रीणां प्रतिबिम्बानि दर्पणे इव द्रष्टुं शक्यते । सः कैलासः पुष्पवत् विशदैः श्वेतैः शिखरैः विलसितः शङ्करस्य अट्टहास इव राजते ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।**

१. यक्षः मेघेन सन्देशं प्रेषितवान् खलु ! इदानीन्तनकाले सन्देशप्रेषणाय कानि उपकरणानि / साधनानि वर्तन्ते ?

२. भवतः परिचितग्रामं / नगरं प्रति गमने अन्येभ्यः कथं मार्गदर्शनं करोतीति विवृणोतु ।

**आ) पाठेऽस्मिन् केषाञ्चन नगराणां / प्रदेशानां / नदीनां नामानि दत्तानि सन्ति । तानि अन्विष्य उदाहरणानुसारं क्रमशः लिखन्तु ।**

उदा

| श्लोकसङ्ख्या | नगरनाम/प्रदेशनाम/नदीनाम |
|---|---|
| १ | रामगिरेः आश्रमः |



SCERT TELANGANA

### इ) अधः दत्तं श्लोकं पठित्वा प्रश्नानाम् समाधानानि लिखन्तु ।

नापृष्टः कस्यचित् ब्रूयात् न चान्याय्येन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥

१) कस्यचित् कथं ब्रूयात् ?

२) अन्याय्येन पृच्छतः किमर्थं न ब्रूयात् ?

३) मेधावी लोके कथम् आचरेत् ?

### ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. यक्षः किमर्थं रामगिर्याश्रमेषु वसति ?
२. यक्षः कीदृशं मेघं ददर्श ?
३. उज्जयिनी कीदृशी ?
४. ब्रह्मावर्तदेशः कं विषयं सूचयति ?
५. कैलासपर्वतः कथमस्ति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु ।

१. सन्देशः नाम कः ? सः कतिप्रकारकः ?
२. अषाढमासे भवतः परिसरप्रदेशाः कथं भवन्ति ?
३. एतस्मिन् पाठे भवताम् इष्टाः श्लोकाः के ? किमर्थम् ?
४. 'मेघसन्देशः' नामश्रवणेन कीदृशी भावना भवतः मनसि जाता ?
५. 'भूमौ शेषान् स्वर्गभोगान् अनुभवति' इति कविवर्णनस्य भावः कः ?

### आ) अधः दत्तयोः प्रश्नयोः निबन्धरूपेण समाधाने लिखन्तु ।

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।
२. कवेः कालिदासस्य शैली वर्णनानैपुण्यं च निरूपयन्तः एकं निबन्धं लिखन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. भवद्भिः दृष्टं किमपि क्षेत्रं कमपि मार्गं वा वर्णयन्तः मित्रेभ्यः लेखं लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

పుష్కలావర్తకములనే గొప్పవైన మేఘముల వంశము నందు పుట్టినవాడు ఆ మేఘుడు. అతడు యక్షుని సందేశాన్ని దేవరూపాన్ని ధరించి దేవవాక్కుతో యక్షపత్నికి చెప్పెను. ఆమె ఆ వార్త వలన తన భర్త కుశలముగా ఉన్నాడని తెలుసుకొని సంతోషించినది.కుబేరుడు కూడా మేఘుని యొక్క ఆ సందేశాన్ని విని జాలిపడి తత్క్షణమే శాపవిమోచనం కలిగించాడు.

SCERT TELANGANA

III. **भाषांशाः**

## १. पदजालाभिवृद्धिः

**अ) रेखाङ्कितपदानां समानार्थकपदानि पाठात् चित्वा, तान्युपयुज्य स्वीयवाक्यानि रचयन्तु ।**

१. आकाशे पक्षिणः विहरन्ति ।

२. अहं जलं पिबामि ।

३. शेषाचलपर्वते भगवान् वेङ्कटेश्वरः अस्ति ।

**आ) अधः दत्तानां रेखाङ्कितपदानां विरुद्धार्थकपदानि पाठात् चित्वा स्वीयवाक्यानि लिखन्तु ।**

१. सीतादर्शनेन रामः सन्तुष्टः ।

२. रावणः अपकीर्तिं प्राप ।

## २. व्याकरणांशाः

**अ) सन्धिं कृत्वा सन्धिनाम लिखन्तु ।**

१. रामगिरि + आश्रमेषु　　२. सु + आगतम्

३. आराध्य + एनम्

**आ) सन्धिविच्छेदनं कृत्वा सन्धिनाम लिखन्तु ।**

१. यक्षश्चक्रे　　२. प्रत्यग्रैः

३. ब्रह्मावर्तम्　　४. सलिलोद्गारः

**इ) अधः दत्तानां समासानां सम्बद्धपदानि पाठात् चित्वा लिखन्तु ।**

१. कर्मधारयः　　२. बहुव्रीहिः　　३. तत्पुरुषः

**ई) 'क्त'प्रत्ययान्तपदानि पाठात् चित्वा लिखन्तु ।**

उदा - वञ्चितः ।

**उ) समुचितविभक्त्या वाक्यपूर्तिं कुर्वन्तु ।**

१. यक्षः -------------------- (विरहः) पीडितः ।

२. निर्विन्ध्या --------------------- (नदी) तीर्त्वा अवन्तीदेशं प्रविश ।

३. तत्र ------------ (वनम्) उदुम्बरफलानि आस्वादयन् गच्छतु ।

**ऊ) अधः दत्तस्य श्लोकपादस्य गणविभजनं कृत्वा लक्ष्यलक्षणसमन्वयं प्रदर्शयन्तु ।**

''शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने''

* **अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च कथं कृतमिति अवगच्छन्तु ।**

''मन्दाक्रान्ता भवति कविता कामिनीकौतुकाय''



SCERT TELANGANA

| | | | | | | |
|---|---|---|---|---|---|---|
| UUU | U I I | I I I | U U I | U U I | U | I(U) |
| मन्दाक्रा | न्ताभव | तिकवि | ताकामि | नीकौतु | का | य |
| म | भ | न | त | त | गु | गु |

**सूचना** - पदान्ते स्थितः लघुः विकल्पेन गुरुः भवति ।

- अत्र क्रमशः म भ न त त गु गु इतीमे गणाः वर्तन्ते । एवं वर्तन्ते चेत् ''मन्दाक्रान्ता'' छन्दः भवति ।

**मन्दाक्रान्तावृत्तस्य लक्षणानि -**

१. श्लोके पादचतुष्टयं भवति ।
२. प्रतिपादं क्रमेण म भ न त त गु गु इतीमे गणाः भवन्ति ।
३. चतुर्थ - षड् - सप्तमाक्षराणां स्थानेषु यतिः भवति ।
४. प्रतिपादं सप्तदशाक्षराणि भवन्ति ।

लक्षणम् - मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्

**ऋ) अस्मिन् पाठे मन्दाक्रान्तासम्बद्धश्लोकाः एव सन्ति । काँश्चन श्लोकपादान् उद्धृत्य तेषु लक्षणसमन्वयं कुर्वन्तु ।**

***. अधः दत्तानां समस्तपदानां विग्रहवाक्यानि अवगच्छन्तु ।**

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| १. कुसुमकोमलम् | कुसुमम् इव कोमलम् |
| २. वज्रकठोरम् | वज्रम् इव कठोरम् |
| ३. चन्द्रमुखम् | चन्द्रः इव मुखम् |

- ''कुसुमकोमलम्'' इति समासपदम् ।
- अस्य पदस्य विग्रहवाक्यम् ''कुसुमम् इव कोमलम्'' इति
- अस्मिन् समस्तपदे उपमावाचकम्, उपमेयवाचकेन सह समस्यते । तेन अयम् **उपमानपूर्वपदकर्मधारयसमासः** । अत्र 'इव' इति पदम् उपमावाचकं भवति ।

**ॠ) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।**

१. घनश्यामः    २. शैलोन्नतः
३. पुरुषव्याघ्रः    ४. कविकुञ्जरः

**परियोजनाकार्यम्**

अस्मिन् पाठे वर्णितदेशाः आधुनिककाले कैः नामभिः निर्दिश्यन्ते । ते च कुत्र सन्ति इति विज्ञाय तेषां सूचीं कुर्वन्तु ।

SCERT TELANGANA

द्वितीयः भागः

# ४. परमो धर्मः

## पठन्तु, विचिन्त्य वदन्तु

गुरुः - **प्रत्यक्षं देवताः लोके पितरश्शुभदायकाः ।**
**पोषणं तोषणं तेषां सर्वसम्पत्करं सदा ।।**
श्लोकं श्रुतवन्तः खलु ! श्लोके के स्तुताः ?

प्रणवः - महोदय ! मातापितरः स्तुताः ।

गुरुः - श्लोकस्य सारांशः कः?

महेशः - नित्यशुभकारकाः देवसदृशाः मातापितरः अस्माभिः सेवनीयाः।

गुरुः - अतः मातापितॄणां सेवनं रक्षणञ्च अस्माभिः निष्ठया करणीयम् । तेन अत्यन्तपुण्यफलं, चिरं कीर्तिः, सुवंशाभिवृद्धिः जायते ।

गणेशः - महोदय ! तत्कथम् ? इतः पूर्वं केनापि पितृसेवनं विहितं वा ?

गुरुः - साधु पृष्टवानसि । तद्विषयमिदानीं विपुलतया जानीमः ।

### प्रश्नाः

१. प्रत्यक्षदेवताः काः ?
२. मातापित्रोः रक्षणं कैः करणीयम् !
३. मातापितॄणां सेवनेन किं फलं लभ्यते ?

## उद्देश्यम्

* 'मातापित्रोः सेवनमेव परमो धर्मः' इति भावनायाः अभिवर्धनम् ।
* ऐतिहासिकग्रन्थाध्ययने अभिरुच्युत्पादनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

“विश्वश्रेयः काव्यम्” इति भावनां मनसि निधाय व्यासमहर्षिः जयाख्यं महाभारतं रचयामास । भगवान् व्यासः सत्यवतीपराशरमहर्षिणोः तनयः ।

'व्यासं वशिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

इत्यनेन व्यासवंशक्रमः सुविज्ञायते । व्यासस्य बादरायणः, कृष्णद्वैपायनः इति नामद्वयं वर्तते ।“इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्” इत्यनेन ज्ञायते यत् वेदार्थः इतिहासपुराणाभ्यां अवगम्यते । महाभारतं संस्कृतसाहित्ये अनुपमः इतिहासग्रन्थः भारतीयविज्ञानसर्वस्वं च । अस्य पञ्चमो वेदः इति ख्यातिरस्ति ।

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥

प्रस्तुतपाठ्यांशश्लोकाः महाभारते अरण्यपर्वणः सङ्गृहीताः ।

## प्रवेशिका

सकलधर्मेषूत्तमः कः इति विषये विज्ञाः एकैकोऽपि उत्कृष्टो धर्म इति आमनन्ति । परोपकार एव उत्तम इति केचन यज्ञयागादीनाम् आचरणमिति केचन, स्वधर्माचरणमेव परमो धर्म इति अन्ये मन्यन्ते । परं महाभारते भगवान् वेदव्यासः अनेकेषु सन्दर्भेषु कथारूपेण 'परमधर्मं' निरवोचत् । तं परमधर्मम् इदानीम् अवगच्छन्तु ।

१. कश्चिद्द्विजातिप्रवरो वेदाध्यायी तपोधनः ।
तपस्वी धर्मशीलश्च कौशिको नाम भारत ॥

२. स वृक्षमूले कस्मिंश्चिद्वेदानुच्चारयन्स्थितः ।
उपरिष्टाच्च वृक्षस्य बलाका संन्यलीयत ॥

३. तया पुरीषमुत्सृष्टं ब्राह्मणस्य तदोपरि ।
भृशं क्रोधाभिभूतेन बलाका सा निरीक्षिता ॥

४. बलाकां पतितां दृष्ट्वा गतसत्त्वामचेतनाम् ।
कारुण्यादभिसंतप्तः पर्यशोचत तां द्विजः ॥

५. अकार्यं कृतवानस्मि रागद्वेषबलात्कृतः ।
इत्युक्त्वा बहुशो विद्वान्ग्रामं भैक्षाय संश्रितः ॥



SCERT TELANGANA

६. प्रविष्टस्तत्कुलं यत्र पूर्वं चरितवांस्तु सः । (गृहं)
देहीति याचमानो वै तिष्ठेत्युक्तः स्त्रिया ततः ॥

७. एतस्मिन्नन्तरे राजन्क्षुधासंपीडितो भृशम् ।
भर्ता प्रविष्टः सहसा तस्या भरतसत्तम ॥

८. तं सर्वभावोपगतपतिशुश्रूषणे रता ।
सा ब्राह्मणं तदा दृष्ट्वा संस्थितं भैक्षकाङ्क्षिणम् ॥

९. कुर्वती पतिशुश्रूषां सस्माराथ शुभेक्षणा ।
भिक्षामादाय विप्राय निर्जगाम यशस्विनी ॥

१०. किमिदं भवति त्वं मां तिष्ठेत्युक्त्वा वराङ्गने ।
उपरोधं कृतवती न विसर्जितवत्यसि ॥

११. ब्राह्मणं क्रोधसंतप्तं ज्वलन्तमिव तेजसा ।
दृष्ट्वा साध्वी मनुष्येन्द्र सान्त्वपूर्वं वचोऽब्रवीत् ॥

१२. क्षन्तुमर्हसि मे विप्र भर्ता मे दैवतं महत् ।
स चापि क्षुधितः श्रान्तः प्राप्तः शुश्रूषितो मया ॥

### विचिन्त्य वदन्तु

* तपस्वी कौशिकः बलाका - विषये यत् कृतवान् तत् किं ? कौशिकस्य स्थाने भवन्तः भवन्ति चेत् किं करिष्यन्ति ?



१३. नावजानाम्यहं विप्रान्देवैस्तुल्यान्मनस्विनः ।
अपराधमिमं विप्र क्षन्तुमर्हसि मेऽनघ ॥

१४. शुश्रूषायाः फलं पश्य रोषात्तद्विदितं मम ।
बलाका हि त्वया दग्धा रोषात्तद्विदितं मम ॥

१५. यः क्रोधमोहौ त्यजति तं देवा ब्राह्मणं विदुः ।
इन्द्रियाणां निग्रहं च शाश्वतं द्विजसत्तम ॥

१६. सत्यार्जवे धर्ममाहुः परं धर्मविदो जनाः ।
न तु तत्त्वेन भगवन्धर्मान्वेत्सीति मे मतिः ॥

१७. मातापितृभ्यां शुश्रूषुः सत्यवादी जितेन्द्रियः ।
मिथिलायां वसन्व्याधः स ते धर्मान्प्रवक्ष्यति ॥

१८. तत्र गच्छस्व भद्रं ते यथाकामं द्विजोत्तम ।
चिन्तयित्वा तदाश्चर्यं स्त्रिया प्रोक्तमशेषतः ॥

१९. संप्रतस्थे स मिथिलां कौतूहलसमन्वितः ।
सोऽपश्यद्बहुवृत्तान्तं ब्राह्मणः समतिक्रमन् ॥

२०. अपश्यत्तत्र गत्वा तं सूनामध्ये व्यवस्थितम् ।
आकुलत्वात्तु क्रेतॄणामेकान्ते संस्थितो द्विजः ॥

२१. स तु ज्ञात्वा द्विजं प्राप्तं सहसा संभ्रमोत्थितः ।
आजगाम यतो विप्रः स्थित एकान्त आसने ॥

२२. अभिवादये त्वा भगवन्स्वागतं मे द्विजसत्तम ।
अहं व्याधस्तु भद्रं ते किं करोमि प्रशाधि माम् ॥

२३. एकपत्न्या यदुक्तोऽसि गच्छ त्वं मिथिलामिति ।
जानाम्येतदहं सर्वं तदर्थं त्वमिहागतः ॥

२४. श्रुत्वा तु तस्य तद्वाक्यं स विप्रो भृशहर्षितः ।
द्वितीयमिदमाश्चर्यमित्यचिन्तयत द्विजः ॥

२५. अदेशस्थं हि ते स्थानमिति व्याधोऽब्रवीद्द्विजम् ।
गृहं गच्छाव भगवन्यदि रोचयसेऽनघ ॥

२६. प्रविश्य च गृहं रम्यमासनेनाभिपूजितः ।
पाद्यमाचमनीयं च प्रतिगृह्य द्विजोत्तमः ॥

**विचिन्त्य वदन्तु**

* ‘पतिसेवापरायणाः स्त्रियः’ त्रैकालिकं (भूतवर्तमान-भविष्यत्कालिकं ज्ञानं) अविन्दन्त । तत्कथं साध्यमिति विवृण्वन्तु।

२७. ततः सुखोपविष्टस्तं व्याधं वचनमब्रवीत् ।
कर्मैतद्वै न सदृशं भवतः प्रतिभाति मे ॥

अनुतप्ये भृशं तात तव घोरेण कर्मणा

**व्याध उवाच -**

२९. कुलोचितमिदं कर्म पितृपैतामहं मम ।
वर्तमानस्य मे धर्मे स्वे मन्युं मा कृथा द्विज ॥

३०. प्रयत्नाच्च गुरू वृद्धौ शुश्रूषेऽहं द्विजोत्तम ।
सत्यं वदे नाभ्यसूये यथाशक्ति ददामि च ॥

३१. देवतातिथिभृत्यानामवशिष्टेन वर्तये ।
न कुत्सयाम्यहं किञ्चिन्न गर्हे बलवत्तरम् ॥

३२. परेण हि हतान्ब्रह्मन्वराहमहिषानहम् ।
न स्वयं हन्मि विप्रर्षे विक्रीणामि सदा त्वहम् ॥

३३. न भक्षयामि मांसानि ऋतुगामी तथा ह्यहम् ।
सदोपवासी च तथा नक्तभोजी तथा द्विज ॥

३४. ये चैव मां प्रशंसन्ति ये च निन्दन्ति मानवाः ।
सर्वान्सुपरिणीतेन कर्मणा तोषयाम्यहम् ॥

३५. शक्त्यान्नदानं सततं तितिक्षा धर्मनित्यता ।
यथार्हं प्रतिपूजा च सर्वभूतेषु वै दया ॥

३६. त्यागान्नान्यत्र मर्त्यानां गुणास्तिष्ठन्ति पूरुषे ।
मृषावादं परिहरेत्कुर्यात्प्रियमयाचितः ॥

३७. न च कामान्न संरम्भान्न द्वेषाद्धर्ममुत्सृजेत् ।
प्रिये नातिभृशं हृष्येदप्रिये न च संज्वरेत् ॥

३८. न मुह्येदर्थकृच्छ्रेषु न च धर्मं परित्यजेत् ।
कर्म चेत्किंचिदन्यत्स्यादितरन्न समाचरेत् ॥

३९. यत्कल्याणमभिध्यायेत्तत्रात्मानं नियोजयेत् ।
न पापं प्रति पापः स्यात्साधुरेव सदा भवेत् ॥

४०. कामक्रोधौ वशे कृत्वा दम्भं लोभमनार्जवम् ।
धर्म इत्येव सन्तुष्टास्ते शिष्टाः शिष्टसंमताः ॥

SCERT TELANGANA

४१. सर्वभूतदयावन्तो अहिंसानिरतास्सदा ।
परुषं न प्रभाषन्ते सदा सन्तो द्विजप्रियाः ॥

४२. पिता माता च भगवन्नेतौ मे दैवतं परम् ।
यद्दैवतेभ्यः कर्तव्यं तदेताभ्यां करोम्यहम् ॥

४३. एतौ मे परमं ब्रह्मन् पिता माता च दैवतम् ।
यज्ञा वेदाश्च चत्वारः सर्वमेतौ मम द्विज ॥

४४. एतदर्थं मम प्राणाः भार्या पुत्राः सुहृज्जनाः ।
सपुत्रदारः शुश्रूषां नित्यमेव करोम्यहम् ॥

४५. स्वयञ्च स्नापयाम्येतौ तदा पादौ प्रधावये ।
आहारं सम्प्रयच्छामि स्वयञ्च द्विजसत्तम ॥

४६. अतन्द्रितः सदा विप्र शुश्रूषां वै करोम्यहम् ।
त्वया विनिकृता माता पिता च द्विजसत्तम ॥

४७. अनिसृष्टोऽसि निष्क्रान्तो गृहात्ताभ्यामनिन्दित ।
वेदोच्चारणकार्यार्थं गर्ह्यं तच्च त्वया कृतम् ॥

४८. तव शोकेन वृद्धौ तावन्धौ जातौ तपस्विनौ ।
तौ प्रसादयितुं गच्छ मा त्वा धर्मोऽत्यगान्महान् ॥

४९. अतन्द्रितः कुरु क्षिप्रं मातापित्रोर्हि पूजनम् ।
अतः परमहं धर्मं नान्यं पश्यामि कञ्चन ॥

५०. स तु गत्वा द्विजः सर्वां शुश्रूषां कृतवांस्तदा ।
मातापितृभ्यां वृद्धाभ्यां यथान्यायं सुसंश्रितः ॥

**विचिन्त्य वदन्तु**

* धर्मव्याधकौशिकयोः व्यवहारगतं भेदं विवृण्वन्तु।

**सारांशः**

पुरा कस्मिंश्चिदरण्ये वेदाध्यायी, तपोधनः ब्राह्मणोत्तमः धर्मशीलश्च कौशिको नाम तपस्वी आसीत्। एकदा सः वृक्षस्य मूले उपविश्य तपः कुर्वन् आसीत् । तदा वृक्षे स्थिता बलाका तस्मिन् पुरीषम् अत्यजत् । तदा क्रुद्धः सः तपस्वी तीक्ष्णदृष्ट्या तां बालाकाम् अपश्यत् । तत्प्रभावेण सा बलाका दग्धा भूमौ अपतत् । सः तपस्वी निर्जीवां तां बलाकां दृष्ट्वा रागद्वेषयोः कारणेन अहमेवम् अकार्यम् अकरवम् इति विचिन्त्य शोकसन्तप्तः अभवत् ।

शोकसन्तप्तः सः ब्राह्मणः तपस्वी भिक्षायै समीपग्रामं गत्वा तत्रैकां गृहिणीं भिक्षामयाचत । सा गृहिणी 'तिष्ठ' इत्युक्त्वा भिक्षामानेतुमन्तरगच्छत् । तावता तस्याः पतिः गृहमागच्छत् । ततः सा

SCERT TELANGANA

पतिसेवायां संलग्ना किञ्चित् विलम्बेन भिक्षामानीय क्रोधाविष्टं तपस्विनं प्रति 'क्षन्तुमर्हसि ममापराधम्'। अहं पतिसेवायां निमग्ना विलम्बं कृतवतीति उवाच । ततः बलाकादाहनेन गर्वितः सः तां गृहिणीं तीक्ष्णदृष्ट्याऽपश्यत्। तदा पतिव्रता सा '' नाहं बलाका त्वया दग्धा भवितुम् इत्यवोचत् । तेनाश्चर्यचकितः सः कथमेतत् त्वया ज्ञातमित्यपृच्छत् । तदा सा पतिव्रता, पतिसेवायाः फलेनेदं मया ज्ञातम् । क्रोधः मनुष्यशरीरेषु स्थितः शत्रुः अस्ति । भवान् इतः मिथिलानगरं गच्छतु । तत्र सत्यवादी, मातापितृसेवारतः जितेन्द्रियः कश्चन व्याधः वर्तते । सः त्वां धर्मविषयं बोधयति'' इति अकथयत् ।

कुतूहलेन प्रेरितः सः तपस्वी मिथिलानगरं गत्वा मांसविक्रयिणं व्याधमपश्यत् । तपस्विनं दृष्ट्वा स व्याधः 'महात्मन्! अभिवादये । किमर्थं भवान् अत्र प्रेषितः तया गृहिण्या इत्यहं जानामि' इत्यवोचत्।

आश्चर्यचकितः सः तपस्वी मांसविक्रयिणः भवता ज्ञानमेतत् कथं प्राप्तमित्यपृच्छत् । तदा व्याधः 'तपस्विन् ! अहं वृद्धयोः मातापित्रोः सेवाम् अतिथिपूजाञ्च कुर्वन् जीवामि । मांसविक्रयणमिदं केवलं वंशपरम्परागतत्वेनैव करोमि । तदपि केवलम् अन्यहतानामेव वराहमहिषीणां मांसविक्रयणं करोमि । अहं स्वयं न हन्मि ।

ये मां प्रशंसन्ति ये च निन्दन्ति अहं तान् सर्वानपि मम कर्मणा तोषयामि । मम शक्त्यनुसारम् अन्नदानं करोमि । सहनं वहामि । धर्मबद्धो भूत्वा सर्वभूतेषु दयया प्रवर्ते । मर्त्यानां त्यागेन विना गुणाः न भवन्ति । मनुष्यः मिथ्यावादं परिहृत्य प्रियं भाषेत । कामात्, संरम्भात्, द्वेषात्, धर्मं न त्यजेत् । प्रिये सति अधिकसन्तोषम्, अप्रिये सति क्रोधं न प्रदर्शयेत् । अर्थविषयकमोहं न प्राप्नुयात् । सर्वदा शुभमेव ध्यायेत् । अत्र आत्मनियुक्तिं कुर्यात् । कामक्रोधलोभमोहादीनां वशीकरणमेव धर्मः इति शिष्टजनाः वदन्ति । सर्वप्राणिषु दयावान् भूत्वा अहिंसापालनं कुर्यात् । सन्तः परुषतया कदापि न भाषन्ते ।

मम परमं दैवतं मातापितरावेव । देवेभ्यः कर्तव्यं कर्म पितृभ्यां करोम्यहम् । यज्ञाः वेदाः पितरावेव सन्ति । पुत्रदारैस्सह अहं नित्यं पितरौ सेवे । 'स्वयं तयोः स्नानं कारयामि' । अनलसस्सन् शुश्रूषां करोमि। अनिन्दित ! भवान् भवत्पितरौ विहाय वेदोच्चारणकार्यार्थं निरगच्छत् । भवद्विषयकशोकेन भवन्मातापितरौ अन्धौ जातौ । अतः शीघ्रं गत्वा तौ प्रसादयतु । अनलसस्सन् मातापितृपूजनं करोतु । अयमेव परमो धर्मः। नान्यत्किञ्चित् इति मम मतम् ।

तपस्वी कौशिकः व्याधमुखात् परमधर्मं ज्ञात्वा न्यायपथगामी भूत्वा स्वमातापित्रोः सर्वविधशुश्रूषामकरोत्।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. ''मातापित्रोः यथान्यायं शुश्रूषां कृतवान्'' इति विषयमधिकृत्य वदन्तु ।

२. पाठस्य नीतिः का ?

३. मातापितृभ्यां किमर्थं सेवा करणीया ?

४. 'को नाम धर्मः ?



SCERT TELANGANA

### आ) अधः दत्तान् श्लोकपादान् पाठक्रमानुसारं लिखन्तु ।

१. सपुत्रदारः शुश्रूषां नित्यमेव करोम्यहम् ।
२. बलाका हि त्वया दग्धा रोषात्तद्विदितं मम ।
३. अतन्द्रितः कुरु क्षिप्रं मातापित्रोर्हि पूजनम् ।
४. अहं व्याधस्तु भद्रं ते किं करोमि प्रशाधि माम् ।
५. यद्दैवतेभ्यः कर्तव्यं तदेताभ्यां करोम्यहम् ।
६. प्रयत्नाच्च गुरू वृद्धौ शुश्रूषेऽहं द्विजोत्तम !
७. भिक्षामादाय विप्राय निर्जगाम यशस्विनी ।
८. अकार्यं कृतवानस्मि रागद्वेषबलात्कृतः ।

### इ) अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

“सर्वभूतोपकारेण - स्वधर्माचरणेन यत् ।
कृतं यज्ञतपोदानैः - तत्फलं पितृसेवने ॥

१. अयं श्लोकः किं बोधयति ।
२. ‘सर्वभूतोपकारेण’ इत्यस्य को भावः ?
३. स्वधर्माचरणेन इत्यत्र विग्रहवाक्यं किम् ?
४. पितृसेवने इति पदस्य अर्थः कः ?
   १. पितुः सेवने   २. मातुः सेवने   ३. मातापित्रोः सेवने ।

### ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. व्यासस्य पितरौ कौ ? व्यासेन विरचितमहाभारतप्रशस्तिः का ?
२. कौशिकः बलाकां किमर्थं दग्धामकरोत् ?
३. व्याधस्य पितृसेवां विशदयन्तु ।
४. कौशिकधर्मव्याधयोः मध्ये प्रवृत्तं सम्भाषणं लिखन्तु ।

## II. भावव्याक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. गृहिण्या व्याधेन च दिव्यदृष्टिः कथं प्राप्ता ?
२. कौशिकः गृहिणीव्याधाभ्यां किमजानात् ?
३. “यः क्रोधमोहौ त्यजति तं देवा ब्राह्मणं विदुः” अस्य भावः कः ?
५. “कोपो पापस्य कारणम्” किमर्थम् ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।
२. भवतां दृष्टौ उत्कृष्टः धर्मः कः? किमर्थञ्च ?


SCERT TELANGANA

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. पाठ्यांशं संभाषणरूपेण लिखन्तु ।

२. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

పూర్వం శ్రవణకుమారుడనే పేరుగల బాలుడు తల్లిదండ్రులను మిక్కిలి భక్తితో ప్రేమగా సేవించేవాడు, అతను ప్రొద్దునే లేచి గుడ్డివారైన తల్లిదండ్రులకు నమస్కారం చేసి వివిధసేవలు చేసేవాడు. భిక్షాటనం ద్వారా వారిని రక్షిస్తూ తాను చదువుకుంటూ ఉండేవాడు. విద్యాభ్యాసం పూర్తి అయిన తర్వాత సంపాదన కొరకు వేరే నగరానికి వెళ్తున్న సమయంలో తల్లిదండ్రులను కావడిలో కూర్చోబెట్టి మోస్తూ తీసుకెళ్ళేవాడు.

## III. भाषांशाः

### १.पदजालाभिवृद्धिः

अ) **अधः दत्तानां पदानां विरुद्धार्थकपदानि पाठात् चित्वा तान्युपयुज्य वाक्यानि रचयन्तु।**

अन्यं, तन्द्रितः, कार्यम्, असत्यम्, अधर्मः

आ) **अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां पर्यायपदानि लिखन्तु ।**

१. भद्रं कर्णेभिः शृणुयाम देवाः ।

२. जन्तुषु कारुण्यं प्रदर्शनीयम् ।

३. आदिकविः वाल्मीकिः तपश्चरणात्पूर्वं व्याध एव ।

४. तितिक्षा हि सर्वजयप्रदायिनी ।

५. क्षिप्रम् उत्थाय कर्तव्यं प्रत्यहं मातृवन्दनम् ।

### २. व्याकरणांशाः

अ) **अधः दत्तानि सन्धिपदानि विच्छिद्य सन्धिनामानि निर्दिशन्तु ।**

| | | | |
|---|---|---|---|
| १. विप्रर्षिः | २. सुहृज्जनाः | ३. करोम्यहम् | ४. तावन्धौ |
| ५. वेदाध्यायी | ६. साधुरेव | ७. सुखोपविष्टः | ८. एतद्वै |

आ) **अधः दत्तानां समस्तपदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।**

| | | | |
|---|---|---|---|
| १. शुभेक्षणा | २. सम्भ्रमोत्थितः | ३. कामक्रोधौ | ४. अतन्द्रितः |
| ५. वेदाध्यायी | ६. धर्मशीलः | ७. तपोधनः | ९. पतिशुश्रूषाम् |



SCERT TELANGANA

* **अधः लिखिते अनुच्छेदे दत्तानि रेखाङ्कितपदानि अवगच्छन्तु ।**

रामः उपकृष्णम् अगच्छत् । सः कृष्णम् यथाशक्ति धनसाहाय्यं कुर्विति अवदत् । तदा अहं कृष्णः निर्धनः इत्यवदत् । मित्राय अधिग्रामम् अभ्रमच्च । तौ अन्ततो गत्वा उपशिवम् सुधनम् अस्तीति ज्ञातवन्तौ । ततः परं धनमपि प्रापतुः ।

- **उपर्युक्तगद्यांशे रेखाङ्कितानां समस्तपदानां विग्रहवाक्यानि एवं विद्यन्ते ।**

| क्र.सं. | समस्तपदानि | विग्रहवाक्यानि |
|---|---|---|
| १. | उपकृष्णम् | कृष्णस्य समीपम् |
| २. | यथाशक्ति | शक्तिमनतिक्रम्य |
| ३. | अधिग्रामम् | ग्रामे इति |
| ४. | सुधनम् | धनस्य समृद्धिः |

**उदा - 'उपकृष्णम्' इति समासपदम् ।**

- अस्य पदस्य विग्रहवाक्यं ''कृष्णस्य समीपम्'' इति भवति ।
- अस्मिन् समासपदे पूर्वपदस्य 'उप' इत्यस्यैव अव्ययस्य प्राधान्यं वर्तते । उप नाम समीपम् इत्यर्थः ।
- यस्मिन् पूर्वपदार्थः प्रधानो भवति सः अव्ययीभावो भवति ।

अतः एषः **अव्ययीभावसमासः ।**

**इ) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।**

१. यथाक्रमम् २. आहिमालयम् ३. उपग्रामम् ४. सुवनम्
५. निर्वृक्षम् ६. यथार्हम् ७. यथान्याय्यम्

**ई) अधः दत्तानां विग्रहवाक्यानां समस्तपदानि लिखन्तु ।**

१. वस्तूनाम् अभावः -
२. शालायाः समीपम् -
३. कृष्णे इति -
४. जलस्य समृद्धिः -
५. बलम् अनतिक्रम्य -
६. कामम् अनतिक्रम्य -



SCERT TELANGANA

* **अधः दत्तं वाक्यं पठन्तु, अलङ्कारम् अवगच्छन्तु ।**

'मेधां बुधः सुधामिन्दुः बिभर्ति वसुधां भवान्' ।

अर्थः - बुधः (पण्डितः) ज्ञानं धरति । चन्द्रः अमृतं धरति ।

राजा भूमिं बिभर्ति पालयतीत्यर्थः ।

बुधः (पण्डितः) ——— मेधां (ज्ञानम्)
इन्दुः (चन्द्रः) ——— सुधाम् (अमृतम्) ——— बिभर्ति (धरति)
भवान् (राजा) ——— वसुधाम् (भूमिम्)

पण्डितादयः ज्ञानादिकमिव राजा भूमिं बिभर्तीति भावः ।

**विवरणम्** - यत्र द्वयोः प्रस्तुताप्रस्तुतविषययोः गुणाः क्रियया समानतां प्राप्नुवन्ति तत्र **दीपकालङ्कारो** भवति ।

| लक्षणम् - प्रस्तुताप्रस्तुतानाञ्च तुल्यत्वे दीपकं मतम् । |
|---|

उ) **अधः दत्तस्य वाक्यस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।**

**तापेन भ्राजते सूर्यः शूरश्चापेन राजते ।**

१. कः भ्राजते ?

२. केन सूर्यः भ्राजते ?

३. कः राजते ?

४. चापेन कः राजते ?

ऊ) **अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

''दीप्त्या निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा''

**परियोजनाकार्यम्**

भवतां ग्रामे स्थितं वृद्धाश्रमम् / अनाथाश्रमं वा गत्वा ते किमर्थं तत्र सन्तीति सविवरणं विलिख्य कक्ष्यायां प्रदर्शयन्तु ।

**धर्मेण हीनाः पशुभिः समानाः ।**

SCERT TELANGANA

द्वितीयः भागः

# ५. द्रौपदीपरिदेवना

**पठन्तु, विचिन्त्य वदन्तु**

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।

**प्रश्नाः**

१. कुत्र क्रियाः अफलाः भवन्ति ?
२. अयं श्लोकः काः उद्दिश्य बोधयति ?
३. अपमानितस्त्रियः प्रतिक्रिया कथं भवति ?

**उद्देश्यम्**

* स्त्रीवैदुष्यस्य ज्ञापनम् ।
* काव्यरसास्वादनक्षमतायाः अभिवर्धनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

भारविः संस्कृतप्रौढकविषु अन्यतमः । एषः महाकविः किरातार्जुनीयमिति काव्यं रचितवान् । असौ षष्ठशताब्दीयः इति विमर्शकाः वदन्ति । भारविः अल्पैः पदैः अनल्पमर्थम् अत्यन्तमनोहरतया वर्णयति । अत एव 'भारवेरर्थगौरवम्' इति आर्योक्तिः प्रसिद्धा । भारविः आन्ध्रदेशीयः इति केषाञ्चन विमर्शकाणां मतम् ।

प्रस्तुतपाठ्यभागः किरातार्जुनीये प्रथमसर्गात् गृहीतः ।

## प्रवेशिका

द्वैतवने वनवासं कुर्वता युधिष्ठिरेण दुर्योधनराज्यपरिपालनरीतिं ज्ञातुं प्रेषितः वनेचरः तद्वृत्तान्तं युधिष्ठिराय निवेदयति । ततः द्रौपदी शत्रूणां दुर्योधनादीनाम् अभिवृद्धिं ज्ञात्वा स्वभावोद्वेगं सोढुमशक्ता शत्रून् जेतुं युधिष्ठिरे क्रोधं प्रतीकारभावनां जनयितुं अनेकानि परुषवाक्यानि वदति । तस्याः वचसां सारः एव एतत्पाठ्यांशः ।

१. इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ॥

* २. निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥

३. भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥

४. अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयाऽत्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥

* ५. व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥

### विचिन्त्य वदन्तु

* 'मत्तगजः पुष्पमालामिव धर्मराजः स्वराज्यं परित्यक्तवान्' इति श्लोके अस्ति । तत्कथमिति विश्लेषणं कुर्वन्तु ।

SCERT TELANGANA



* ६. गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ।।

७. भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेववर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ।।

८. अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ।।

९. परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ।।

१०. विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाऽहरन् करोति मन्युं न कथं धनञ्जयः ।।



SCERT TELANGANA

* ११. वनान्तशय्या कठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥

* १२. इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥

१३. पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥

१४. पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥

१५. अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरः स्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥

* १६. द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदं
पराभवोऽप्युत्सव एव मानिनाम् ॥

* १७. विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहा
शमेन सिद्धिं मुनयो न भूभृतः ॥

* १८. पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ॥

१९. अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥

* २०. न समयपरिरक्षणं क्षमं ते निष्कृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ॥

* २१. विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥

### विचिन्त्य वदन्तु

* धर्मराजः धीरनिन्दितमार्गे गच्छन् आसीत् इत्येतत् सत्यं वा ? विचिन्त्य वदन्तु ।

**भावाः -**

१. वनेचरः युधिष्ठिरं दुर्योधनस्य परिपालनमधिकृत्य उक्त्वा तेन सम्मानितः, ततो निर्गतवान् । ततः धर्मराजः द्रौपद्याः निलयं प्रविश्य वनेचरस्य वचनानि भीमादीन् अनुजान् उद्दिश्य उक्तवान् ।

२. ततः द्रौपदी शत्रूणां दुर्योधनादीनाम् अभिवृद्धिं श्रुत्वा तत्कृतान् अपकारान् सोढुमशक्ता सती (भूत्वा) युधिष्ठिरे क्रोधं प्रतीकारोद्योगं उद्दीपयितुं च एवं जगाद ।

३. हे राजन् ! भवादृशानां पण्डितानां पुरतः स्त्रीजनेन मया उक्तानि नियोगवचनानि अधिक्षेपरूपाणि भवन्तीति जानामि । तथापि स्त्रीजनोचिताशालीनता नाशका मम मनोव्यथा च मामेवं वक्तुं प्रेरयन्ति ।

४. हे राजन् ! इन्द्रसमानपराक्रमवद्भिः अस्माकं वंशजैः भरतादिभिः अखण्डतया भूमिरियं परिपालित। तादृशीं भूमिमिमां भवान् आत्महस्तेन (स्वदोषेण) मत्तगजः पुष्पमालामिव परित्यक्तवान् ।

५. हे राजन् ! ये कपटिनां विषये कापट्यं न प्रदर्शयन्ति तादृशानां मूर्खाणां पराजयः भवत्येव । यतः दुष्टाः जनाः सज्जनान् कवचरहितान् निशिताः बाणाः इव नाशयन्ति ।

६. सौन्दर्यादिगुणशालिनीम् अनुरागिणीं मनोरमां कुलीनाम् आत्मवधूं पत्नीमिव अनुकूलसहायजनविराजितः कुलाभिमानी जनः (राजा) कोऽपि त्वदन्यः, राज्यलक्ष्मीं परैर्नापहारयति (त्वमेव एतादृशम् अनपेक्षणीयं कार्यं कृतवान् ।)

७. आपत्समयेऽपि धीरनिन्दिते मार्गे गच्छन्तं भवन्तं शुष्कशमीतरुं तदुत्पन्न उग्रः वह्निरिव शत्रुकृत अपकारप्रयुक्तः क्रोधः भवन्तं किमर्थं न ज्वलयति । (अवश्यं क्रोधः प्रकटयितव्य इति भावः ।)

८. हे राजन् ! निग्रहानुग्रहसमर्थस्य सर्वे वशवर्तिनः भवन्ति । अतः भवतः कोपः अपि युक्तः । तथाहि आवश्यकतामनुसृत्य क्रोधम् अप्रकटयता जनेन (राज्ञा) जनस्य (शत्रोः) 'दरः' भयं न भवति राज्ञि आदरोऽपि न भवति । एवं रिपौ अनावश्यकप्रेमप्रकटनेनापि प्रयोजनं नास्ति । तथा सति रिपुः राजानं नाद्रियते, नापि भीतो भवति । यो जनः कोपरहितः सन् शत्रुं न भाययति तस्मै प्रेम्णा यो न ददाति तं च लोको न पूजयति ।

९. हे राजन् ! सर्वदा चन्दनगन्धादिभिः अलङ्कृतः सन् रथेन सञ्चरन् महारथी भीमः, अधुना धूलियुक्तशरीरः पादचारी सन् अटति । तादृशम् अनुजं दृष्ट्वाऽपि भवतः मनसि शोको न जायते ?

१०. हे राजन् ! देवेन्द्रसमानपराक्रमवान् अर्जुनः उत्तरदेशान् जित्वा सुवर्णम्, रत्नराशीन् धनानि च भवते समर्पितवान् खलु ! तादृशः अर्जुनः अधुना वल्कलानि धृतवान् । एतादृशीं दुरवस्थां दृष्ट्वापि भवति कोपो न जायते ?

११. हे राजन् ! निरन्तरं भूम्यां शयनेन कठिनीकृतशरीरौ वनगजौ इव विद्यमानौ नकुलसहदेवौ दृष्ट्वा भवतः धैर्यं सन्तोषश्च न नश्यतः वा ? बाधा न भवति वा ?

१२. हे राजन् ! एतादृश्यां दुरवस्थायां भवतः बुद्धिः कीदृशीति मे नावगता भवति । सर्वस्मिन्नपि चित्तवृत्तयः अनेकविधाः भवन्तीति वदन्ति । भवतः एतादृशीं महतीमापदं दृष्ट्वा मम मनः अत्यन्तं मानसीं व्यथामनुभवति ।

१३. हे राजन् ! अत्यन्तमूल्यवत्यां शय्यायां शयित्वा प्रातः वन्दिमागधानां स्तुतिगीतिकाभिः प्रबोध्यमानः भवान्, अधुना अस्मिन्नरण्ये अमङ्गलकरैः शृगालानां रावैः प्रबोध्यते ।

१४. हे राजन् ! भवतः इदं शरीरं पूर्वं ब्राह्मणभोजनानन्तरम् अवशिष्टेन पवित्रान्नेन रमणीयम् आसीत् । तादृशं भवतः शरीरम् अरण्यस्थानां फलानां खादनेन, भवतः कीर्त्या सह कृशं भवति ।

१५. हे राजन् ! सदा मणिपीठे राजमाणौ भवतः पादौ नमस्कुर्वतां राज्ञां शिरस्सु विद्यमानैः पुष्पमालिकारजोभिः अलङ्कृतौ भवतः स्म । तादृशौ भवतः पादौ इदानीं यत्र मृगाः ब्राह्मणाः च स्वोपयोगाय दर्भान् कर्तयन्ति तत्र छिन्नदर्भाग्रकठोरे देशे सञ्चारं कुरुतः ।

१६. हे राजन् ! दैवकृतान् पराभवान् अनेकानपि उत्सवानिव अनुभोक्तुं शक्नुमः। किन्तु शत्रुकृतान् पराभवान् तु सोढुं न शक्नुमः । एषा दुर्दशा मम मनः नितरां खेदयति ।

१७. हे राजन् ! भवान् शान्तिं विहाय शत्रूणां विनाशाय च सिद्धो भवतु । विरक्ताः मुनिजनाः अन्तर्गतान् शत्रून् जित्वा सिद्धिं प्राप्नुवन्ति । किन्तु क्षत्रियाः पराक्रमैः शत्रून् हत्वा सिद्धिं प्राप्नुवन्ति ।

१८. हे राजन् ! तेजस्विनाम् अग्रगण्यः, यशोधनः भवान् एतादृशं दुस्सहं पराभवम् अनुभवन्नपि उदासीनतया जीवति इति दुःखकरोऽयं विषयः यतः अनेन अभिमानिता एव निराश्रया भवति । अभिमानिता निराश्रया सती हता भवति । अतः पराक्रम एव प्रदर्शनीयः ।

१९. हे राजन् ! भवान् पराक्रमं विहाय बहुकालं यावत् क्षमाम् एव सुखसाधनम् इति चिन्तयति चेत्, राज्यलक्ष्मीपतेः राजचिह्नरूपमिदं धनुः विहाय जटाधारी भूत्वा अस्मिन्नरण्ये अग्निहोत्रं कुर्वन् जीवतु ।

२०. हे राजन् ! अपकारिषु मायाविषु शत्रुषु क्षमा न कार्या । अयं निर्दिष्टवनवासादिनियमोऽपि व्यर्थ एव । विजयार्थी राजा सन्धिम् अपि तिरस्करोति । युद्धाय एव सिद्धो भवति ।

२१. हे राजन् ! विधिः कालः च दुरतिक्रमौ । तत्कारणतः आपत्समुद्रे निमग्नः भवान् तेजोराशिं विहाय अस्तङ्गच्छन् सूर्य इव आभाति । अन्धकारं दूरीकृत्य अचिरेणैव पुनरुदीयमानं सूर्यकान्तिरिव लक्ष्मीः त्वां वृणोतु ।



SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. पाठे विद्यमानानि महाकविना भारविना उक्तानि अर्थगाम्भीर्ययुक्तानि त्रिचतुराणि वाक्यानि वदन्तु ।

२. ''निस्पृहाः मुनयः अन्तर्गतशत्रून् अवधूय शमेन सिद्धिं व्रजन्ति न भूभृतः'' इति पाठे अस्ति खलु ! अस्माकं अन्तर्गतशत्रवः के ते कथं अस्मान् नाशयन्ति ?

३. 'अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः' इति द्रौपद्याः वचनं भवन्तः कथं समर्थयन्ति।

**आ) अधः दत्तानि वाक्यानि पठित्वा तेषां समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।**

१. अभिमानिता निराश्रया सती हता भवति ।

२. मत्तगजः पुष्पमालामिव राज्यं परित्यक्तवान् ।

३. निरन्तरं भूशयनेन कठिनीकृतशरीरौ ।

४. अमङ्गलकरैः शृगालानां रवैः प्रबोध्यते ।

**इ) श्लोकं पठित्वा अधो दत्तप्रश्नानां समाधानानि लिखन्तु ।**

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।

१. घटः कथं पूर्यते ?

२. सर्वविद्याः कथं प्राप्तुं शक्यन्ते ?

३. धर्मः कथमाचरणीयः ?

४. धनं कथमार्जनीयम् ?

**ई) पाठं पठित्वा रिक्तस्थानानि पूरयन्तु ।**

१. तदाचचक्षे ------------------------ वचः ।

२. निरस्तनारीसमयाः --------------------- ।

३. मनोरमाम् ---------------------- श्रियम् ।

४. -------------------- खलु चित्तवृत्तयः ।

५. शमेन --------------- मुनयः न ------------ ।

**उ) अधः दत्तस्य श्लोकस्य प्रतिपदार्थतात्पर्यविवरणम् अवगच्छन्तु ।**

**अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।**
**त्वयाऽत्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ।।**

**पदच्छेदः -** अखण्डम्, आखण्डलतुल्यधामभिः, चिरं, धृता, भूपतिभिः, स्ववंशजैः, त्वया, आत्महस्तेन, मही, मदच्युता, मतङ्गजेन, स्रक्, इव, अपवर्जिता ।

**अन्वयः -** आखण्डलतुल्यधामभिः स्ववंशजैः, भूपतिभिः, चिरम्, अखण्डं, धृता, मही, मदच्युता, मतङ्गजेन, स्रक्, इव, त्वया, आत्महस्तेन, अपवर्जिता ।

**प्रतिपदार्थः -**

| | | |
|---|---|---|
| आखण्डलतुल्यधामभिः | = | इन्द्रतुल्यप्रभावैः |
| स्ववंशजैः | = | स्वकुलोत्पन्नैः |
| भूपतिभिः | = | भरतादिभिः राजभिः |
| चिरम् | = | बहोः कालात् |
| अखण्डम् | = | अविच्छिन्नम् |
| धृता | = | पालिता, धारणं कुर्वता |
| मही | = | भूमिः |
| मदच्युता | = | मदस्राविणा |
| मतङ्गजेन | = | गजेन |
| स्रगिव | = | पुष्पमालेव |
| त्वया | = | भवता |
| आत्महस्तेन | = | स्वकरेण, स्वचापल्येन |
| अपवर्जिता | = | त्यक्ता, स्वदोषादेवायम् अनर्थागमः । |

**तात्पर्यम् -** हे राजन् ! इन्द्रसमानपराक्रमवद्भिः अस्मद्वंशजैः भरतादिभिः अखण्डतया भूमिरियं परिपालिता। तादृशीं भूमिमिमां भवान् आत्महस्तेन (स्वदोषेण) मत्तगजः पुष्पमालामिव परित्यक्तवान् ।

**ऊ) अधः दत्तं श्लोकं पठित्वा प्रतिपदार्थं तात्पर्यञ्च लिखन्तु ।**

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहा
शमेन सिद्धिं मुनयो न भूभृतः ॥

**ऋ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. युधिष्ठिरः राज्यं कथं परित्यक्तवान् ?

२. केषां पराजयः भवति ?

३. जनाः कीदृशस्य जनस्य वश्याः भवन्ति ? कथम् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु ।

१. द्रौपदी किमर्थं दुःखिता अभूत् ?

२. मानिनाम् पराभवः उत्सवः कथं भवति ? किमर्थं द्रौपदी एवमुक्तवती ?

३. ''व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः'' इति वाक्यं भवन्तः कथं समर्थयन्ति ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. द्रौपद्याः परिदेवनां स्वीयवाक्यैः लिखन्तु ।

२. पाण्डवानां पूर्ववैभवं वर्णयन्तु ।

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. द्रौपद्याः पात्रम् एकपात्राभिनयरूपेण अभिनीयताम् ।

२. अधः दत्तं पद्यं पठित्वा समानार्थकम् संस्कृतश्लोकं लिखन्तु ।

విద్య నిగూఢ గుప్తమగు విత్తము రూపము పూరుషాళికిన్
విద్య యశస్సు, భోగకరి, విద్య గురుండు, విదేశబంధుడున్
విద్య విశిష్టదైవతము విద్యకు సాటి ధనంబు లేదిలన్
విద్య నృపాలపూజితము విద్య నెఱుంగనివాడు మర్త్యుడే !

## १. पदजालाभिवृद्धिः

### अ) रेखाङ्कितपदानां समानार्थकपदानि मञ्जूषातः चित्वा तान्युपयुज्य स्वीयवाक्यानि रचयन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| रिपुः | दन्ती | गात्रम् | वर्ष्म | द्विट् | कुञ्जरः |

१. <u>शरीरम्</u> आद्यं खलु धर्मसाधनम्

२. ऐरावतो नाम <u>नागः</u> इन्द्रस्य वाहनम् ।

३. रामस्य <u>वैरी</u> रावणः ।

### आ) अधः पदानि, तेषां नानार्थाश्च दत्ताः । तान्युपयुज्य वाक्यानि रचयन्तु ।

१. वंशः - वेणुः, कुटुम्बः

२. सन्निधिः - समीपं, सन्निवेशः

३. लक्ष्मीः - सम्पद्, विष्णुपत्नी, शोभा

SCERT TELANGANA

## २. व्याकरणांशाः

**अ) अधः दत्तानां विग्रहवाक्यानां समासपदानि पाठात् चित्वा लिखन्तु । समासनामान्यपि निर्दिशन्तु ।**

| | विग्रहवाक्यानि | समस्तपदम् | समासनाम |
|---|---|---|---|
| उदा - | कृष्णायाः सदनम् | कृष्णासदनम् | षष्ठीतत्पुरुषः |
| | १. मूढा धीः येषां ते | | |
| | २. न संवृतानि | | |
| | ३. न वन्ध्यः | | |
| | ४. द्रुपदस्य आत्मजा | | |
| | ५. आत्ता सत्क्रिया येन सः | | |

**आ) अधः दत्तानि सन्धिसम्बद्धपदानि (प्रत्येकं सन्धेः चत्वारि) पाठात् चित्वा लिखन्तु ।**

१. सवर्णदीर्घसन्धिः                २. विसर्गसन्धिः (सत्वं)

*** अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च अवगच्छन्तु ।**

| | | | |
|---|---|---|---|
| । U । | U U । | । U । | U । U |
| इ ती र | यि त्वा गि | र मा त्त | स त्क्रि ये |
| ज | त | ज | र |

- उपरितने श्लोकपादे क्रमेण ज - त - ज - र इति एते गणाः भवन्ति ।
- यत्र एते गणाः भवन्ति तत्र ''वंशस्थं'' छन्दः भवति ।

**वंशस्थच्छन्दोलक्षणानि -**

१. श्लोके पादचतुष्टयं भवति ।
२. क्रमशः ज - त - ज - र इति गणाः भवन्ति ।
३. प्रतिपादम् द्वादशाक्षराणि भवन्ति ।
४. पादान्ते यतिः

लक्षणम् - जतौ तु वंशस्थमुदीरितं जरौ

**इ) ''इतीरयित्वा...'' इति श्लोकस्य द्वितीय-तृतीय-चतुर्थपादानां गणविभजनं कृत्वा गणान् निर्दिशन्तु ।**

*** अस्मिन् पाठे विद्यमानानां श्लोकानां छन्दः किमिति परिशीलयन्तु ।**

**परियोजनाकार्यम्**

एतादृशीं स्त्रीपरिदेवनारूपाम् एकां कथां स्वीयवाक्यैः लिखित्वा कक्ष्यायां प्रदर्शयन्तु ।

SCERT TELANGANA

द्वितीयः भागः

# ६. मन्दाकिनी

**पठन्तु, विचिन्त्य वदन्तु**

गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति !
नर्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन् सन्निधिं कुरु ॥

**प्रश्नाः**

१. अस्मिन् श्लोके उक्तानां नदीनां नामानि वदन्तु ।
२. एतासु नदीसु दीर्घनदी का ?
३. गङ्गानद्याः महत्त्वं किम् ?

**उद्देश्यम्**

* मन्दाकिन्याः प्राकृतिकरमणीयकतायाः अवगमनम् ।
* गीतगानेन रसानुभूतिसम्पादनम् ।
* छात्रेषु सर्जनात्मकताशक्तेः, भाषाभिरुचेः, प्रकृतिवैशिष्ट्यस्य परिज्ञानं विकासश्च ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

'सरस्वतीसुतोत्तंस' इति विख्यातो महाकविः श्रीभाष्यं विजयसारथिः, शताधिकपद्यकाव्यनिर्माता । स्वजन्मना करीनगरमण्डलमलङ्करोति । मातापितरौ गोपमाम्बा - नरसिंहाचार्यौ । सुगमसङ्गीतपद्धतिम् अवलम्ब्य प्रादेशिकानां प्राकृतकाव्यानामिव संस्कृतकाव्यानाम् उद्गानं भवतु इत्याशयेन 'मन्दाकिनीम्' एषः कवितल्लजः प्रणिनाय । पञ्चमात्रकैः गीतैः निबद्धेऽस्मिन् काव्ये प्रवाहस्य गतेर्ध्वनेश्च वैविध्यं वैदग्ध्यं चाभिव्यञ्जयितुं प्रायो गमनार्थकाः ध्वन्यर्थकाश्च धातवः प्रयुक्ताः । नियतं सर्वाण्यपि गीतानि रचनासौन्दर्येण जीवन्ति ।

## प्रवेशिका

भगीरथः स्वपूर्वजान् पुण्यलोकान् प्रापयितुं महता परिश्रमेण देवनदीं गङ्गां स्वर्लोकात् भुवमानयत् । सा च गङ्गानदी आदौ शिवजटाजूटे पतित्वा, ततः हिमालयं प्राप्य, हिमालयपर्वतात् भूमिं लघुधारारूपेण प्रविश्य अभङ्गतरङ्गैः वेगेन धावन्ती, नृत्यन्ती, लुठन्ती प्रवहन्ती अन्ते समुद्रमाप । तादृशं मन्दाकिनीगमनविन्यासं पठित्वा अवगच्छन्तु, नन्दन्तु ।

१. अकति मन्दाकिनी
चकति मन्दाकिनी
तकति मन्दाकिनी
मधुरेण पूरेण ॥

२. चलति मन्दाकिनी
जलति मन्दाकिनी
सलति मन्दाकिनी
विमलेन सलिलेन ॥

३. सा परेवायाति
सूक्ष्मेव साऽयाति
स्थूलेन साऽयाति
नादकूलङ्कषा ॥

४. घोषरावस्वनध्वनिशब्दविस्फोट -
झंकृतिध्वंकृतिव्यक्तनादाञ्चिता
सा परा वागिव व्यक्तक्रमोदया
परिवहप्राङ्गणादवतरति सुरनदी

SCERT TELANGANA



५. स्यन्दते स्पन्दते स्कुन्दते स्वर्णदी
परिवहस्यावधौ प्रेयसा स्रोतसा
सूदते मोदते ह्लादते स्वर्णदी
परिवहस्याजिरे श्रेयसा पाथसा

६. योतते जोतते श्रन्थते स्वर्णदी
परिवहस्याङ्गणे भूरिणा वारिणा
अंहते महंते बहंते स्वर्णदी
परिवहप्राङ्गणे धीरया धारया ॥
॥ अकति मन्दाकिनी ॥

७. विलयानलाभीलफालानलज्वाल -
मालिकाकृततापपरिवारणायेव
कालोरगावलीफूत्कारविस्फार -
विषवह्निकृततापपरिवारणायेव
अतिघोरकन्धराकालकूटज्वलन -
कल्पितान्तर्दाहपरिवारणायेव
दुर्वारदुस्सहप्रोद्यत्तपोवह्नि -
सञ्जातसंतापपरिवारणायेव
निजशिरस्येव बन्दीकर्तुमिच्छन्त -
ममृतापगां सदा स्वामनललोचनम्
प्रज्ञया परिभूय मन्दाकिनी
अवतरति गिरिशिरसि मन्दाकिनी ॥

८. निर्भिद्य शिवजटाजूटबन्दीगृहं
निर्गम्य नीहारगिरितुंगशृंगतो
निष्पत्य भूतले निर्घृष्य दिक्कुलं
निष्पूर्य मरुतलं निर्मूल्य मालानि
निस्सरन्नीरेण निर्यत्प्रचारेण
निरवद्यक्षारेण निर्मलाकारेण
नीरन्ध्रधारेण निर्गतासारेण
निर्मृष्टतीरेण निर्णिद्रपूरेण
वेगेन दोद्रीति मन्दाकिनी
वाजेन सोस्रीति मन्दाकिनी ॥

**विचिन्त्य वदन्तु**

* मन्दाकिनीनदीं कविः अद्भुतरूपेण उपावर्णयत् खलु ! ईदृशीनां नदीनां कालुष्यनिवारणार्थम् अस्माभिः किं करणीयम् इति सूचयन्तु ।

SCERT TELANGANA

९. आनन्दिनी मन्दनिष्यन्दिनी बिन्दु -
सम्मन्दिनी सिन्धुसम्बन्धिनी पाप -
निर्बन्धिनी गगनराण्णन्दिनी वन्दि -
बृन्दारकानन्दिनी
गोविन्दपदवन्दिनी
शिवजटाजूटाटवीबन्धिनी
मन्देतरं जवति मन्दाकिनी
मन्देतरं द्रवति मन्दाकिनी ॥

**विचिन्त्य वदन्तु**

* पूर्णजलरूपेण प्रवहन्तीः नदीः दृष्ट्वा जनाः कीदृशम् आनन्दमनुभवन्तीति वदन्तु । तथैव भवत्सु एकैकः कथमानन्द-मनुभवतीति च सूचयन्तु ।

१०. बालकाः खेलन्ति बालिकाः केलन्ति
विलसन्ति यूनोऽपि युवतयो नृत्यन्ति
हृष्यन्ति कर्मठा जठराश्च तुष्यन्ति
सह्यन्ति मानिनो मौनिनस्सुह्यन्ति
चन्दन्ति कार्मिकाः कर्षका नन्दन्ति
तूषन्ति पामराः पण्डिताः पूषन्ति
आबालगोपालमारादिवालोक्य
क्षुत्पिपासाकुला मनुजा मुदं यन्ति
संप्लुष्यदंहांसि संपुष्टरंहांसि
संपूतपाथांसि स्वर्णदीस्रोतांसि ॥
अमृतं प्रदादाय कल्लोलपाणिभी -
रञ्जयन्ती याति मन्दाकिनी ॥

॥ अकति मन्दाकिनी ॥

## सारांशः

१. प्रथमं शिवशिरसि किञ्चित् कुटिलया गत्या सलज्जम् अवतरति । शिवशिरः पतनगौरवेण चकति (तृप्तिं प्राप्नोति), किञ्चिद्विहस्य हृदयरञ्जनेन वारिप्रवाहेण जटासु इतस्ततः चलति ।

२. कपर्दस्य मध्ये सप्रेमताडनं करोति । जटायां स्वयं परितः गच्छति च । विमलं यथा तथा प्रवहति ।

३. सा मन्दाकिनी उत्कृष्टनादमयीव सूक्ष्मा इव महास्थूला इव च आयाति ।

४. अत्र नादस्य भेदान् घोष-राव-स्वन-ध्वनि-विस्फोट-झंकृति-ध्वंकृति-व्यक्तत्वेन विवृण्वती मन्दाकिनी स्वस्य रूपलावण्येन ''परा वागिव'' परिवहप्राङ्गणात् अवतरति ।

५. यथा शिवः स्वशिरसि तां मन्दाकिनीम् अधारयत्, तत्तादृशव्योमकेशिनः शिवस्य जटासु इयं स्वर्णदी स्यन्दते = प्रस्रवते, स्पन्दते = किञ्चित् इतस्ततः अटति, स्कुन्दते = समन्तात् प्रवणते, परिपूर्णप्रेमभरेण प्रवाहेण स्रवति ।



SCERT TELANGANA

६. शिवजटाजूटप्राङ्गणे मन्दाकिनी धीरया धारया = मन्दं मन्दं यथा तथा, भासते विभासते क्षणं शिथिलायते हठात् उधृतवेगेन बहंते = प्रवहति ।

७. प्रलयकाले उत्पन्नमहाग्निकीलाभिरिव स्वस्य फाले स्थितस्य तृतीयनेत्राग्निज्वालानां तापं परिवारयन्तीव शीकराम्बुभिः मन्दाकिनी शिवस्य शैत्योपचारं कुर्वतीव दृश्यते ।

समुद्रमथनवेलायां वासुकेः महासर्पस्य फूत्कारैः प्रबुद्धविषाग्निज्वालापरितापं निवारयन्तीव मन्दाकिनी भासते ।

दहन्तं विषं कण्ठे बध्वा तदुत्थितदाहेन क्लिष्यमाणस्य परमशिवस्य अन्तर्दाहं परिमार्ष्टुमाना इव स्थितायाः मन्दाकिन्याः बन्धनम् अवश्यं भावयतः शिवस्य जूटाभ्यः स्वप्रज्ञया बहिरागच्छन्ती मन्दाकिनी हिमाद्रौ अवतरति ।

८. शिवजटाजूटमेव कारागारं यत् तत् निर्भिद्य भित्वा, हिमाद्रिशिखरेभ्यश्च निवृत्य दिशां वलयं घृष्यमाणेव मरुभूप्रदेशान् सिञ्चन्ती, सर्वतः प्रवहन्ती वेगेन परिस्रवति मन्दाकिनी ।

९. एवं शनैः शनै निर्मलाकारेण प्रवहन्ती प्रजाभ्यः आनन्दं ददाति । बिन्दून् सिन्धुपूरणार्थं नयति। जनानां पापं क्षालयति । स्वयं गगनराण्णन्दिनी मन्दाकिनी देवानां मुदं ददाति । महाविष्णोः पादौ वन्दति । क्वचित् मन्दं क्वचिदमन्दं प्रवहति ।

१०. खेलन्ति = क्रीडन्ति, केलन्ति = सविलासं क्रीडन्ति, विलसन्ति = प्रकाशन्ते, नृत्यन्ति = नृत्यं कुर्वन्ति, कर्मठाः = स्वे स्वे कर्मणि अभिरताः मालिकाः, लेपकाः सौचिकाः इत्यादयः हृष्यन्ति = आनन्दं प्राप्नुवन्ति । जठराः =वयोवृद्धाः, तुष्यन्ति = मुदम् अनुभवन्ति । मानिनः = आत्मानुरागिणः, सहयन्ति = क्षमां प्राप्नुवन्ति, मौनिनः = मुनयः, सुह्यन्ति = क्षमां प्राप्नुवन्ति, कार्मिकाः = चित्रकाराः कुम्भकाराः लोहकारादयः, चन्दन्ति = आह्लादं प्राप्नुवन्ति, कर्षकाः = कृशीवलाः, नन्दन्ति = मोदन्ते, पामराः = ग्रामीणाः प्रजाः, तूषन्ति = आनन्दं प्राप्नुवन्ति, पण्डिताः = ज्ञानिनः, पूषन्ति = उत्कृष्टानन्दं लभन्ते, आबालगोपालम् = आपामरपण्डितलोकम्, आरात् = समीपगमनेन स्निह्यन्ति, दाहार्तिनः पिपासां बुभूक्षां च निर्वर्तयन्ति, पापानि क्षालयन्ति, पुण्यानि जलानि ददाति ।

११) सर्वविधजनेभ्यः जीवेभ्यश्च स्वतरङ्गकरैः अमृतं पीयूषं प्रदादाय (दत्वा) रञ्जयति ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. एतत् गीतं सरागं स्पष्टं च गायन्तु ।
२. गीतस्य भावं स्वीयवाक्यैः वदन्तु ।
३. गीतस्य श्रवणात् परं मन्दकिन्याः विषये भवताम् अनुभूतिं कथयन्तु ।
४. मानवेभ्यः मन्दकिनी कथमुपयुक्ता भवति ?
५. गीते भवते रोचकं चरणं किम् ? किमर्थम् ?

**आ) अधः दत्तान् चरणांशान् पाठानुसारं क्रमशः लिखन्तु ।**

१. शिवजटाजूटाटवीबन्धिनी
२. वाजेन सोस्रीति मन्दाकिनी
३. प्रज्ञया परिभूय मन्दाकिनी
४. अहंते महंते बहंते स्वर्णदी
५. सूदते मोदते ह्लादते स्वर्णदी

**इ) अधः दत्तं गीतं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

शतशतकोटिशरत्पर्यन्तं प्रवहतात् संस्कृतमन्दाकिनी ॥शत शतकोटि॥

सिन्धुसुदुद्रीसरस्वतीनां तटे ऋषीणां ध्यानपराणाम्
होमधूमपावितलोकानाम् अत्रिभृगूणां छन्दोवाणी
॥ प्रवहतात् संस्कृतमन्दाकिनी ॥

वाल्मीकिमुनिव्यासविरचिता रामकृष्णयोः पावनगाथा
अखण्डदीपो भगवद्गीता कर्मयोगसन्देशदायिनी
॥ प्रवहतात् संस्कृतमन्दाकिनी ॥

इयमस्माकं धर्मभारती, राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कृतं नैव संस्कृतिः इहपरत्वकल्याणकारिणी
॥ प्रवहतात् संस्कृतमन्दाकिनी ॥ ॥शत शतकोटि॥

१. अस्मिन् गीते संस्कृतं कथं वर्णितमस्ति ?
२. इयं संस्कृतमन्दाकिनी लोकाय कथम् उपकरोति ?
३. गीतेऽस्मिन् उक्तानि ऋषिनामानि, कवीनां नामानि, तेषां ग्रन्थनामानि च वदन्तु ।
४. अस्य गीतस्य शीर्षिकामेकां सूचयन्तु ।

SCERT TELANGANA

## ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. ''परा वागिव'' मन्दाकिनी कथं द्योतते ?

२. वेगेन मन्दाकिनी कुतः परिस्रवति ?

३. ''घोषरावस्वन .......... अवतरति सुरनदी'' इति चरणे कविः सुरनदीं कथं वर्णितवान् ?

४. बालकाः खेलन्ति इति चरणस्य भावं लिखन्तु ।

# II. भावव्यक्तीकरणम् - सर्जनात्मकता

## अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. पाठ्यांशे कविः मन्दाकिनीं विविधविशेषणैः वर्णितवान् । तेषु केषां पठनेन भवान् अनुभूतिं प्राप्तवान् ? किमर्थं च ?

२. ''मनुजाः मन्दाकिन्या मुदं यान्ति'' इति वर्णयति कविः ? किमर्थम् ?

३. मन्दाकिनी शिवजटाजूटात् कथम् निस्सरति ?

## आ) अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।

१. गीतस्य सारं स्वीयवाक्यैः लिखन्तु ।

२. ''मन्दाकिन्याः'' वैशिष्ट्यं लिखन्तु ।

## इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. अस्मिन् गीते विविधविशेषणक्रियापदैः अन्त्यप्रासयुक्तपदैश्च गङ्गानदीम् अवर्णयत् कविः । तेन अस्मासु आनन्दानुभूतिः जायते । तथैव भवन्तः अपि अत्रस्थानि क्रियापदानि उपयुज्य अन्यनदीं वर्णयन्तः लघुगीतं लिखन्तु ।

२. अधः दत्तस्य सम्भाषणस्य अनुवर्तनं कुर्वन्तु ।

अमरः - हे श्रीकान्त ! एतं विषयं जानाति वा ! गङ्गानदी हिमालयतः प्रवहति ।

श्रीकान्तः - जानामि भोः । परन्तु, सा नदी शिवस्य जटाजूटतः निस्सरन्ती हिमालयम् आगतवती ।

अमरः - ..............................................

श्रीकान्तः - ..............................................

..............................................

..............................................

SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

**अ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।**

१. यात्रिकः लोकयानात् अकति ।
२. रोदसीयात्रिकः अन्तरिक्षात् भुवम् अकति ।
३. बुभुक्षितः फलखादनेन चकति ।
४. जठराः स्वपौत्रादीन् लालयन्ति ।
५. जनाः सुन्दरवनदर्शनेन चन्दन्ति ।

**आ. अधः दत्तानां रेखाङ्कितपदानां समानार्थकपदानि मञ्जूषातः चित्वा तान्युपयुज्य वाक्यानि रचयन्तु ।**

| सुरनदी | पीयूषम् | प्रवहति | जलेन |
|---|---|---|---|

१. वारिणा घटः पूर्णः अस्ति ।
२. देवाः अमृतं विन्दन्ति ।
३. मन्देतरं द्रवति मन्दाकिनी ।
४. मन्दाकिनी वेगेन दोद्रोति ।

**इ. अधः कतिचन युगलपदानि दत्तानि सन्ति । तेषाम् अर्थान् ज्ञात्वा तान्युपयुज्य स्वीयवाक्यानि रचयन्तु ।**

उदा - **बालकाः - बालिकाः**

**बालकाः पठन्ति - बालिकाः लिखन्ति**

१. मानिनः - मौनिनः  २. तूषन्ति - पूषन्ति
३. सह्यन्ति - सुह्यन्ति  ४. पाथांसि - स्रोतांसि

**ई. चत्वारि युगलपदानि पाठात् चित्वा तेषामर्थं जानन्तु लिखन्तु च ।**

**उ. 'मन्दाकिनी' इत्यस्याः विशेषणानि पाठात् चित्वा लिखन्तु । अर्थान् अवगच्छन्तु ।**

**ऊ. अधः दत्ते वाक्ये रेखाङ्कितपदस्य नानार्थाः पाठे प्रयुक्ताः सन्ति । तान् चित्वा लिखन्तु ।**

* कोकिलस्य रवः श्राव्यः भवति ।

### २. व्याकरणांशाः

**अ. सन्धिविच्छेदनं कृत्वा तेषां सन्धीनां नामानि लिखन्तु ।**

उदा - स्थूलेव = स्थूला + इव - गुणसन्धिः

१. शिरस्येव  २. सूक्ष्मेव  ३. वागिव  ४. साऽऽयाति



SCERT TELANGANA

**आ. पाठे परस्मैपदिनाम् आत्मनेपदिनां च धातूरूपाणि प्रयुक्तानि सन्ति । तानि पाठात् चित्वा लिखन्तु ।**

*** अधः दत्तानां समस्तपदानां विग्रहवाक्यानि अवगच्छन्तु ।**

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| १. पुरुषव्याघ्रः | पुरुषः व्याघ्रः इव |
| २. पुरुषसिंहः | पुरुषः सिंहः इव |
| ३. मुखपद्मम् | मुखं पद्मम् इव |
| ४. पार्थिवेन्द्रः | पार्थिवः इन्द्रः इव |
| ५. कपिकुञ्जरः | कपिः कुञ्जरः इव |

**''पुरुषव्याघ्रः'' इति समासपदम् ।**

- अस्य पदस्य विग्रहवाक्यं ''पुरुषः व्याघ्रः इव'' इति ।
- अस्मिन् समासपदे उपमेयवाचकं पदम् उपमानवाचकेन समस्यते । तेन अयम्
- **'उपमानोत्तरपदकर्मधारयसमासः'** भवति । अत्र 'इव' पदेन उपमानपदं सूच्यते ।

**इ) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।**

१. पुरुषनागः २. करकिसलयम् ३. पण्डितपुण्डरीकः ४. मुखकमलम्

**अधः दत्तं वाक्यं पठन्तु, अवगच्छन्तु ।**

''स्त्रीभिः कामः, प्रियैः चन्द्रः, कालः शत्रुभिरैक्षि सः ।''

अर्थः - स्त्रियः राजानम् मन्मथः इति चिन्तितवत्यः ।
प्रियबन्धुजनाः राजानं चन्द्रः इति चिन्तितवन्तः ।
शत्रवः राजानं यमः इति भावयन्ति ।

| के | कम् | कथम् | किमर्थम् |
|---|---|---|---|
| स्त्रियः | राजानं | मन्मथः → | सैन्दर्यम् |
| प्रियजनाः | राजानं | चन्द्रः → | प्रीतिः |
| शत्रवः | राजानं | यमः → | वीरत्वम् |

विवरणम् - यत्र ''एकम्'' एव जनं / वस्तु ''अनेके'' जनाः विभिन्नरूपेण भावयन्ति, तत्र **''उल्लेखालङ्कारः''** भवति ।

लक्षणम् - बहुभिः बहुधोल्लेखात् एकस्य उल्लेखिता मता ।

SCERT TELANGANA

ई) **अधः दत्तस्य वाक्यस्य, दत्तान् प्रश्नान् च आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।**

''विवेकानन्दं सामान्यजनाः समाजोद्धारकः इति, धार्मिकाः देवः इति, विद्यार्थिनः गुरुः इति च मन्वते'' ।

१. कं सर्वे भावयन्ति ?

२. जनाः तं कथं भावयन्ति ?

३. धार्मिकाः विवेकानन्दं कथं मन्वते ?

उ) **अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

''मदेन भाति कलभः प्रतापेन महीपतिः।''

**परियोजनकार्यम्**

अस्माकं राज्ये प्रवहन्तीनां नदीनां जन्मस्थानानि, तासां तटेषु विद्यमानसुप्रसिद्धक्षेत्राणां नामानि, समुद्रे सङ्गमस्थानम् इत्यादि विषयान् सङ्कलय्य पट्टिकारूपेण लिखित्वा कक्ष्याप्रकोष्ठे प्रदर्शयन्तु ।

## कृण्वन्तो विश्वमार्यम् ।



SCERT TELANGANA

तृतीयः भागः

# ७. भक्तिरेव गरीयसी

## पठन्तु, विचिन्त्य वदन्तु

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः ।।

**प्रश्नाः**

१. अयं श्लोकः कस्मिन् ग्रन्थे अस्ति?
२. अस्मिन् श्लोके मुख्यांशः कः ?
३. भगवान् केन तृप्तिं प्राप्नोति ?

## उद्देश्यम्

* ''ज्येष्ठाः अथवा भगवान् विनयेन भक्त्या चैव प्रसन्नाः भवन्ति । तेषां पुरतः गर्वप्रदर्शनेन हानिमेव प्राप्नुमः ।'' विषयमेतं बोधयितुम् अयं पाठ्यांशः परिकल्पितः ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

पाठ्यभागोऽयं 'भर्तृदानम्' नाम लघुकाव्यात् संगृहीतः । भर्तृदानमिति काव्यं श्री सन्निधानं सूर्यनारायणशास्त्रिमहोदयः रचितवान् । महोदयोऽयं पश्चिमगोदावरीजनपदे भीमडोलु समीपस्थे खण्ड्रिकनामाग्रहारे जातः । सिकिन्दराबादूनगरस्थे राष्ट्रपतिमार्गे स्थितायां महबूब् कलाशालायां संस्कृताचार्यः आसीत् । विशंतिशताब्दीयः अयं महाकविः तेलुगुभाषायां विद्यमानानि बहूनि काव्यानि संस्कृतेन अनूदितवान् । तेषु प्रभावतीप्रद्युम्नम्, विजयविलासः, कलापूर्णोदयः, आन्ध्रकाव्यकथाः, तेनालि रामलिङ्गकथाः इत्यादीनि प्रसिद्धानि । कचदेवयानीयम्, विवेकानन्दम्, कीरसन्देशम्, संयुक्तास्वयंवरम् इत्यादीनि स्वतन्त्रकाव्यान्यापि अनेन कविना विरचितानि ।

## प्रवेशिका

एकदा नारदः देवलोकतः द्वारावतीम् आगत्य, रुक्मिण्या सह वर्तमानं श्रीकृष्णम् उपेत्य, तस्मै एकं दिव्यं पुष्पं दत्तवान् । श्रीकृष्णः तत् पुष्पं रुक्मिण्यै दत्तवान् । सा तत् पुष्पं धृत्वा अत्यन्तं मनोज्ञा दृश्यते स्म । एतत् ज्ञात्वा असूयाग्रस्ता सत्यभामा कृष्णाय कुप्यति । सत्यभामायाः गर्वभङ्गाय नारदः पुण्यकव्रतम् आचरणीयम् इति तामवोचत् । व्रतान्ते पत्युः श्रीकृष्णस्य दानं करणीयमित्यपि उक्तवान् । तथैव दानरूपेण पतिं श्रीकृष्णं नारदाय अयच्छत् सत्यभामा । पुनः पतिं स्ववशं कर्तुं किं कृतवती ? तस्मिन् कार्ये सा सफला जाता वा ? इत्यादयः विषयाः प्रस्तुतपाठ्यभागं पठित्वा ज्ञायन्ताम् ।

सुरर्षिणा कापटिकेन संस्तुतम् व्रतं चिकीर्षुः प्रियभामिनी हरेः ।
अवाप्य तत्सम्मतिमाह्वयद्व्रता निजाः सपत्नीः सुहृदश्च बन्धुताम् ॥१॥

यथागमोक्तं परिकल्प्य पूजनाः गुरूपदिष्टा भृतभक्तिभावना ।
महीसुरेभ्योऽर्पितभूरिदक्षिणा नता कृताशीश्च सुवासिनीजनम् ॥२॥

ततो मुनीन्द्रे "जलधारया पतिः प्रदीयता"मित्युपदेष्टरि प्रियम्
निरीक्ष्य लज्जावनताननाऽऽह सा "श्रुता मुनेर्वाग्भवते"ति सस्मितम् ॥३॥

हरिः स्मितालङ्कृतवक्त्र आह ताम् सरोजनेत्रे ! कथमत्र शङ्कसे ?
त्वमागमोक्तं विधिमेनमाचरेस्तवान्यथा स्यात्बत कर्मलुप्तता ॥४॥

### विचिन्त्य वदन्तु

* स्त्रियः कानि व्रतानि आचरन्ति ?
* नारदः सत्यभामां जलधारया "पतिः प्रदीयताम्" इति किमर्थमवदत् ?

SCERT TELANGANA

पुरोहितेऽध्येतरि तत्क्रियापरे त्रयीगिरां सा सजलं सदक्षिणम् ।
अदात्पतिं तत्त्वविदे महात्मने महर्षये नारदनामविष्णवे ।।५।।

गृहीतदानः स उवाच नारदः पुरन्ध्रि ! सत्ये ! प्रतिगृह्यतां पतिः ।
तुलाप्रमाणं परिकल्प्य निष्क्रयम् धनं भवत्येति महानृजुः किल ।।६।।

तुलां तदाज्ञापरिकल्पितां जनैः समारुरुक्षद्भगवान् प्रियो हरिः ।
धटान्तरे सन्निहितानि भूयसा धनं सुवर्णं मणिभूषणानि च ।।७।।

यदा धनं तत्तुलितं न शौरिणा समानयत्काञ्चनरौप्यपात्रिकाः ।
अमूल्यवस्त्राणि पुनःपुनर्जनो न भेजिरे यान्यपि तत्तुलां बत, ।।८।।

पुनश्च गत्वा परितो गृहं जनो गवेष्य लब्धं न च वस्तु किञ्चन
बभूव शुष्काम्बुरिवाम्बुधिस्तदा धने तदीये सतृणं समर्पिते ।।९।।



ततस्तया प्रार्थितपारिजातक - प्रवृष्टमत्यन्तधनं समर्पितम् ।
धटः स न स्वल्पकमप्यवानमत् मुखं तु तस्या युवतेरवानमत् ।।१०।।

मुनिस्तदा म्लानमुखीं गलद्रुचम् भयव्यथाव्याकुललोललोचनाम् ।
उवाच सत्यां ''तव सर्वसम्पदः पुरन्ध्रि ! रिक्ताः प्रतिभान्ति मेऽधुना ।। ११।।



SCERT TELANGANA

न दातुमीष्टे भवती प्रतिश्रुतम् प्रियस्य ते निष्क्रयमेष आहृतः।
पुरस्य वीथ्यां विपणिष्यते मया, प्रगल्भवाचोऽभिहितास्त्वया मुधा'' ॥१२॥

इतीरयस्तामुपसृत्य माधवम् प्रणम्य मूर्ध्नाऽहं ''हरे ! तव प्रिया ।
अदत्तसत्याऽत्रभवन्तमद्य मे, तदेहि ! सेव्योऽप्यसि सेवको मम ॥१३॥

गृहाण ! वीणां मम सज्जितामिमाम्'' इति ब्रुवंस्तां न्यदधाद् भुजे हरेः ।
''पवित्रगङ्गाजलपूर्ण'' मित्यसौ कमण्डलुं वामकरे न्यवेशयत् ॥१४॥

ततो नयंस्तं पुरवीथिकां भ्रमन् ''जनाः पणध्वं परमेश्वरं हरिम् ।
प्रणेतुमागच्छत ! नन्दनन्दनम् प्रदाय मे निष्क्रय'' मित्यघोषयत् ॥१५॥

यतौ पतेर्विक्रयणाय वीथिकां भ्रमत्यमुष्मिन् विषसाद भामिनी ।
''अनेन धूर्तेन भवामि वञ्चिता कथं लभे मत्पति'' मित्यदूयत ॥ १६॥

ततो हताशा प्रतिकर्तुमक्षमा विषण्णचित्ता बहुशो विलापिनी ।
गता सपत्नीर्विनिवेद्य वञ्चनाम् ''पतिं विमुक्तं कुरुते''त्ययाचत ॥१७॥

शिरोमणिर्या महिषीषु रुक्मिणी गतानु तां प्रेक्ष्य तुलां विहस्य च ।
उवाच ''रत्नाभरणादिभिः कथं हरिं पतिं तोलयितुं व्यवस्यसि ॥१८॥

न लोकसाधारणपूरुषः स्वसः ! अयं पतिर्नौ भगवान् परात्परः ।
अमेयरूपः किल, नैव शक्यते धनैः स तुच्छैः परिमातुमीदृशैः'' ॥१९॥

इति ब्रुवाणा तमपास्य ''धिग्धिगित्य''मूल्यरत्नाभरणादिसञ्चयम् ।
समागतं प्रार्थनया मुनीश्वरम् पतिं च मूर्ध्ना प्रणिपत्य सादरम् ॥२०॥

तुलां समारोप्य पतिं हसन्मुखं धटान्तरे सा तुलसीदलं न्यधात् ।
जनेषु पश्यत्सु सविस्मयं हरेर्धटो लघूभूय हठात्समुत्थितः ॥२१॥

तदाह सत्या प्रणिपत्य रुक्मिणीम् ''स्वसर्यथाऽयं पतिरीक्षितस्त्वया ।
मया तथा नह्यनभिज्ञयाऽकरोर्दशोर्ममोन्मीलनमद्य ते नमः ॥२२॥

प्रणम्य चेयं चरणद्वयं मुनेः पुरःस्थिताऽऽह 'व्रतकैतवान्मुने ।
प्रबोध्य भक्तिं मम चेतसस्तमः कृतं विशीर्णं कियती कृपा मयि'' ॥२३॥

**विचिन्त्य वदन्तु**

* सत्यभामा स्वगृहे स्थितानि सर्वाणि मूल्यवस्तूनि तुलायां स्थापितवती चेदपि तानि श्रीकृष्णस्य भारेण तुल्यानि नाभवन् । किमर्थमिति भवान् भावयति ?
* रुक्मिण्याः वचनानां सारांशः कः ? सा किं कर्तुम् उद्युक्ता ?

**विचिन्त्य वदन्तु**

* रुक्मिणीसत्यभामयोः स्वभावभेदं विवृण्वन्तु ।
* पाठस्थनीतिं वदन्तु ॥

SCERT TELANGANA

**भावाः -**

१. कलहप्रियेण देवर्षिणा नारदेन उक्तं पुण्यकव्रतं कर्तुमिच्छन्ती श्रीकृष्णस्य प्रियपत्नी सत्यभामा तस्याः सपत्नीः मित्राणि बन्धून् च आह्वयति ।

२. सत्यभामा वेदोक्तप्रकारेण पूजां कृतवती । ज्येष्ठैः उक्तप्रकारेण भक्तिभावनापूर्णा सत्यभामा ब्राह्मणेभ्यः भूरिदक्षिणाः दत्त्वा, सुहासिनीः नत्वा सर्वेषाम् आशिषः प्राप्तवती ।

३. तदनन्तरं नारदः भवत्याः पतिं जलधारया सह मह्यं ददातु इति उक्तवान् । तदा सत्यभामा श्रीकृष्णं दृष्ट्वा लज्जया अवनतमुखी भूत्वा ''महर्षे ! भवतः वाक्यं श्रुतवती'' इत्यवदत् ।

४. ''पद्मनेत्रे ! मां प्रदातुं किमर्थं सन्देहं प्राप्नोति ? भवती शास्त्रोक्तप्रकारेण व्रतं कृत्वा भर्तृदानं न करोति चेत् कर्मलोपः भवति, तेन पूर्णफलं नाप्नोति'' इति कृष्णः तामवदत् ।

५. ततः सत्यभामा व्रतं कारितवते महर्षये नारदाय स्वपतिं श्रीकृष्णं सदक्षिणं जलधारया '' अहं भवते मम पतिं श्रीकृष्णं ददामि'' इति त्रिवारं वदन्ती समर्पितवती ।

६. नारदः सत्यभामया दत्तं श्रीकृष्णं स्वीकृत्य, हे सत्यभामे ? तुलाप्रमाणं धनं मह्यं दत्त्वा भवत्याः पतिं भवती स्वीकरोतु इत्यवदत् ।

७. तदा सत्यभामा स्वपरिवारजनैः तुलामानीय एकस्मिन् धटे श्रीकृष्णमुपवेश्य, अन्यस्मिन् धटे बहुधनं, सुवर्णं, मणिभूषणानि च स्थापितवती ।

८. तत्सर्वं धनं श्रीकृष्णेन तुलितं नाभवदिति ज्ञात्वा सुवर्णपात्राणि, रजतपात्राणि, अमूल्यानि वस्त्राणि च आनीय धटे स्थापितवती । तथापि प्रयोजनं नासीत् ।

९. तदा गृहे सर्वत्र अन्विष्टवती अमूल्यवस्तूनि न लब्धानि । शुष्कजलः समुद्रः इव तस्याः गृहे स्थितं सर्वमपि मूल्यवत् वस्तु धटे समर्पितवती सा ।

१०. ततः सत्यभामा पारिजातवृक्षं प्रार्थयित्वा तेन दत्तं धनं सर्वं धटे स्थापितवती । तथापि श्रीकृष्णस्य धटं किञ्चिदपि नावनतम् । तत् दृष्ट्वा सत्यभामायाः मुखं तु अवनतम् ।

११. तदा नारदः म्लानमुखीं भीतां सत्यभामाम् एवम् अवदत् 'हे सत्यभामे ! भवत्याः सर्वाः सम्पदः रिक्ताः अभवन्निति चिन्तयामि ।

१२. भवत्या प्रतिज्ञातं धनं दातुं भवती न शक्नोति । व्यर्थतया बहूनि वचनानि उक्तवती भवती अतः एतं श्रीकृष्णं विपणिं नीत्वा तत्र पुरस्य वीथ्यां विक्रेष्यामि'' इति नारदः सत्यभामाम् अवदत् ।

१३. ततः नारदः श्रीकृष्णं नमस्कृत्य एवमवदत् ''हे कृष्ण ! भवान् सेव्योऽपि इदानीं मम सेवकोऽसि । यतः भवतः प्रिया सत्यभामा भवन्तं मोचयितुं पर्याप्तं धनं न दत्तवती'' इति ।

१४. ''हे कृष्ण ! त्वं मम वीणां, मम कमण्डलुं च स्वीकुरु'' इति वदन्नारदः वीणां श्रीकृष्णस्य दक्षिणभुजे कमण्डलुं च वामहस्ते स्थापितवान् ।

१५. ततः श्रीकृष्णं विपणिं नीत्वा तत्र 'हे जनाः । परमात्मानं नन्दस्य पुत्रं श्रीहरिं क्रेतुमागच्छन्तु । मह्यं योग्यं मूल्यं दत्त्वा एनं क्रीणन्तु'' इति घोषयन् आसीत् ।

१६. नारदस्य वचनानि श्रुत्वा सत्यभामा 'अहं एतेन कपटमहर्षिणा वञ्चितास्मि । पुनः मम पतिं कथं प्राप्नोमि?'' इति चिन्ताकुला अभवत् ।

१७. एवं दुःखिता सत्यभामा किं करणीयमिति अजानन्ती रुक्मिण्याः समीपं गत्वा तस्याः पादौ नत्वा श्रीकृष्णस्य मोचनाय उपायं वदतु इति प्रार्थितवती ।

१८. ततः रुक्मिणी सत्यभामया सह गत्वा तुलां दृष्ट्वा हसन्ती एवमवदत् ''रत्नाभरणादिभिः भवती कथं श्रीहरिं तोलयति? (विपणितः प्रत्यागतौ श्रीकृष्णनारदौ ।) तं श्रीकृष्णं दृष्ट्वा

१९. अयं पतिः सामान्यमानवः न । अयं मातुमशक्यः भगवान् श्रीहरिः अस्ति । सः तुच्छैः धनैः परिमातुं न शक्यः ।

२०. इति वदन्ती तानि आभरणादीनि निष्कास्य तत्रागतं नारदमुनिं श्रीहरिं च नत्वा श्रीहरिं तुलामारोपितवती ।

२१. एकस्मिन् धटे कृष्णमुपवेश्य अन्यस्मिन् धटे सा एकं तुलसीदलं स्थापितवती । जनेषु आश्चर्येण पश्यत्सु हरेः धटः लघूभूय अकस्मात् उपरि गतः ।

२२. तदा सत्यभामा रुक्मिणीं नत्वा ''भगिनि ! भवती श्रीकृष्णे यथा भक्तिमती अस्ति, तथाहं भक्तिमती नास्मि । अज्ञानेन पिहितं मम नेत्रद्वयम् अद्य उन्मीलितम्'' इति उक्तवती ।

२३. ततस्सा नारदस्य पादौ नमस्कृत्य ''हे महर्षे ! व्रतं निमित्तीकृत्य मम मनसि विद्यमानम् अज्ञानं नाम तमः नाशयित्वा भक्तेः प्रबोधनं कृतवान् । मयि भवतः महती दया अस्ति'' इत्यवदत् ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तयोः प्रश्नायोः समाधाने विचिन्त्य वदन्तु ।**

१. भवताम् इष्टतमानां त्रयाणां श्लोकानां भावं वदन्तु ।

२. पाठ्यांशे कृष्णः, सत्यभामा, रुक्मिणी, नारदः इति चत्वारि पात्राणि सन्ति । भवद्भ्यः किं पात्रं रोचते ? किमर्थम् ?

**आ) पाठं पठन्तु । अधो निर्दिष्टानुसारं नारदस्य पञ्च वाक्यानि पाठात् यथातथं सङ्गृह्य लिखन्तु ।**

उदा -

| श्लोकसंख्या | नारदस्य वाक्यानि |
|---|---|
| १. श्लोकः | 'जलधारया पतिः प्रदीयताम्' |

**इ) अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गताः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठरप्रभृतयो याता दिवं भूपते !
नैकेनापि समं गता वसुमती मुञ्च त्वया यास्यति ॥

१. कृतयुगालङ्कारभूतः कः ?

२. श्लोके रामसम्बद्धः पर्यायवाचकशब्दः कः ?

३. दशास्यान्तकः किं कृतवान् ?

४. युधिष्ठिरादयः कस्मिन् युगे आसन् ?

SCERT TELANGANA

## ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. पाठस्यास्य रचयितारम् उद्दिश्य वदन्तु ।

२. कृष्णं प्रत्यर्पयितुं नारदः कीदृशं नियमं कल्पितवान् ?

३. वीथ्यां हरेः विक्रयणसंदर्भे सत्यभामा आत्मानं किमुक्तवती ?

४. रुक्मिणी सत्यभामां किमुक्तवती ?

५. नारदस्य सकाशात् स्वपतिं श्रीकृष्णं प्राप्तुं रुक्मिणी किं कृतवती ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

## अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. सत्यभामा धटे बहूनि आभरणानि स्थापितवती । तथापि श्रीकृष्णस्य धटः उपरि नागतः किमर्थं ?

२. नारदः श्रीकृष्णं प्रतिदातुं कृष्णेन समानं निष्क्रयं किमर्थं पृष्टवान् ?

३. पाठ्यांशस्य 'भक्तिरेव गरीयसी'' इति शीर्षिका युज्यते वा ? कारणानि लिखन्तु ।

## आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. भगवतः विषये कीदृशी भावना न भवेत् ? कीदृशी भावना च भवेत् ?

२. पाठ्यांशानुसारेण सत्यभामा पात्रस्य स्वभावं विशदयन्तु ।

## इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. रुक्मिणी तुलसीदलेन श्रीकृष्णं तोलितवती । श्रीकृष्णस्य विमुक्तिम् उपायान्तरेण दर्शयन्तः कथापरिवर्तनं कृत्वा पुनः लिखन्तु ।

२. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఓ స్వామీ ! శ్రీకృష్ణా ! నేను నీ పూజ కోసం పుష్పాలను తీసుకురావడానికి తోటకు వెళ్ళాను. అక్కడున్న పుష్పాలు "మమ్మల్ని చెట్లనుండి వేరు చెయ్యకు" అని జాలిగా వేడుకున్నాయి. అందుకని నేను పుష్పాలను తేలేకపోయాను. కానీ నా హృదయకమలాన్ని నీ పాదాలయందు సమర్పిస్తున్నాను.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

## अ) पाठं पठित्वा रेखाङ्कितपदानां समानार्थकपदानि अन्विष्य तान्युपज्य वाक्यानि लिखन्तु ।

१. <u>वञ्चकः</u> कदाचित् वञ्च्यते ।

२. <u>विप्रः</u> भिक्षार्थमागतः ।

३. सत्यभामायाः <u>वदनं</u> कान्तिहीनमभवत् ।

आ) पाठं पठित्वा मञ्जूषायां स्थितानि पदानि कम् उद्दिश्य कथितानि इति ज्ञात्वा लिखन्तु ।

| | | | | |
|---|---|---|---|---|
| माधवः | सरोजनेत्रे | सत्ये | सुरर्षिः | श्रीहरिः |
| मुनीन्द्रः | म्लानमुखी | शौरिः | पुरन्ध्रिः | मुनिः |
| नन्दनन्दनः | भामिनी | परात्परः | परमेश्वरः | यतिः |
| अश्रुमुखी | अमेयरूपः | विषण्णचित्ता | कापटिकः | |

| श्रीकृष्णः | नारदः | सत्यभामा |
|---|---|---|
| | | |

इ) अधः दत्तानां पदानां विरुद्धार्थकपदानि पाठे अन्विष्य उदाहरणानुसारं वाक्यानि लिखन्तु ।

उदाः - अप्रियः X प्रियः - श्रीकृष्णः सुराणां प्रियः भवति ।

१. परः २.उत्कृष्टम् ३. निरादरम् ४. लघुत्वम् ५.विवेकितया

## २. व्याकरणांशाः

अ) अधः दत्तानां पदानां सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।

१. महर्षिः २. गुरूपदिष्टा ३. परितो गृहम्

४. तदेहि ५. सुहृदश्च ६. मुनीन्द्रः

आ) अधः दत्तानि रिक्तस्थानानि समुचितरीत्या पूरयन्तु ।

| | | |
|---|---|---|
| उदा - इतीरयन् | - इति + ईरयन् | - सवर्णदीर्घसन्धिः |
| १. -------------- | पुनः + च | ------------------- |
| २. देवेति | ------------------- | ------------------- |
| ३. -------------- | शठः + असौ | ------------------- |
| ४. सेवकोपमः | ------------------- | ------------------- |
| ५. -------------- | इति + अपतत् | ------------------- |
| ६. सुरर्षिः | ------------------- | ------------------- |

इ) अधः दत्तानां पदानां विग्रहवाक्यानि लिखित्वा, समासनामानि लिखन्तु ।

१. प्रियभामिनी २. आगमोक्ता ३. गुरूपदिष्टा ४. महीसुराः

५. लज्जावनता ६. धटान्तरम् ७. अमूल्यवस्त्राणि ८. गृहीतदानः



SCERT TELANGANA

* **अधः दत्ते अनुच्छेदे रेखाङ्कितपदानि अवगच्छन्तु ।**

एकविद्यालयः अस्ति । विद्यालये महापण्डितः रामकृष्णः अस्ति । विद्यालये नवपाठकाः सन्ति । विद्यालये विशालप्रकोष्ठाः सन्ति । दीर्घोत्पेटिकाः सन्ति । सुन्दरवनम् अस्ति । तत्र उन्नतवृक्षाः सन्ति ।

* **उपर्युक्तगद्यांशे रेखाङ्कितानां समस्तपदानां विग्रहवाक्यानि एवं विद्यन्ते ।**

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| १. एकविद्यालयः | एकश्च असौ विद्यालयः च |
| २. महापण्डितः | महान् च असौ पण्डितः च |
| ३. नवपाठकाः | नवाः च अमी पाठकाः च |
| ४. विशालप्रकोष्ठाः | विशालाः च अमी प्रकोष्ठाः च |
| ५. दीर्घोत्पेटिकाः | दीर्घाः च इमाश्च उत्पेटिकाः च |
| ६. सुन्दरवनम् | सुन्दरं च तत् वनं च |
| ७. उन्नतवृक्षाः | उन्नताः च अमी वृक्षाः च |

उदा - एकविद्यालयः इति समासपदम् ।

- अस्य पदस्य विग्रहवाक्यम् 'एकः च असौ विद्यालयः च' इति भवति ।
- अस्मिन् समासपदे विशेषणं पूर्वपदत्वेन विद्यते । अतः अयं विशेषणपूर्वपदकर्मधारयसमासः।
- समानविभक्तिकयोरेव कर्मधारयसमासः भवति इति सामान्यलक्षणम् । तत्र प्राधान्यं तु उत्तरपदस्येव ।

**ई) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।**

१. दीर्घरज्जुः  २. नीलोत्पलम्  ३. सर्वदेवाः  ४. परमपुरुषः  ५. वीरभक्तः

**उ) अधः दत्तानां विग्रहवाक्यानां समस्तपदानि लिखन्तु ।**

१. महान् चासौ वैयाकरणः च  २. मध्यमश्चासौ मार्गः च  ३.समानः च असौ मन्त्रः च
४. प्रथमश्चासौ पुरुषः च  ५. अपरश्चासौ कविः च

**परियोजनाकार्यम्**

श्रीकृष्णस्य बाल्यजीवनघटनासु कांश्चित् घटनां लिखित्वा कक्ष्यायां श्रावयन्तु ।

SCERT TELANGANA

तृतीयः भागः

# ८. चाणक्यनीतिः

**पठन्तु, विचिन्त्य वदन्तु**

छात्रः - गुरुवर्य ! मातृदेवो भव ! पितृदेवो भव ! आचार्यदेवो भव इत्यादिप्रसिद्धानि वाक्यानि कुत्र लिखितानि सन्ति ?

शिक्षकः - उपनिषत्सु सन्ति ।

छात्रः - केवलं वैदिकसाहित्ये एव एतादृशानि नीतिबोधकानि सन्ति किम् ।

शिक्षकः - अन्यत्रापि बहूनि सन्ति । तेषाम् उपयोगान् जानन्ति वा ?

छात्रः - आम् जानीमः । ते नीतिं बोधयन्ति ।

शिक्षकः - समीचीनम् उक्तम् । तेषाम् आत्मसात्करणेन जनाः सज्जनाः भूत्वा सन्मार्गे गच्छन्ति ।

**प्रश्नाः**

१. वैदिकसाहित्ये निर्दिष्टानि वाक्यानि कानि?
२. एतादृशानि अन्यानि कानिचन नीतिवाक्यानि वदन्तु ।
३. सज्जनाः नाम के ? तेषां प्रवर्तनं कथं भवति ?

**उद्देश्यम्**

* नीतिश्लोकानाम् अध्ययने अभिरुच्युत्पादनम् ।
* छात्रेषु नैतिकमूल्याभिवर्धनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

## कविपरिचयः

"भोगलालसावशेन प्रजापालनविमुक्तस्य नन्दवंशस्य नाशः यावत् न भवेत् तावत् मम शिखामिमां न बध्नामि" इति विष्णुगुप्तस्य प्रतिज्ञां प्रायः न कोऽपि भारतीयः विस्मरति । आचार्यचणकस्य पुत्रः एषः "चाणक्य" इति नाम्ना ख्यातः ।

यद्यपि चाणक्यस्य जन्मस्थानविषये स्पष्टोल्लेखः नास्ति, तथापि तस्य शिक्षा तक्षशिलाविश्वविद्यालये सम्पन्नेति इतिहासेन ज्ञायते । क्री.पू. ३२५ इत्ययं चन्द्रगुप्तमौर्यस्य कालः । चाणक्यः चन्द्रगुप्तस्य महामन्त्री, गुरोः हितैषी राज्यसंस्थापकश्च । अतः द्वयोः कालः समान एव ।

स एष चाणक्यः कौटिल्यः इति नाम्ना अपि प्रसिद्धिमवाप । अनेन भारतीयानां राजनीतिबोधनाय अर्थशास्त्रम्, चाणक्यनीतिः, चाणक्यनीतिसूत्राणि इत्यादिग्रन्थान् रचयामास।

चाणक्यप्रणीतेषु ग्रन्थेषु राज्यव्यवस्थायां व्यक्तेः प्राधान्यमत्यन्तं काल्पितमस्ति । व्यक्तिः स्वनैतिकचरित्रनिर्माणेन समाजस्य पुनर्निर्माणं कर्तुं शक्नोति । अतः आधुनिकशिक्षायां चाणक्यस्य नीतिग्रन्थानां पठनमनिवार्यमिति उद्देश्येन पाठोऽयं प्रस्तूयते ।

प्रस्तुतपाठ्यांशनीतिश्लोकाः "चाणक्यनीत्याख्य" ग्रन्थात् स्वीकृताः ।

## प्रवेशिका

परिणामशीला हि सृष्टिरियम् । प्रत्येकमपि विषयः परिवर्तते । परिवर्तनेन विना स्थिरतया भवतः केवलं धर्मः न्याय्यञ्च । धर्मः न्याय्यमिति एतत् द्वयं सार्वकालिकं, सर्वसम्मतम् । तादृशान् न्यायधार्मिकसम्बन्धविषयान् अस्मत्पूर्वजाः संक्षिप्तीकृत्य श्लोकरूपेण निबद्धान् कृतवन्तः । विषयास्ते संक्लिष्टसमयेषु अस्मान् मार्गं निर्दिशन्ति । तादृशश्लोकान् कांश्चन प्रस्तुतपाठ्यांशेन पठित्वा अवगच्छन्तु ।

१. आपदर्थे धनं रक्षेच्छ्रीमतां कुत आपदः ।
कदाचित् चलते लक्ष्मीः सञ्चितोऽपि विनश्यति ॥

२. जानीयात्प्रेषणे भृत्यान्बान्धवान्व्यसनागमे ।
मित्रं चापत्तिकालेषु भार्यां च विभवक्षये ॥

३. आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥

* ४. यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।
ध्रुवाणि तस्य नश्यन्ति चाध्रुवं नष्टमेव हि ॥

### विचिन्त्य वदन्तु

* कदाचित् चलते लक्ष्मीः, सञ्चितोऽपि विनश्यति' इति श्लोकस्य भावं समर्थयन्तः भाषन्ताम् ।

* 'ध्रुवाणि तस्य नश्यन्ति चाध्रुवं नष्टमेव हि' इत्यस्य भावोचितं सङ्घटनं कथां वा वदन्तु ।

SCERT TELANGANA

* ५. यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ॥



६. सन्तोषस्त्रिषु कर्तव्यः स्वदारेष्वशने धने ।
त्रिषु चैव न कर्तव्योऽध्ययने जपदानयोः ॥

७. गुणो भूषयते रूपं शीलं भूषयते कुलम् ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥

८. विद्यार्थी सेवकः पान्थः क्षुधार्तो भयकातरः ।
भाण्डारी प्रतिहारी च सप्त सुप्तान्प्रबोधयेत् ॥

९. अहिं नृपं च शार्दूलं वृद्धं च बालकं तथा ।
परश्वानं च मूर्खं च सप्त सुप्तान्न बोधयेत् ॥

१०. सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या सुखं विद्यार्थिनः कुतः ॥

११. यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥

### विचिन्त्य वदन्तु

* 'अध्ययने, जपदानयोः सन्तोषः न कर्तव्यः' इति श्लोके किमर्थमुक्तम् ? कारणानि वदन्तु ।

* अष्टमनवमश्लोकयोः भावोचितकारणानि वदन्तु ।



* १२. दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ॥

१३. राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥

१४. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसञ्ज्ञा विधीयते ॥

* १५. यौवनं धनसम्पत्तिः प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

### विचिन्त्य वदन्तु

* ''चत्वारः सहजा गुणाः' इत्युक्तं श्लोके । तत्कथं सत्यमित्यालोच्य वदन्तु ।

* 'जलम्, अन्नं, सुभाषितानि कथं रत्नानि भवन्ति ? सोदाहरणं विशदयन्तु ।

SCERT TELANGANA

भावाः -

१. आपत्कालसमये उपयोक्तुं धनं संरक्षणीयम् । धनवतां जनानां कथम् आपदः समुद्भवन्ति ? आपदः न भवन्ति । आगता अपि रक्षितधनेन निष्कासयितुं शक्यते इत्युक्ते सति कदाचित् सम्पत् विचलिता भवति । अतः धनं रक्षणीयमिति भावः । सञ्चितं धनं सर्वं नष्टं भवत्येव ।

२. आज्ञानिर्वहणे सेवकानाम्, आपतिते कष्टसमये बान्धवानाम्, आपत्समयेषु मित्राणां, विनष्टे ऐश्वर्ये भार्यायाः योग्यतां जानीयात् । तदैव सा कीदृशी इति ज्ञायते ।

३. यः आपदि, दुष्कार्यकरणसमये (व्यसने), क्षामसमये, शत्रुप्रयुक्तसंकटे च प्राप्ते आक्रमितसमये, राजगृहस्य पुरतः विद्यमानसमये, श्मशानप्रदेशे उपस्थितस्सन् उपकरोति स एव बन्धुजनः इत्युच्यते । न तु सुखसम्पत्तिदशायाम् उपस्थितः ।

४. यः पुरुषः स्थिराणि स्थानानि त्यक्त्वा अस्थिरं स्थानम् आश्रयते तस्य स्थिराणि स्थानानि नष्टानि भवन्ति । अस्थिरं स्थानं तु अवश्यं नष्टमेव अनिश्चितत्त्वात् ।

५. येन प्रकारेण घर्षणेन, छेदनेन, दाहेन, ताडनेन इत्येतैः चतुर्भिः च सुवर्णं परीक्षितं भवति अनेन प्रकारेण चतुर्भिः अर्थात् त्यागेन, सद्वृत्तेन, उत्तमस्वभावेन, उत्तमकार्येण मानवः परीक्षितः चेत् तस्य स्वभावः ज्ञातुं शक्यते ।

६. स्वभार्यायां, भोजने, आर्जितधने च एतेषु त्रिषु विषयेषु आनन्दः सर्वदा प्राप्तव्यः । अलमिति तुप्तिरावश्यकी इति भावः । तथैव अध्ययने, जपे, दाने च एतेषु त्रिषु विषयेषु कदापि आनन्दः न प्राप्तव्यः। तेषाम् अनुष्ठानं सर्वदा कर्तव्यमेव । एतेषां त्रयाणाम् अधिकस्य अधिकं फलं भवति ।

७. मनुजस्य निजरूपं स्वीयोत्तमगुणेन शोभितं भवति । स्वकीयो वंशः सच्चारित्र्येण शोभते । तथाहि अत्युन्नतस्य भवनस्य उपरि स्थितोऽपि काकः गरुडो भवति वा ? नेत्यर्थः । तदपेक्षया उत्तमगुणाभावः ।

८. छात्रः, भृत्यः, पथिकः, क्षुत्पीडितः, भयात् भीरुः, भाण्डारी, द्वारपालः एते सप्त जना सुप्ताः सन्तोऽपि अवश्यं जागरणीयाः ।

९. सर्पः, राजा, व्याघ्रः, वृद्धपुरुषः, बालः, इतरविषयासक्तशुनकःपरशुनकः एतान् सप्त सुप्तान् न कदापि प्रबोधयेत् ।

१०. यः सुखम् अर्थयते सः विद्यां त्यजेत् । यः विद्याम् अर्थयते सः सुखं त्यजेत् । सुखम् इच्छता च पुरुषेण कथं विद्या लभ्यते ? न लभ्यते इत्यर्थः । विद्यामिच्छता पुरुषेण कथं सुखं लभ्यते । अतः दत्ते सुखस्य प्राधान्ये विद्या न लभ्यते, दत्ते एव विद्याप्राधान्ये सुखमप्रधानमेव।

११. यस्य पुरुषस्य स्वकीयं सहजं बुद्धिबलं न भवति तस्य शास्त्रं किं करोति ? अर्थात् तस्य पुरुषस्य शास्त्रज्ञानेन प्रयोजनं नास्ति । तथाहि अन्धस्य पुरुषस्य, दर्पणेन कोऽपि लाभः न भवति खलु ।

१२. दानगुणः प्रियभाषणं, धैर्यम्, समुचितव्यवहारः (प्रियभाषणम्), एते चत्वारः अभ्यासेन लब्धुं न शक्यन्ते । जन्मनैव जायन्ते इत्यर्थः ।

१३. धर्मयुक्ते राजनि सति जनाः अपि धर्मपरायणाः भवन्ति । पापकर्मणि राजनि सति सर्वे जनाः पापमेव आचरन्ति । अतः प्रजाः सदा राजानमनुसरन्ति । अत एव ''यथा राजा तथा प्रजाः'' इत्याभाणकं प्रसिद्धं विद्यते ।

१४. अस्यां भूम्यां त्रीणि यथार्थानि रत्नानि भवन्ति । तानि च जलम्, अन्नं सुभाषितञ्चेति । परन्तु मूर्खैः जनैः शिलाविशेषेषु माणिक्यादिषु रत्ननामधेयं परिकल्प्यते ।

१५. यौवनम्, ऐश्वर्यम्, अधिकारगर्वः, विवेकराहित्यम् इति एतत् चतुष्टयम् एकैकमपि अनर्थदायकं भवति । परन्तु एकत्रैव चतुष्टयं भवति चेत् कीदृशमनर्थं सम्भवतीति ऊहितुमेव न शक्यते । यौवनादिचतुष्टये सति अत्यन्तम् अनर्थः भवत्येवेति ।

## एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. पाठस्थनीतिश्लोकान् रागयुक्ततया गायन्तु ।
२. चाणक्यमुद्दिश्य भवताम् अभिप्रायं वदन्तु ।
३. ''सप्त सुप्तान् प्रबोधयेत्'' इति शीर्षिकामाधारीकृत्य चर्चां कुर्वन्तु ।

### आ) अधः दत्तानि रिक्तस्थानानि पाठं पठित्वा पूरयन्तु ।

१. राजद्वारे श्मशाने च ---------------------------- ।
२. ---------------------------- तस्य नश्यन्ति चाध्रुवं नष्टमेव हि ।
३. त्रिषु सन्तोषः न कर्तव्यः ---------------------------- ।
४. पृथिव्यां त्रीणि ---------------- जलम् ----------------- सुभाषितम् ।
५. सुखार्थिनः कुतो ------------------ सुखं ------------------ कुतः ।

### इ) अधः दत्तं श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥

१. किमुद्दिश्य अयं श्लोकः कथयति ?
२. जगत्सर्वं कस्मिन् प्रतिष्ठितम् वर्तते ?
३. पृथिवी केन धार्यते ?
४. सत्येन कः वाति ?
५. रविः केन तपते ?



SCERT TELANGANA

ई) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. ''कः बान्धवः'' इति सविवरणं लिखन्तु ।

२. पुरुषः कैः परीक्षितः भवति ?

३. अभ्यासेन के न लभ्यन्ते ।

४. अनर्थस्य कानि कारणानि भवन्ति ?

५. सन्तोषः कुत्र कर्तव्यः, कुत्र न कर्तव्यः इति लिखन्तु ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) **अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. ''सुखार्थी चेत् त्यजेत् विद्याम् इति श्लोकस्य भावं लिखन्तु ।

२. ''यथा राजा तथा प्रजाः इति सूक्तिः कस्मिन् सन्दर्भे प्रयुज्यते इति लिखन्तु ।

३. 'जलमन्नं सुभाषितम्' इत्येतानि यथार्थरत्नानि इति वक्तुं कारणानि कानि ?

४. अध्ययने आनन्दः, अर्जितधने तृप्तिः न भवति चेत् किं सम्भवतीति विवृण्वन्तु ।

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. चाणक्यनीतिश्लोकाः समाजं कथमुपकुर्वन्तीति लिखन्तु ।

२. गुणः, रूपं, शीलं कुलञ्च कथं भूषयते इति विवृण्वन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. चाणक्यनीतिश्लोकानां महत्त्वं विवृण्वन्तः भवन्मित्राय लेखं लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

నీలో అనంతశక్తి ఉందని విశ్వాసం కలిగి ఉండు. జాగరూకుడవై ఆ శక్తిని వ్యక్తపరచు. "నేను ఏదైనా సాధించగలను" అని సంకల్పించు. 'చేయలేను' అని అనవద్దు. ప్రతికూలభావనలు రాకూడదు. మీపై మీరు విశ్వాసం కోల్పోవడం అంటే భగవంతునిపై విశ్వాసం కోల్పోవడమే ! ఆత్మవిశ్వాసం కలిగి ఉండండి. గొప్ప విశ్వాసాల నుండే మహత్తర కార్యాలు సాధించబడతాయి.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **अधः दत्तानां पदानां पर्यायपदानि कोष्टकात् चित्वा सूचयन्तु ।**

| | | | | | |
|---|---|---|---|---|---|
| आनन्दः | आपत् | परित्यज्य | सन्तोषः | व्यक्तिः | सेवकाः |
| अहिः | धनं | अध्रुवं | धीः | अस्थिरं | वसु |
| प्रज्ञा | भृत्याः | पुरुषः | भुजङ्गः | विसृज्य | विपत् |

१. कष्टकालः २. वित्तं ३. परिचारकाः ४. त्यक्त्वा ५. अशाश्वतम्

६. मानवः ७. तृप्तिः ८. सर्पः ९. बुद्धिः

आ) अधः दत्तानां पदानाम् समानार्थकपदानि चित्वा तानि उपयुज्य वाक्यानि लिखन्तु ।

| | | |
|---|---|---|
| १. स्वदारेषु | - | स्वसोदर्यां, स्वपन्त्यां, स्वभ्रातरि |
| २. ध्रुवाणि | - | स्थिराणि, नवीनानि, प्राचीनानि |
| ३. कनकं | - | रजतम्, अयः, हिरण्यम् |
| ४. प्रासादशिखरस्थः | - | उन्नतपर्वतस्थः, उन्नतवृक्षस्थः, उन्नतभवनस्थः |
| ५. पान्थः | - | दर्शकः, पथिकः, चिन्तकः |
| ६. क्षुधार्तः | - | रोगपीडितः, धनपीडितः, बुभुक्षापीडितः |
| ७. प्रतीहारी | - | वनपालः, गोपालः, द्वारपालः |
| ८. दर्पणः | - | मुकुरः, चषकः, व्यजनम् |
| ९. हेतुः | - | निधनम्, निदानम्, निवारणम् |

## २. व्याकरणांशाः

अ) अधः दत्तानां सन्धिपदानां विच्छेदं कृत्वा सन्धिनामानि लिखन्तु ।

| | |
|---|---|
| १. आपदर्थे | २. रक्षेच्छ्रीमताम् |
| ३. सुप्तान्न | ४. अप्यनर्थाय |
| ५. सञ्चितोऽपि | ६. यस्तिष्ठति |

आ) अधः दत्तानां समासपदानां विग्रहवाक्यानि लिखित्वा समासनामानि सूचयन्तु ।

| | | |
|---|---|---|
| १. आपत्तिकालेषु | २. दुर्भिक्षम् | ३. राजद्वारे |
| ४. अध्रुवम् | ५. निघर्षणच्छेदनतापताडनैः | ६. पाषाणखण्डेषु |
| ७. रत्नसंज्ञा | ८. अनर्थः | ९. जपदानयोः |
| १०. प्रासादशिखरस्थः | ११. क्षुधार्तः | १२. परश्वा |
| १३. सुखार्थी | १६. अविवेकिता | |

इ) अधीतपूर्वच्छन्दोज्ञानानुसारम् अधः दत्तस्य पद्यपादस्य गुरुलघून् निरूप्य गणविभाजनञ्च कृत्वा छन्दोवृत्तं सूचयन्तु।

'यथा चतुर्भिः कनकं परीक्ष्यते'

ई) अधः दत्तस्य श्लोकस्य अलङ्कारं विज्ञाय लक्ष्यलक्षणसमन्वयपूर्वकं निरूपयन्तु ।

* यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ॥



SCERT TELANGANA

* अधः दत्तस्य समासपदस्य विग्रहवाक्यम् अवगच्छन्तु ।

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| पण्डितप्रकाण्डम् | पण्डितः प्रशस्तः |

- अस्मिन् समासपदे विशेषणम् उत्तरपदत्वेन विद्यते ।
- तेन कारणेन अयं **विशेषणोत्तरपदकर्मधारयसमासः ।**

उ) अधः दत्तानां समासपदनां विग्रहवाक्यानि लिखन्तु ।

१. विद्वत्तल्लजः          २. गोमतल्लिका          ३. पण्डिततल्लजः

* अधः दत्तं वाक्यं पठन्तु अवगच्छन्तु ।

**"एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते"**

**अर्थः** - एकः पक्षी शक्रेण (इन्द्रेण) प्रेरितं मेघम् एवं जलार्थं याचते । न अन्यम् अतः सः पक्षी धन्यः । अर्थात् श्रेष्ठः जनः एकस्मिन् एव उन्नतमार्गे तिष्ठति इति ।

**विवरणम्** - यत्र अप्रस्तुतविषयः प्रस्तुतविषयं द्योतयति । अर्थात् प्रस्तुतविषयाय उक्तः सः **अप्रस्तुतप्रशंसालङ्कारः** इत्युच्यते ।

**लक्षणम्**- अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया ।

ऊ) अधः दत्तस्य वाक्यस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ?

**"अप्यम्बुधेः परं पारं प्रयान्ति व्यवसायिनः"**

१. व्यवसायिनः कं कस्य पारं कर्तुं शक्नुवन्ति ?
२. अत्र अप्रस्तुतविषयः कः ?
३. अत्र प्रस्तुतविषयः कः ?
४. व्यवसायिनः समुद्रमपि तर्तुं शक्नुवन्ति इत्यस्यार्थः कः ।
५. अप्रस्तुतप्रशंसालङ्कारस्य विशेषांशाः के ?

ॠ) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**कमलैः कमलावासैः किं किं नासादि सुन्दरम् ।**

**परियोजनाकार्यम्**

तृतीयकक्ष्यायाः आरभ्य दशमकक्ष्यापर्यन्तं स्थितेभ्यः संस्कृतपाठ्यपुस्तकेभ्यः नीतिश्लोकान् सङ्गृह्य पुस्तकरूपेण कक्ष्यायां प्रदर्शयन्तु ।

SCERT TELANGANA

तृतीयः भागः

# ९. अष्टावक्रः

**पठन्तु, विचिन्त्य वदन्तु**

अध्यापकः - ललिते ! महाभारतकथायां कमपि वीरपुरुषं जानाति किम् ?
ललिता - जानामि भोः! सुभद्रार्जुनयोः पुत्रः अभिमन्युः ।
अध्यापकः - तस्य विशेषता का ?
ललिता - सः गर्भस्थस्सन् युद्धेषु पद्मव्यूहरचनां शिक्षितवान् ।
अध्यापकः - ईदृशः कोऽपि अन्यः विद्यते ?
सतीशः - विद्यते महोदय । लीलावतीहिरण्यकशिपोः पुत्रः प्रह्लादः मातृगर्भे एव वैष्णवमन्त्रं ज्ञातवान् ।
अध्यापकः - समीचीनम् । अस्माकं देशे अनेके महानुभावाः मातृगर्भे तिष्ठन्तः एव अनेकान् विषयान् ज्ञातवन्तः । अद्य वयं तादृशेषु एकं बालकम् उद्दिश्य ज्ञास्यामः ।

**प्रश्नाः**

१. महाभारते वीरपुरुषः कः ?
२. गर्भस्थः अभिमन्युः किं शिक्षितवान् ?
३. प्रह्लादः कयोः पुत्रः ?
४. प्रह्लादः मातृगर्भे किम् अध्यगच्छत् ?

**उद्देश्यम्**

* अष्टावक्रवृत्तान्तश्रवणेन बालकेषु श्रद्धा-दीक्षा-विद्यार्जन-पितृभक्त्यादिगुणानां वर्धनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

भगवान् वेदव्यासः पराशरात्मजः तस्य नाम कृष्णद्वैपायनः । वेदानां विभागं कृतवानिति वेदव्यासः इति प्रसिद्धिं प्राप । वेदव्यासः श्रीमन्महाभारतम्, श्रीमद्भागवतम् अष्टादशपुराणानि च रचितवान् । श्रीमन्महाभारतम्, लक्षाधिकश्लोकात्मकः इतिहासग्रन्थः। ''भारतं पञ्चमो वेद इति प्रख्यातिः । अस्मिन् नैके धर्माः प्रतिपादिताः । प्रस्तुतपाठ्यभागः श्रीमन्महाभारते, वनपर्वणि द्वात्रिंशदधिकशततमाध्यायादारभ्य चतुस्त्रिंशदधिकशततमाध्याय-पर्यन्तं त्रिषु अध्यायेषु विद्यमानम् अष्टावक्रवृत्तान्तं स्वीकृत्य संकलितः ।

## प्रवेशिका

'मातृदेवो भव, पितृदेवो भव' इत्यादिधर्माचरणविषयाः उपनिषत्सु उक्ताः । विषयास्ते कथमाचरणीया इति इतिहासपुराणादिभिः विवृताः । महाभारते ईदृशविषयसम्बद्धाः बह्व्यः कथाः विद्यन्ते । तासु कथासु पितृभक्तिप्रदर्शनसम्बद्धकथा एव 'अष्टावक्रः' इति । पाठ्यांशमिमं पठित्वा धर्माचरणविषयास्ते अवगम्यन्ताम् ।

१. उपास्व कौन्तेय सहानुजस्त्वं तस्याश्रमं पुण्यतमं प्रविश्य ।
अष्टावक्रं यस्य दौहित्रमाहुर्योऽसौ बन्दिं जनकस्यास्य यज्ञे ॥

२. वादी विप्रग्र्यो बाल एवाभिगम्य वादे भङ्क्त्वा मज्जयामास नद्याम् ।

३. उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत् ।
शुश्रूषुराचार्यवशानुवर्ती दीर्घं काले सोऽध्ययनं चकार ॥

४. तं वै विप्रः पर्यचरत् सशिष्यस्तां च ज्ञात्वा परिचर्यां गुरुः सः ।
तस्मै प्रादात् सद्य एव श्रुतं च भार्यां च वै दुहितरं स्वां सुजाताम् ॥

५. तस्या गर्भः समभवदग्निकल्पः सोऽधीयानं पितरं चाप्युवाच ।
सर्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्तते ॥

६. उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप ।
यस्मात् कुक्षौ वर्तमानो ब्रवीषि तस्माद् वक्रो भवितास्यष्टकृत्वः ॥



SCERT TELANGANA

७.	स वै तथा वक्र एवाभ्यजायदष्टावक्रः प्रथितो वै महर्षिः ।
अस्यासीत् वै मातुलः श्वेतकेतुः स तेन तुल्यो वयसा बभूव ॥

८.	सम्पीड्यमाना तु तदा सुजाता सा वर्धमानेन सुतेन कुक्षौ ।
उवाच भर्तारमिदं रहोगता प्रसाद्य हीनं वसुना धनार्थिनी ॥

९.	कथं करिष्याम्यधुना महर्षे मासश्चायं दशमो वर्तते मे ।
नैवास्ति ते वसु किं चित् प्रजाता येनाहमेतामापदं निस्तरेयम् ॥

१०.	उक्तस्त्वेवं भार्यया वै कहोडो वित्तस्यार्थे जनकमथाभ्यगच्छत् ।
स वै तदा वादविदा निगृह्य निमज्जितो बन्दिनेहाप्सु विप्रः ॥

११.	उद्दालकस्तं तु तदा निशम्य सूतेन वादेऽप्सु निमज्जितं तथा ।
उवाच तां तत्र ततः सुजातामष्टावक्रे गूहितव्योऽयमर्थः ॥

१२.	ररक्ष सा चापि तमस्य मन्त्रं जातोऽप्यसौ नैव शुश्राव विप्रः ।
उद्दालकं पितृवच्चापि मेने तथाष्टावक्रो भ्रातृवच्छ्वेतकेतुम् ॥

१३.	ततो वर्षे द्वादशे श्वेतकेतुरष्टावक्रं पितुरङ्के निषण्णम् ।
अपाकर्षद् गृह्यपाणौ रुदन्तं नायं तवाङ्कः पितुरित्युक्तवांश्च ॥

१४.	यत् तेनोक्तं दुरुक्तं तत् तदानीं हृदि स्थितं तस्य सुदुःखमासीत् ।
गृहं गत्वा मातरं सोऽभिगम्य पप्रच्छेदं क्व नु तातो ममेति ॥

१५.	ततः सुजाता परमार्तरूपा शापाद् भीता सर्वमेवाचचक्षे ।
तद् वै तत्त्वं सर्वमाज्ञाय रात्रावित्यब्रवीच्छ्वेतकेतुं स विप्रः ॥

१६.	गच्छाव यज्ञं जनकस्य राज्ञो बह्वाश्चर्यः श्रूयते तस्य यज्ञः ।
श्रोष्यावोऽत्र ब्राह्मणानां विवादमर्थे चाक्षयं तत्र भोक्ष्यावहे च ॥

१७.	तौ जग्मतुर्मातुलभागिनेयौ यज्ञं समृद्धं जनकस्य राज्ञा ।
अष्टावक्रः पथि राज्ञा समेत्य प्रोत्सार्यमाणो वाक्यमिदं जगाद ॥

१८.	प्राप्तौ स्वयशं नृप संदिदृक्ष कौतूहलं नौ बलवन्नरेन्द्र ।
प्राप्ताविहावामतिथी प्रवेशं काङ्क्षावहे द्वारपतेस्त्वाज्ञाम् ॥
(श्वेतकेत्वष्टावक्रौ यज्ञमण्डपं प्रवेशितवन्तौ ।)

**अष्टावक्र उवाच -**

१९.	भो भो राजन् जनकानां वरिष्ठ त्वं वै सम्राट् त्वयि सर्वं समृद्धम् ।
त्वं वा कर्ता कर्मणां यज्ञियानां ययातिरेको नृपतिर्वा पुरस्तात् ॥

**विचिन्त्य वदन्तु**

* 'दिवारात्रौ वेदाभ्यासः माभूत्' इति गर्भस्थ शिशुरवोचत् खलु ! विषयेऽस्मिन् भवताम् अभिप्रायः कः ?

SCERT TELANGANA



२०.   वृद्धान् बन्दी वादविदो निगृह्य वादे भग्नानप्रतिशङ्कमानः ।
      त्वयाभिसृष्टैः पुरुषैराप्तकृद्भिर्जले सर्वान् मज्जयतीति नः श्रुतम् ॥

२१.   सोऽहं श्रुत्वा ब्राह्मणानां सकाशात् ब्रह्माद्वैतं कथयितुमागतोऽस्मि ।
      क्वासौ बन्दी यावदेनं समेत्य नक्षत्राणीव सविता नाशयामि ॥

२२.   एवमष्टावक्रः समितौ हि गर्जञ्जातक्रोधो बन्दिनमाह राजन् ।
      उक्ते वाक्ये चोत्तरं मे ब्रवीषि वाक्यस्य चाप्युत्तरं ते ब्रवीमि ॥

२३.   ततो महानुदतिष्ठन्निनादस्तूष्णीभूतं सूतपुत्रं निशम्य ।
      अधोमुखं ध्यानपरं तदानीम् अष्टावक्रं चाप्युदीर्यन्तमेव ॥

२४.   तस्मिंस्तथा संकुले वर्तमाने स्फीते यज्ञे जनकस्योत राज्ञः ।
      अष्टावक्रं पूजयन्तोऽभ्युपेयुः विप्राः सर्वे प्राञ्जलयः प्रतीताः ॥

**अष्टावक्र उवाच -**

२५.   अनेनैव ब्राह्मणाः शुश्रुवांसो वादे जित्वा सलिले मज्जिताः प्राक् ।
      तानेव धर्मानयमद्य बन्दी प्राप्नोति गृह्याप्सु निमज्जयैनम् ॥

जनक उवाच -

२६. शृणोमि वाचं तव दिव्यरूपाममानुषीं दिव्यरूपोऽसि साक्षात्
अजैषीर्यद् बन्दिनं त्वं विवाद निसृष्ट एष तव कामोऽद्य बन्दी ॥

लोमश उवाच -

२७. समुत्थितेष्वथ सर्वेषु राजन् विप्रेषु तेष्वधिकं सुप्रभेषु ।
अनुज्ञातो जनकेनाथ राज्ञा विवेश तोयं सागरस्योत बन्दी ॥

२८. अष्टावक्रः पितरं पूजयित्वा सम्पूजितो ब्राह्मणैस्तैर्य यावत् ।
प्रत्याजगामाश्रममेव चाग्र्यं जित्वा सौतिं सहितो मातुलेन ॥

२९. ततोऽष्टावक्र मातुरथान्तिके पिता नदीं समाङ्गां शीघ्रमिमां विशस्व ।
प्रोवाच चैनं स तथा विवेश समैरङ्गैश्चापि बभूव सद्यः ॥

**विचिन्त्य वदन्तु**

* अष्टावक्रस्य जीवन-चरितेन ज्ञातान् विषयान् विवृण्वन्तु ।

## सारांशः

१. लोमशः युधिष्ठिरं प्रति इत्थमवोचत् ।

हे युधिष्ठिर ! महापण्डितः वेदशास्त्रज्ञः अष्टावक्रः शास्त्रवादे अतीवनिपुणः । तेन महाराजः जनकः हृष्टः । अपि च महापण्डितः बन्दी च जितः । अष्टावक्रः उद्दालकस्य दौहित्रः (दुहितुः पुत्रः), तस्याश्रमम् आत्मनः सोदरैस्साकं प्रविश ।

२. सः श्रेष्ठः अष्टावक्रः बाल अपि महापण्डितं बन्दिनं जित्वा तं नद्यां न्यमज्ञयत् - ।

३. हे राजन् ! महर्षेः उद्दालकस्य कहोडो नाम एकः महान् शिष्यः आसीत् । सः आचार्यमुद्दालकम् अतीव श्रद्धया संसेव्य तत्सन्निधौ बहुकालम् अध्ययनं कृतवान् ।

४. सः शिष्यः कहोडः तं गुरुं बहुधा सेवितवान् । तस्य सेवया सन्तुष्टः गुरुः तं वेदशास्त्रज्ञं कृत्वा स्वपुत्रीं सुजातां तस्य पत्नीं कृतवान् ।

५. सः कहोडः परिणयानन्तरं स्वम् आश्रमं गत्वा तत्र दिवारात्रं वेदाध्यापनं करोति स्म । तस्य भार्या सुजाता गर्भवती अभूत् । एकदा गर्भस्थः शिशुः रात्रिसमयेऽपि वेदाध्ययनं कुर्वन्तं पितरं प्रति सर्वामपि रात्रिं कृतमध्ययनं न सम्यगिति अवदत् ।

६. शिष्यमध्ये स्थितः कहोडः तच्छ्रुत्वा कोपात् गर्भस्थं शिशुं शप्तवान् । यस्मात् त्वं कुक्षौ स्थित्वा एवं निन्दसि तस्मात्त्वम् अष्टावक्रः भविष्यसि इति ।

७. पितुः शापकारणात् सः गर्भस्थः शिशुः अष्टावक्रः अभूत् । तस्य मातुलः श्वेतकेतुः अपि समवयस्कः बभूव ।

८. एवं पुत्रस्य अवस्थां ज्ञात्वा सुजाता दुःखिता अभूत् । गर्भे वर्धमानेन पुत्रेण सहिता सा एकदा धनावश्यकतां सूचयन् भर्तारम् एवमवदत् ।



SCERT TELANGANA

९. हे नाथ! मम दशमो मासः आगतः । अधुना किं कर्तव्यम् ? अस्माकं समीपे किमपि धनं नास्ति। वयम् एतत् कष्टं कथं तरेम ।

१०. एवं भार्यया निवेदितः सः महर्षिः कहोडः धनं कामयमानः राज्ञः जनकस्य समीपम् अगच्छत् । तत्र महापण्डितेन बन्दिना सह शास्त्रवादे पराजयं प्राप्य जले निमज्जितः अभूत् ।

११. सूतपुत्रेण बन्दिना कहोडः जले निमज्जितः इति ज्ञात्वा उद्दालकः स्वपुत्रिकां सुजातां तव पुत्रं प्रति एतत् सर्वं न वद इति अवदत् ।

१२. सुजातापि पुत्रम् एतद्विषयं नोक्तवती । सः अष्टावक्रः उद्दालकं जनकवत् मातुलं श्वेतकेतुं सोदरवत् भावयति स्म ।

१३. द्वादशवर्षीयः अष्टावक्रः एकदा उद्दालकस्य अङ्के उपाविशत् । श्वेतकेतुः स्वपितुरङ्के उपविष्टं तं दृष्ट्वा बलात् अपाकर्षत् । अपि च अयं तव पितुः न इति अवदत् ।

१४. श्वेतकेतुना उक्तं तद्वाक्यं श्रुत्वा अतीव खिन्नः अष्टावक्रः सद्यः मातुः समीपं गत्वा मम पिता कः इति मातरम् अपृच्छत् ।

१५. अनन्तरं सुजाता अतीव दुःखिता सती पुत्रं प्रति सर्वं वृत्तान्तं कथितवती । एतत् सर्वं ज्ञात्वा अष्टावक्रः सम्यगालोच्य रात्रौ श्वेतकेतुं प्रति एवमुक्तवान् ।

१६. आवां राज्ञः जनकस्य यज्ञं द्रष्टुं गच्छावः । तत्र अत्याश्चर्यका विषयाः वर्तन्ते इति श्रूयते । तत्र ब्राह्मणानां पण्डितानां शास्त्रवादं श्रोष्यावः तत्रैव भोजनं करिष्यावः ।

१७. एवं चिन्तनं कृत्वा अष्टावक्रः श्वेतकेतुश्च राज्ञः जनकस्य यज्ञं द्रष्टुं यज्ञमण्डपं गतवन्तौ । मार्गमध्ये अष्टावक्रः राज्ञः समीपं गच्छन् सेवकेन बलात् निवारितः सन् राजानं प्रति एवमुक्तवान् ।

१८. हे राजन् ! आवां द्वौ भवता क्रियमाणं यज्ञं द्रष्टुम् आगतवन्तौ । आवयोः मनसि उत्सुकता अधिका वर्तते । अतः आवां तव अतिथिरूपेण आगतवन्तौ । आवयोः यज्ञं द्रष्टुं प्रवेशं कल्पयतुं तव द्वारपालकमाज्ञापय ।(ततस्सः श्वेतकेतुना सह राजानुमत्या सभायां प्रविष्टः ।)

१९. हे राजन् ! त्वं जनकवंशे श्रेष्ठः चक्रवर्ती च । तव सर्वं समृद्धमेव । अधुना त्वं उत्तमो भूत्वा श्रद्धया यज्ञं कर्तुमुद्युक्तः अभूत् ! पूर्वकाले तव वंशे ययातिः एक एव एवं रूपेण यज्ञादिकं कृतवान् आसीत् ।

२०. हे राजन् ! बन्दी अनेकान् ज्येष्ठान् पण्डितान् शास्त्रवादे जित्वा तान् सर्वान् जले मज्जितवान् इति अस्माभिः श्रुतम् ।

२१. तच्छ्रुत्वा अहं पण्डितानां ब्राह्मणानां सकाशे अद्वैतं ब्रह्मविषयम् अधिकृत्य कथयितुमागतोऽस्मि। सः बन्दी कुत्र वर्तते ? यथा सूर्यः नक्षत्रकान्तिं अन्तर्हितं करोति तथा अहं बन्दिनः अहंकारं दूरीकरिष्यामि ।

२२. एवमष्टावक्रः राज्ञः पुरतः उच्चैः वदन् कुपितः सन् तत्र आगतं बन्दिनं प्रति एवमुक्तवान् । त्वं यदि प्रश्नं करोषि चेत् अहं समाधानं दास्यामि । मम प्रश्नस्य त्वया समाधानं दातव्यम् इति।



SCERT TELANGANA

२३. वादप्रतिवादानन्तरं बन्दी पराजितः सन् अधोमुखः अतिष्ठत् । अधोमुखं सूतपुत्रं बन्दिनं दृष्ट्वा जनाः उच्चैः कोलाहलं कृतवन्तः ।

२४. राज्ञः जनकस्य यज्ञसमये महान् कोलाहलः तत्र व्याप्तः । सर्वे ब्राह्मणाः वृद्धाः पण्डिताः च अष्टावक्रं महापण्डितं ज्ञात्वा पूजयामासुः ।

२५. तदानीम् अष्टावक्रः एवमुक्तवान् । अनेन बन्दिना पूर्वं अनेके पण्डिताः पराजिताः जले मज्जिताः अभूवन् । एवमेव अधुना बन्दी पराजितः, अतः एनमपि जले मज्जयन्तु इति ।

२६. तदानीं जनकः अष्टावक्रम् इत्थमवोचत् । हे ब्रह्मन् । अहं तव दिव्यरूपाम् अलौकिकीं गिरम् आकर्णयामि । त्वं शास्त्रवादे बन्दिनं जितवान् ।

२७. एवं सति पूर्वं बन्दिना निमज्जिताः सर्वे पण्डिताः जलात् उत्थिताः दिव्यप्रकाशयुक्ताः विराजन्ते स्म । ततः राज्ञा जनकेन आदिष्टः बन्दी स्वयं जले निमग्नः अभूत् ।

२८. तदानीम् अष्टावक्रः स्वजनकम् अर्चयित्वा तत्रत्यैः ब्राह्मणैः पण्डितैः सम्मानितः सन् मातुलेन सहितः स्वाश्रमं गतवान् ।

२९. अनन्तरम् अष्टावक्रः पित्रा एवमुक्तः । हे पुत्र ! त्वं शीघ्रं समाङ्गानद्यां स्नानं कुरु । इति अष्टावक्रः पितुः आज्ञया तथा कृतवान् । सद्यः एव तस्य शरीरस्य वक्रत्वमपगतम् ।

## एतानि कुर्वन्तु

I. **भावावगमनम् - प्रतिस्पन्दनम् ।**

अ) **अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।**

१. अष्टावक्रः कीदृशः ?

२. गर्भस्थशिशोः भाषणं श्रुत्वा पिता कोपेन तं शप्तवान् । तत् कथं युक्तं भवतीति चर्चयन्तु।

आ) **श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

तं वै विप्रः पर्यचरत् स शिष्यः
तां च ज्ञात्वा परिचर्यां गुरुः सः ।
तस्मै प्रादात् सद्य एव श्रुतं च
भार्याञ्च वै दुहितरं स्वां सुजाताम् ।।

१. अस्मिन् श्लोके गुरुशिष्यौ कौ ?

२. शिष्यः किं कृतवान् ?

३. गुरुः किं कृतवान् ?

४. सुजाता का ?



SCERT TELANGANA

इ) **श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

हिंसाबलमसाधूनाम् राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥

१. असाधूनां बलं किम् ?
२. राज्ञां बलं किम् ?
३. स्त्रीणां बलं किम् ?
४. गुणवतां बलं किम् ?

ई) **पाठं पठित्वा अधो दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. कहोडः कः ?
२. उद्दालकः शिष्यसेवया सन्तुष्टः सन् किं कृतवान् ?
३. गर्भस्थः शिशुः किमवदत् ?
४. अष्टावक्रः श्वेतकेतुश्च कुत्र किमर्थं जग्मतुः ?
५. अष्टावक्रः जनकमहाराजं किं प्रार्थितवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) **अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. पुत्रशापश्रवणानन्तरं मातुः सुजातायाः स्थितिः कीदृशी आसीत् ?
२. स्वपुत्रः बन्दिनं शास्त्रवादे जित्वा पण्डितान् जलनिमज्जनात् रक्षितवान् इति ज्ञात्वा कहोडः कीदृशीम् अनुभूतिं प्राप्तवान् ?
३. 'नक्षत्राणीव सविता नाशयामि' इत्यस्य अर्थः कः ? कस्मिन् सन्दर्भे इदं वाक्यमुक्तम् ?

आ) **अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।**

१. पुत्रसंरक्षणे मातुः दायित्वं लिखन्तु ।
२. अष्टावक्रः कथं बन्दिनः अहङ्कारं नाशितवान् ?

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. बालस्य अष्टावक्रस्य वैशिष्ट्यम् स्वीयवाक्यैः लिखन्तु ।
२. अधो लिखितं पद्यं संस्कृतभाषया अनुवदन्तु ।

తన కోపమె తన శత్రువు
తన శాంతమె తనకు రక్ష దయ చుట్టంబౌ
తన సంతోషమే స్వర్గము
తన దుఃఖమే నరకమండ్రు తథ్యము సుమతీ ॥



SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **रेखाङ्कितपदानां समानार्थकपदानि पाठाधारेण ज्ञात्वा, तानि उपयुज्य स्ववाक्यानि लिखन्तु।**

१. अष्टावक्रः उद्दालकस्य पुत्रीपुत्रः ।
२. कहोडः उदरस्थं शिशुं शप्तवान् ।
३. श्वेतकेतुः अष्टावक्रस्य वयसा समानः बभूव ।

आ) **अधः दत्तानां पदानां विरुद्धार्थकपदानि ज्ञात्वा, तान्युपयुज्य स्वीय वाक्यानि लिखन्तु ।**

उदाः पुण्यं × पापं
परोपकारः पुण्यं ददाति । अपकारस्तु पापं ददाति ।
१. दिवा २. पुरा ३. धार्मिकः ४. सुखम्

इ) **पाठं पठित्वा अधः दत्तानां पदानां विवरणं कुर्वन्तु ।**

१. आचार्यवशानुवर्ती २. अग्निकल्पः

### २. व्याकरणांशाः

अ) **अधः दत्तानां पदानां सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।**

१. सहानुजः २. विश्रुतोऽभूत् ३. पर्यचरत् ४. मासश्च ५. त्वेवम्

आ) **अधः दत्तानां पदानां सन्धिं कृत्वा सन्धिनामानि लिखन्तु ।**

१. पित्र्वत् + च २. तेन + उक्तम् ३. प्राप्तौ + इह
४. सः + अहम् ५. तेषु + अधिकम्

इ) **अधः दत्तानां पदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।**

१. शिष्यमध्ये २. महर्षिः ३. उदरस्थम्
४. धनार्थिनी ५. मातुलभागिनेयौ ।

ई) **यथोचितं योजयन्तु ।**

| समस्तपदानि | समासनामानि |
|---|---|
| १. सहानुजः | अ) नञ् तत्पुरुषसमासः |
| २. जातक्रोधः | आ) तृतीयातत्पुरुषसमासः |
| ३. सूतपुत्रः | इ) बहुव्रीहिसमासः |
| ४. अमानुषीम् | ई) षष्ठीतत्पुरुषसमासः |

*	अधः दत्तानां समस्तपदानां विग्रहवाक्यानि अवगच्छन्तु ।

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| १. कृताकृतम् | कृतञ्च अकृतञ्च तत् |
| २. कृतापकृतम् | कृतञ्च अपकृतञ्च तत् |
| ३. भुक्ताभुक्तम् | भुक्तञ्च अभुक्तञ्च तत् |

उदा - 'कृताकृतम्' इति समासपदम्
- अस्य पदस्य विग्रहवाक्यम् ''कृतञ्च अकृतञ्च तत्'' इति ।
- अस्मिन् समासपदे पूर्वपदम् उत्तरपदञ्च विशेषणपदत्वेन विद्येते ।
- अतः अयं **विशेषणोभयपदकर्मधारयसमासः** इति ।

उ. अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।

१. पीतापीतम्	२. शीतोष्णम्
३. भोज्योष्णम्	४. मृदुमधुरम्

ऊ. पाठे एकविंश (२१)श्लोकान्तर्गतम् अलङ्कारं ज्ञात्वा तस्य लक्ष्यलक्षणसमन्वयं कुर्वन्तु ।

**परियोजनाकार्यम्**

अष्टावक्रवृत्तान्तं नाटकरूपेण परिवर्त्य पाठशालायां प्रदर्शयन्तु ।

**एकं सत् विप्रा बहुधा वदन्ति ।**

SCERT TELANGANA

तृतीयः भागः

# १०. अवतारिका

## पठन्तु, विचिन्त्य वदन्तु

संस्कृतदिनोत्सवसन्दर्भे एकः उपन्यासकः एवम् उपन्यस्यति ।

संस्कृतवाङ्मयं द्विधा विभज्यते लौकिकमलौकिकञ्चेति । अलौकिकवाङ्मयं केनापि मानवेन न लिखितम् । ऋषिभिः ये विषयाः दिव्यदृष्ट्या दृष्टाः ते विषयाः अस्मिन् वाङ्मये प्रस्तुताः । ते श्रोत्रपरम्परया प्रसारिताः । ते एव वेदाः, उपनिषदः, ब्राह्मणानि आरण्यकानि च । लौकिकवाङ्मये काव्यनाटक - पुराणेतिहासादयः प्रस्तुताः भवन्ति । तेषु आदौ रामायणं प्रथमस्थानमलङ्करोति ।

**प्रश्नाः**

१. संस्कृतवाङ्मयस्य विभागौ कौ ?

२. अलौकिकवाङ्मयम् कथं प्रसारितम् ?

३. अलौकिकवाङ्मये के प्रस्तुताः भवन्ति ?

## उद्देश्यम्

* छात्रेषु साहित्याभिरुचेः उत्पादनम् ।
* चम्पूप्रक्रियायाः वैशिष्ट्यावबोधनम् ।
* अवतारिकायाः स्वरूपस्य अवगमनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

भोजराजसार्वभौमः षष्ठशताब्दीयः इति केचन, एकादशशताब्दीयः इति केचन ऐतिहासिकाः वदन्ति । एषः क्री श. १००५-१०५४ मध्यकाले धारानगरं राजधानीं कृत्वा मालवदेशं पालितवानिति चारित्रिकाधाराः सन्ति। अयं प्रान्तः इदानीं मध्यप्रदेशराज्ये इन्डोर इत्याख्यनगरस्य समीपे अस्ति ।

एषः स्वयं महाकविः कविपोषकश्च । अनेन रचिताः श्रृङ्गारप्रकाशम्, सरस्वतीकण्ठाभरणम् इति प्रामाणिकौ अलङ्कारग्रन्थौ प्रसिद्धौ । अपि च योगशास्त्रम् - धर्मशास्त्रम् - अश्वशास्त्रम् - नीतिशास्त्रम् - वास्तुः - ज्योतिषमित्यादिविषयेषु पञ्चाशीतिः (८५) ग्रन्थाः अनेन महाकविना लिखिताः इति प्रसिद्धिः। एषः प्रस्तुतपाठ्यांशः भोजविरचितात् चम्पूरामायणत् गृहीतः । चम्पूः गद्यपद्यात्मकं काव्यम् ।

## प्रवेशिका

'वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना' इत्युक्तरीत्या साक्षात् वेद एव रामायणरूपेण वाल्मीकिमुखात् आदिकाव्यं भूत्वा विनिर्गतः । अस्य आदिकाव्यस्य रचनासन्दर्भं प्रस्तुतपाठ्यांशमुखेन अवगच्छन्तु ।

लक्ष्मीं तनोतु नितरामितरानपेक्ष-
मंघ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरन्धरं नः ॥ १ ॥

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः ।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ॥२॥

वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशै -
स्तृप्तिं करोमि कथमप्यधुना बुधानाम् ।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति जनः पितॄणाम् ॥३॥

### विचिन्त्य वदन्तु

* 'चम्पूप्रबन्धरचनायाः' विश्लोषणं कुर्वन्तु ।
* तृतीयश्लोके उक्तानि साम्यानि सोदाहरणं विवृण्वन्तु।

वाचं निशम्य भगवान्स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम् ॥४॥

तत्र कञ्चन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं, निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निस्ससार सरस्वती ।



मा निषाद प्रतिष्ठां त्वमगमश्शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥५॥

तदनु समयोचितकृत्यं निर्वर्त्य स्वाश्रमं प्रति गतवति भगवति वाल्मीकौ -

वाणीविलासमपरत्र कृतोपलम्भ -
मम्भोजभूरसहमान इवाविरासीत् ।
आभाति यत्कृतिरनेकविधप्रपञ्च -
व्याजेन्द्रजालविधिसाधकपिञ्छिकेव ॥६॥

ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यमलोकेऽपि स्ववृत्तं प्रकाशयितुम् किल, भवन्तमेवोपतिष्ठमानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यांतरधात् ।

अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्वा प्रतीच्या ।
शुभमतनुतकाव्यं स्वादु रामायणाख्यं
मधुमयभणितीनां मार्गदर्शी महर्षिः ॥७॥

**विचिन्त्य वदन्तु**

* 'मा निषाद प्रतिष्ठाम्' इत्यस्मिन् श्लोके स्थितः निगूढार्थः कः ?

एनं प्रबन्धं प्रयोक्तुं कस्समर्थ इति चिन्तामुपगतवति भगवति वाल्मीकौ.

उपागतौ मिलितपरस्परोपमौ
बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ ।
विचक्षणौ विविधनरेन्द्रलक्षणौ
कुशीलवौ कुशलवनामधारिणौ ॥८॥

एतौ मुनिः परिगृह्य स्वां कृतिमपाठयत् । तौ पुनरितस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृतो निजं चरितं गातुमन्वयुङ्क्त । ततश्च

छन्दोमयीनां निलयस्य वाचा
मन्ते वसन्तौ मुनिपुङ्गवस्य
एतौ कुमारौ रघुवीरवृत्तं
यथाक्रमं गातुमुपाक्रमेताम् ।।९।।

**विचिन्त्य वदन्तु**

* 'करबदरसमानम्' इतिवत् रामायणे वाल्मीकिकृतं वृत्तान्तमेकं वदन्तु ।

**भावाः**

१. अस्माकं शीघ्रमेव अशेषवाञ्छितार्थसिद्धिं ददातु इति सर्वविघ्नविनाशकस्य विनायकस्य कमलमिव राजमानं विघ्नपर्वतभेदनवज्रतुल्यं पादयुग्मं नमामि ।
(इति कविः आदौ देवप्रार्थनां करोति)

२. गद्यपद्यानां मेलनेन वीणावेणुप्रभृतिवाद्यमिश्रिता गीतिका इव प्रस्तूयमाना प्रबन्धरचना मनोहरा भवति । अतः मदीया इयं चम्पूरचना कविमार्गवर्तिनां सहृदयानाञ्च सुखाय भवतु ।

३. वाल्मीकिना रचिता रामकथा रामायणनाम्ना कीर्तिता । यथा लोके सगरात्मजानां स्वर्गलोकप्रापणाय भगीरथेन महता प्रयत्नेन आनीतैः गङ्गाजलैः इतरे जनाः पितृतर्पणं कुर्वन्ति तथा अहमपि प्रसिद्धरचनां रामायणगाथाम् अधुना लिखित्वा बुधानां तृप्तिं करोमि । एवम् आदिकविं सभक्तिश्रद्धं स्तौति ।

४. आदिकविः वाल्मीकिः नारदस्य वचनानि श्रुत्वा अनन्तरं माध्याह्निकक्रियां कर्तुम् पापनाशिनीं तमसानदीं प्राप ।

**वचनम्** - तत्र नदीतीरे वृक्षशाखायां स्थितक्रौञ्चमिथुनात् एकं पक्षिणं व्याधेनानुविद्धं दृष्ट्वा वाल्मीकेः मुखात् अप्रयत्नेन छन्दोमयवाणी निरगच्छत् ।

५. १. "हे निर्भाग्य ! व्याध ! काममोहितात् कौञ्चमिथुनादेकं क्रौञ्चं हतवानिति हेतोः त्वमपि शीघ्रमेव म्रियस्व" - इति वाल्मीकिः शशाप ।

२. हे मानिषाद विष्णुरूप ! राम ! रावणमण्डोदरीरूपमिथुनात् (सीतापहरादिना) काममोहग्रस्तं रावणं हतवानसि । अतः सुप्रतिष्ठावान् आदर्शभूतश्च भव इति रामायणविषयः प्रस्तुतः ।

६. वाल्मीकिमहर्षेः शोकापनोदनार्थं ब्रह्मा आविरासीत् । महर्षेः सकाशात् वाण्याः विलासः ऐन्द्रजालसाधकपिञ्छिकेव आसीत् ।

**वचनम्** - वाल्मीकिना सेवितो ब्रह्मा तं रामचरितं लेखितुम् आदिदेश !

७. ब्रह्मणः आज्ञया वाल्मीकिः, करे स्थितबदरीफलमिव समग्रं रामचरितम् अवलोक्य ज्ञात्वा च मधुमयवचोभिः मनोज्ञतया रचितवान् ।

SCERT TELANGANA

**वचनम्** - वाल्मीकिः एनं प्रबन्धं प्रयोक्तुं (पठितुं) कः समर्थः इति चिन्तयति ।

८. तदा अन्योन्यसादृश्यवन्तौ यमलत्वात् परस्परतुल्यरूपौ सकलविद्याकोविदौ श्राव्यकण्ठस्वरसम्पन्नौ, विचक्षणौ राजलक्षणयुक्तौ, कुशलवनामधारिणौ महर्षेः समीपं प्राप्तौ ।

९. छन्दोमयवाचां निलयस्य वाल्मीकेः शिष्यौ एतौ कुमारौ कुशलवौ श्रीरामचरितम् छन्दोमयवचोभिः सानुजस्य रामस्य समीपे उपदेशानुसारं पठितुं उपक्रान्तवन्तौ ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. इतरपद्यभागपाठ्यांशानाम् अपेक्षया अस्य पाठ्यांशस्य विशेषः कः ?

२. ''मानिषाद प्रतिष्ठां......'' इत्यस्मिन् श्लोके मुख्यतया द्वौ अर्थौ द्योत्येते । तौ अधिकृत्य चर्चां कुर्वन्तु ।

३. एषः पाठ्यभागः भोजकृतचम्पूरामायणकाव्यस्य अवतारिका । अस्य पाठस्याधारेण अवतारिकायाः स्वरूपं वदन्तु ।

**आ) श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

वाचं निशम्य भगवान्स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम् ॥

१) कवीनां प्रथमः कः ?
२) कः नारदस्य वचः श्रुतवान् ?
३) तमसा कीदृशी ?
४) महर्षिः किमर्थं तमसानदीम् अवाप ?

**इ) श्लोकं पठित्वा पञ्चप्रश्नान् लिखन्तु ।**

अजरामरवत्प्राज्ञः विद्यामर्थञ्च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. वाल्मीकिमुखादागतस्य प्रथमश्लोकस्य भावं लिखन्तु ।

२. लवकुशौ कथमास्ताम् ?

३. वाल्मीकिः रामकथां कस्य आज्ञया रचितवान् ?

४. वाल्मीकिः कीदृशं काव्यं लिखितवान् ?


SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि लिखन्तु ।

१. आदिकविः इत्यस्य कः अर्थः ? वाल्मीकिः किमर्थम् आदिकविरिति परिगण्यते ?

२. "गङ्गाजलैः भुविभगीरथयत्नलब्धैः ............." इत्यस्मिन् विषये कवेः अभिप्रायः कः?

३. "मा निषाद" इत्यस्य श्लोकस्य द्वितीयार्थं स्वीयवाक्यैः लिखन्तु ।

४. करबदरसमानं नाम किम् ? रामायणरचनासन्दर्भे एतत् वचनं कथं युक्तं भवतीति लिखन्तु ।

### आ) अधः दत्तस्य प्रश्नस्य समाधानं निबन्धरूपेण लिखन्तु ।

पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

### इ) सर्जनात्मकतया प्रशंसात्मकतया च समाधानानि लिखन्तु ।

१. भवता पठितस्य कस्यचन ग्रन्थस्य प्राशस्त्यं विवृण्वन् मित्राय पत्रं लिखतु ।

२. गद्यपद्यात्मकस्य चम्पूकाव्यस्य पठनेन भवतः स्पन्दनं कथमस्तीति सहच्छात्रैः चर्चयतु ।

## III. भाषांशाः

### १.पदजालाभिवृद्धिः

### अ) अधः दत्तानां पदानां समानार्थकपदानि मञ्जूषातः चित्वा लिखन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| श्रीः | प्राचेतसः | भागीरथी | विभावरी | ब्राह्मी, | सरसिजयोनिः |
| भारती | क्षपा | मन्दाकिनी | आदिकविः | सम्पद्, | परमेष्ठी |
| निशा | वाणी | त्रिपथगा | कवीनां प्रथमः | अम्भोजभूः | धनम् |

**उदा** - लक्ष्मीः - श्रीः, सम्पत्, धनम्

१. गङ्गा २. सरस्वती ३. वाल्मीकिः

४. ब्रह्मा ५. तामसी

### आ) यथोचितं योजयन्तु ।

| अ | आ |
|---|---|
| १. पुङ्गवः | अ) अप्सु जायते इति |
| २. अम्भोजः | आ) मननात् |
| ३. मुनिः | इ) वल्मीकात् भवः इति |
| ४. नारदः | ई) पुमान् गौरिव |
| ५. वाल्मीकिः | उ) नारं (ज्ञानं) ददाति इति |

SCERT TELANGANA

## २. व्याकरणांशाः

अ) सन्धिविच्छेदनं कृत्वा सन्धिनामानि लिखन्तु ।

१. कथमप्यधुना    २. निस्ससार

३. पिञ्छिकेव    ४. विघ्नाद्रिभेदः

आ) सन्धिं कृत्वा सन्धिनामानि लिखन्तु ।

१. कः + समर्थः

२. कलिता + इव

३. ततः + च

४. गङ्गाजलैः + भुवि

५. इव + आविरासीत्

इ) अधः दत्तस्य श्लोकपादस्य गणविभजनं कृत्वा वृत्तलक्षणं लिखन्तु ।

* 'वाचं निशम्य भगवान् स तु नारदस्य ।'

* अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च अवगच्छन्तु ।

**सरसिजमनुविद्धं शैवलेनापि रम्यं**

| | | | | |
|---|---|---|---|---|
| I I I | I I I | U UU | I U U | I U U |
| सरसि | जमनु | विद्धंशै | वलेना | पिरम्यं |
| न | न | म | य | य |

- अत्र क्रमशः न - न - म - य - य इतीमे गणाः वर्तन्ते ।
- एवं वर्तन्ते चेत् ''मालिनी'' छन्दः भवति ।

'मालिनी' वृत्तस्य लक्षणम् -

१. श्लोके पादचतुष्टयं भवति ।

२. प्रतिपादं क्रमेण न न म य य इतीमे गणाः भवन्ति ।

३. सप्तमस्थाने - अष्टमस्थाने च यतिर्भवति ।

४. प्रतिपादं पञ्चदशाक्षराणि भवन्ति ।

लक्षणम् - **ननमयययुतेयं मालिनी भोगिलोकैः**

ई) एतत्पाठगतस्य सप्तमश्लोकस्य गणविभजनं कृत्वा छन्दोवृत्तं सूचयन्तु ।

उ) अस्मिन् पाठे प्रथमश्लोकान्तर्गतम् अलङ्कारं ज्ञात्वा लिखन्तु ।



SCERT TELANGANA

*    **अधः दत्तं वाक्यं पठन्तु, अवगच्छन्तु ।**

"स्यात् मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृतिः

**अर्थः** - एकः मल्लः भटः, अन्यः भटः (प्रतिमल्लः) उभौ युद्धं कुरुतः ।

तदा उभौ मल्लौ हुंकारं कृतवन्तौ ।

**मल्लः** - भटः - शत्रुः - हुंकारः

**प्रतिमल्लः** - भटः - शत्रुः - हुंकारः

**विवरणम्** - एकः जनः उत एकः विषयः यथा अन्येन जनेन उत अन्येन विषयेण दर्पणदर्शनमिव वर्ण्यते । सः **दृष्टान्तालङ्कारः** ।

लक्षणम् - चेत् बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।

ऊ) **अधः दत्तस्य वाक्यस्य प्रश्नानामाधारेण अलङ्कारनिरूपणं कुर्वन्तु ।**

**कर्णार्जुनौ युद्धे परस्परं शराघातं कुर्वन्तौ पराक्रमं दर्शयतः ।**

१. कौ युद्धं कुर्वन्तौ स्तः ?

२. तौ कं प्रदर्शयतः ?

३. तौ युद्धे कैः आघातं कुर्वन्तौ स्तः ?

४. दृष्टान्तांशाः के के सन्ति ?

ऋ) **अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ?**

**"जाता चेत्प्राक् प्रभा भानोस्तर्हि याता विभावरी"**

### परियोजनाकार्यम्

रामायणस्थानां काण्डानां नामानि विलिख्य कक्ष्यायां प्रदर्शयन्तु ।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**

SCERT TELANGANA

# गद्यभागः

SCERT TELANGANA



# साहित्यस्वरूपम्

❋ काव्यानि गद्य - पद्य - चम्पूरूपेण त्रिधा विभक्तानि । काव्यानाम् दृश्यकाव्यानि, श्रव्यकाव्यानि इति अपरविभागोऽपि वर्तते ।

❋ दृश्यकाव्यं नाम द्रष्टुं योग्यं काव्यम्, नाटकमित्यादिकम् ।
श्रव्यकाव्यं नाम श्रोतुं योग्यं काव्यम्, महाकाव्यादिकम् ।
नाटकमित्यस्य संस्कृते रूपकमिति व्यवहारः ।

❋ दशप्रकाराणि रूपकाणि सन्ति । तेषु नाटकमन्यतमम् । तद्यथा -

''नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश'' ॥



SCERT TELANGANA

**प्रथमः भागः**

# १. हिरण्यकवृत्तान्तः

## पठन्तु, विचिन्त्य वदन्तु

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ।।

**प्रश्नाः**

१. अस्मिन् श्लोके किं वर्णितम् ।
२. धनवान् कीदृशं गौरवं प्राप्नोति ?
३. काञ्चनं के के गुणाः आश्रयन्ति ?

## उद्देश्यम्

* कथाप्रसङ्गेन नैतिकमूल्याभिवर्धनम् ।
* जीवने धनस्य प्राधान्यावबोधनम् सद्विनियोगाभ्यासस्य वर्धनं च ।

## नेपथ्यम्

एकदा लघुपतनकहिरण्यकौ आहारमलभमानौ लघुपतनकस्य मित्रस्य मन्थरस्य निवासभूमिम् गतवन्तौ । तत्र मन्थरेण अतिथिसत्कारान् प्राप्तवन्तौ । अनन्तरं मन्थरः स्वीयवृत्तान्तं कथयति । तदनन्तरं हिरण्यकेन कथितः स्वीयपूर्ववृत्तात्तः एव अत्र पाठ्यांशः ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

नीतिकथाग्रन्थेषु पञ्चतन्त्रम् उत्कृष्टग्रन्थः । पञ्चतन्त्रस्य रूपान्तरग्रन्थ एव हितोपदेशः । पञ्चतन्त्रे याः कथाः वर्तन्ते ताः एव अत्रापि उपनिबद्धाः । ''पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते इति कविः एव वदति । अस्मिन् ग्रन्थे कथाकथनापेक्षया उपदेशात्मकता एव आधिक्येन अस्ति । अतः एव ''हितोपदेशः'' इति नाम सार्थकम् तस्य । पञ्चतन्त्रस्यापेक्षया अत्र भाषा सरला भवति । हितोपदेशस्य कर्ता नारायणपण्डितः । एषः महाकविः धवलचन्द्रस्य आस्थानकविरासीत् । हितोपदेशे मित्रलाभः, सुहृत्भेदः, विग्रहः, सन्धिः इति चत्वारः विभागाः सन्ति ।

## प्रवेशिका

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥**

इति भावयन् हिरण्यकः स्वनिवासं परित्यज्य अरण्यमागच्छत् । असौ हिरण्यकः कः ? स्वनिवासं त्यक्त्वा किमर्थम् अरण्यमागतः? एतान् विषयान् प्रस्तुतपाठ्यांशं पठित्वा अवगच्छन्तु ।

चम्पकाभिधानायां नगर्यां परिव्राजकाऽऽवसथः। तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहञ्च (हिरण्यकः) तदन्नमुत्प्लुत्योत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः । तेन सह नानाकथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् । तं तथाविधं दृष्ट्वा वीणाकर्ण उवाच - '' सखे! किमिति मम कथाविरक्तोऽन्यासक्तो भवान् ?''



चूडाकर्णेनोक्तम् । ''भद्र ! नाऽहं विरक्तः, किन्तु पश्याऽयं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति'' । वीणाकर्णो नागदन्तमवलोक्याऽऽह - 'कथमयं मूषिकः स्वल्पलोऽप्येतावद्दूरमुत्पतति । तदत्र केनापि कारणेन भवितव्यम् । क्षणं विचिन्त्य परिव्राजकेनोक्तम् । कारणञ्चाऽत्र धनबाहुल्यमेव प्रतिभाति ।

SCERT TELANGANA

यतः -

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥

ततः खनित्रमादाय तेन परिव्राजकेण विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम् । ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितः ।

ततस्तेनोक्तम् -

अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्या सर्वशून्या दरिद्रता ॥

अपरञ्च

दारिद्र्यान्मरणाद्वाऽपि दारिद्र्यमवरं स्मृतम् ।
अल्पक्लेशेन मरणं दारिद्र्यमतिदुस्सहम् ॥

एतत्सर्वमाकर्ण्य मयाऽऽलोचितम् । ''ममाऽत्राऽवस्थानमयुक्तमिदानीम् । तथा चोक्तम् -

अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे ।
मनस्विनो दरिद्रस्य वनादन्यत् कुतस्सुखम् ॥

यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् । यतः -

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥

यच्चात्रैव याच्ञया जीवनं तदप्यतीव गर्हितम् । यतः -

वरं विभवहीनेन प्राणैस्सन्तर्पितोऽनलः ।
नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः ॥

तत्किमहं परपिण्डेनाऽऽत्मानं पोषयामि ? कष्टं भोः ! तदपि द्वितीयं मृत्युद्वारम् । अन्यच्च -

रोगी चिरप्रवासी परान्नभोजी पराऽऽवसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥

इत्यालोच्याऽपि लोभात् पुनरपि तदीयमन्नं गृहीतुं ग्रहमकरवम् ।

तथा चोक्तम् -

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितश्चाऽचिन्तयम् - 'लुब्धो ह्यसन्तुष्टो नियतमात्मद्रोही भवति ।

**विचिन्त्य वदन्तु**

* हिरण्यकः अतिदीर्घम् उत्प्लवितुं शक्नोतीति अपठाम खलु ! तथैव प्रत्येकमपि प्राणिनः समीपे काचन महती शक्तिः वर्तते । तां शक्तिमुद्दिश्य वदन्तु ।
* 'धनवान् बलवान् लोके' एतद् विषयम् अङ्गीकुर्वन्ति नवेति सहेतुकं विवृण्वन्तु ।

SCERT TELANGANA

सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥

तदत्राऽवस्थोचितकार्यपरिच्छेदः श्रेयान् ।

को धर्मो भूतदया किं सौख्यमरोगिता जन्तोः ।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥

तथा च -

त्यजेदेकं कुलस्याऽर्थे ग्रामस्याऽर्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्माऽर्थे पृथिवीं त्यजेत् ॥

इत्यालोच्याऽहं निर्जनवनमागतः ।

यतः -

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयः पत्रफलाम्बुभक्षणम् ।
तृणानि शय्या वसनञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥

ततोऽस्मत्पुण्योदयादनेन मित्रेणाऽहं स्नेहाऽनुवृत्त्याऽनुगृहीतः अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

यतः -

संसारविषवृक्षस्य द्वे फले अमृतोपमे ।
काव्यामृतरसास्वादः सङ्गमः सज्जनैस्सह ॥

मन्थर उवाच -

युष्माभिरतिसञ्चयः कृतः । तस्यायं दोषः । शृणु -

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तटाकोदरसंस्थानां परीवाह इवाऽम्भसाम् ॥

यतः

निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति ।
परार्थभारवाहीव स क्लेशस्यैव भाजनम् ॥

तथा चोक्तम् -

दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥

न देवाय न विप्राय न बन्धुभ्यो न चात्मने
कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥

उक्तञ्च

''कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः ॥ इति ॥

**विचिन्त्य वदन्तु**

संसार इति वृक्षस्य अमृतसमे द्वे मधुरफले काव्यामृतरसास्वादनम्, सज्जनसाङ्गत्यम् इति कथितं खलु ! तत्कथमिति समर्थयन्तु ।



SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. मतिमान् किं न प्रकाशयेत् । किमर्थमिति वदन्तु ।

२. लोभेन किं भवति ?

३. 'धनमूलमिदं जगत्' इति किमर्थं वदन्ति ?

**आ) अधः दत्तानां पद्यानां भावं स्वीयवाक्यैः लिखन्तु ।**

१. लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥

२. को धर्मो भूतदया किं सौख्यमरोगिता जन्तोः ।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥

३. उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तटाकोदरसंस्थानां परीवाह इवाऽम्भसाम् ॥

**इ) अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥

१. संसारस्य लक्षणं किम् ?

२. यः मरणं प्राप्नोति सः कः भवति ?

३. कः यथार्थतया जातः इत्युच्यते ?

४. श्लोकस्य शीर्षिकां सूचयन्तु ।

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. वीणाकर्णः धनबाहुल्यविषये किमुक्तवान् ?

२. धनग्रहणानन्तरम् कीदृशं हिरण्यकम् अपश्यत् चूडाकर्णः ?

३. बुद्धिमान् कान् न प्रकाशयेत् ?

४. संसारविषवृक्षस्य रसवत्फले के ?


SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. सन्मित्ररहितस्य जीवनं शून्यं किमर्थम् ?

२. वयं धनिनः कथं भवामः ?

३. अगर्वं ज्ञानं दुर्लभं किमर्थम् ?

४. कृपणस्य धनं कथं नष्टं भवति ?

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. कथां स्वीयवाक्यैः लिखन्तु ।

२. कस्य जीवनं मरणसदृशं भवति ?

### इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. पाठस्थानि सूक्तिवाक्यानि लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

జింక, నక్క స్నేహితులు. ఒకనాడు జింక వేటగాని వలలో చిక్కుకుంది. కొద్ది సేపటికి నక్క జింక వద్దకు వచ్చింది. నక్క వలను మాటిమాటికి చూచి జింకతో 'ఈ బంధం చాలా గట్టిది.' ఈ ఉచ్చుత్రాళ్ళు నరాలతో చేసినట్టివి. నేడు ఆదివారం. కనుక పళ్ళతో ఎట్లు తాకగలను ? నీవు మనస్సులో వేరుగా దలంపనిచో నేను చెప్పేది విను. రేపు వేకువనే వస్తాను. అప్పుడు నేను చేయదగినది ఏదో తెలుపు." అని వెళ్ళిపోయింది.

## III. भाषांशाः

### १. पदजालभिवृद्धिः

### अ) अधः दत्तानां पदानां मूलधातुप्रत्ययान् उदाहरणानुसारं विभजन्तु ।

उदा - आगतः - आङ् + गम् + क्त

१. प्राप्तः  २. आविष्कृतः  ३. विरक्तः  ४. उपकृतः  ५. समायातः

### आ) रेखाङ्कितपदानि उपयुज्य नूतनवाक्यानि लिखन्तु ।

१. लोभात् सम्मोहः भवति ।  २. मूर्खस्य नास्ति औषधम् ।

३. सज्जनसङ्गः उत्तमः ।  ४. राजा विप्राय धनं ददाति ।

५. परिव्राजकः विवरं खनित्वा धनं गृहीतवान् ।

### इ) पदव्युत्पत्तिम् अभिज्ञाय क्रमेण योजयत ।

| क | ख |
|---|---|
| धनम् | धरति विश्वम् |
| मूषिकः | अनन्ति जीवन्त्यनेन लोकाः |
| धर्मः | मनोरिमे |
| मानवाः | धिनोति, प्रीणयतीति |
| अनलः | मुष्णाति अन्नादिकम् |

## २ व्याकरणांशाः

### अ) सन्धिं कृत्वा - सन्धिनाम निर्दिशन्तु ।

१. ततः + ते  २. इति + आलोच्य  ३. तदपि + अनुचितं
४. केन + अपि  ५. चूडाकर्णः + नाम

### आ) अधः दत्तानि वाक्यानि पठित्वा विवरणम् अवगच्छन्तु ।

१. हिमालयात् गङ्गा प्रभवति ।  गम् + गा = गंगा = गङ्गा  (ं + ग = ङ्ग)
२. पञ्चतन्त्रस्य कर्ता विष्णुशर्मा ।  पम् + च = पंच = पञ्च  (ं + च = ञ्च)
३. अकुण्ठितदीक्षावान् सफलःभवति । अकुम् + ठित= अकुंठित = अकुण्ठित
(ं + ठि = ण्ठि)
४. बालकाः आनन्देन क्रीडन्ति ।  आनम् + देन = आनंदेन = आनन्देन (ं + दे = न्दे)
५. अम्बा पुत्राय मिष्टान्नं ददाति ।  अम् + बा = अंबा =अम्बा  (ं + बा = म्बा)

**उपरितनेषु रेखङ्कितपदेषु अनुस्वरस्य वर्गीयव्यञ्जने परे वर्गीयपञ्चमाक्षरस्य आदेशः जातः।**

सूत्रम् **अनुस्वारस्य यथि परसवर्णः ।**

**अर्थात् अनुस्वारस्य यथि (य व र ल ञ भ ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त  क प) परसवर्णः आदेशः भवति ।**

### इ) अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

**1. सन्धिं कुर्वन्तु ।**

१. अं + कितः
२. अं + चितः
३. कं + ठः
४. शां + तः
५. गुं + फितः

**2. विसन्धिं कुर्वन्तु ।**

१. सन्धिः
२. पम्पा
३. पाण्डवाः
४. अभ्यङ्गनम्
५. पाञ्चजन्यः

### ई) अधः दत्तानां पदानां विग्रहवाक्यानि लिखित्वा समासनामानि लिखन्तु ।

१. अपुत्रः  २. प्रत्यहम्  ३. तृषार्तः
४. प्रियसुहृद्  ५. अर्थनाशम्

**परियोजनाकार्यम्**

हितोपदेशकथासु कृतज्ञतायाः महत्त्वं वर्णयन्तः कथामेकां लिखन्तु ।

**प्रथमः भागः**

# २. देशभूषा हि भारती

**पठन्तु, विचिन्त्य वदन्तु**

अवनितलं पुनरवतीर्णा स्यात् संस्कृतगङ्गाधारा
धीरभगीरथवंशोऽस्माकं वयं तु कृतनिर्धाराः ॥ वयं ॥
या माता संस्कृतिमूला यस्या व्याप्तिः सुविशाला
वाङ्मयरूपा सा भवतु लसतु चिरं सा वाङ्मूला
सुरवाणीं जनवाणीं कर्तुं यतामहे कृतशूराः
धीरभगीरथवंशोऽस्माकं वयं तु कृतनिर्धाराः ॥ वयं ॥

**प्रश्नाः**

१. गीतचरणमिदं किं वर्णयति ?
२. संस्कृतभाषा कीदृशी ?
३. सुरवाणीं जनवाणीं कर्तुं भवन्तः किं कुर्वन्ति ?
४. संस्कृतभाषासदृशीम् अन्यभाषामधिकृत्य वदन्तु ।

**उद्देश्यम्**

* नित्यजीवने संस्कृतभाषया व्यवहारः करणीयः इति लक्ष्यस्य अवगमनम् ।
* भाषा नाम न केवलं मानवजीवनसाधनमेव किन्तु सांस्कृतिकविकासस्य देशोन्नतेः च साधनमिति विषयस्य अवबोधनम् ।
* भाषां नित्यव्यवहारपथमानेतुम् आश्रयणीयानाम् उपायानाम् अभिज्ञानम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

पाठ्यभागोऽयं डा. विश्वासमहोदयेन विरचितात् ''भुवमानीता भगवद्भाषा'' नाम्नः कथानकात् सङ्गृहीतः । संस्कृतं भारतीयानां नित्यव्यवहारभाषां कर्तुं १९८१ वर्षतः संस्कृतसम्भाषणान्दोलने महोदयोऽयम् अग्रेसरः वर्तते। अयं कर्णाटकस्थे मङ्गलूरुनगरे निवसति। अनेन महोदयेन सरलसंस्कृतभाषया बहवो ग्रन्थाः, अनेकाः कथाः, नैकानि गीतानि च रचितानि ।

## नेपथ्यम्

क्री.पू. १०००-९०० कालावधौ जरूसलें नगरं राजधानीं कृत्वा इस्रेलूदेशे यहूद्य साम्राज्यमासीत्। तेषु दिनेषु यहूद्यसंस्कृतिः विशेषतया विकसिताऽभूत् । परं तत् पश्चात् बहवः विदेशीयाः देशमेतम् आक्रम्य शासनम् अकुर्वन् । यदा यहूद्य-संस्कृतिः पूर्णरूपेण विकसिता आसीत् । तदा इस्रेलूदेशे हीब्रूभाषा एव व्यवहारभाषा आसीत्। तदा यहूद्यानां सर्वेऽपि धार्मिकविधयः हीब्रूभाषया एव निरुह्यन्ते स्म । परं गच्छता कालेन यदा यहूद्याः इतरान् देशान् गतवन्तः तदा हीब्रूभाषा केवलं धार्मिकविधिषु शिष्टा अभवत् । ततश्च यहूद्यानां मनसि तादृशः कश्चन भावः उत्पन्नः यत् हीब्रूभाषा तन्निमित्तमेव उपयोक्तव्या न तु अन्यत्र इति । ''नित्यव्यवहारे पवित्रायाः हीब्रूभाषायाः उपयोगः पापाय'' इति धारणा तेषां समाजे रूढा अभवत् । अतः सार्वजनिकस्थले यदि कश्चित् हीब्रूभाषया वदति तर्हि सः अपराधित्वेन परिगण्यते स्म ।

एतादृशपरिस्थितौ हीब्रूभाषायाः पुनरुज्जीवनेन यहूद्यानां संस्कृतेः पुनरुत्थानं साधयितुं शक्यते इति विचारितवत्सु अग्रगण्यः आसीत् एलिसर् बेन्यहूदः ।

## प्रवेशिका

बालस्य बेन्झियोनः नामकस्य नेत्रे अश्रुपूर्णे जाते । तदा अश्रुनयनः स च बालः मातरम् एव वदति अम्बे ! इतः परं कदाप्यहं पित्रा विरोधं स्थापयानि ।

पितृजीवनलक्ष्यसाधने सहयोगी भवेयम् इति एवं बेन्झियोनः किमर्थं सम्भाषितवान्? तस्य बालकस्य पितुः लक्ष्यं किम् ? इत्येतान् विषयान् पाठ्यांशं पठित्वा जानन्तु ।

SCERT TELANGANA

एलिसरः यदा त्रयोदशवर्षीयः आसीत् तदा सः तस्य मातुलगृहे स्थित्वा विद्याभ्यासं करोति स्म । कदाचित् एलिसरः हीब्रूभाषया विरचितं ''राबिन् सन् क्रूसो'' नाम पुस्तकं रहसि पठन् तस्य मातुलेन गृहीतोऽभवत् । तदा कुपितः तस्य मातुलः ''पवित्रया भाषया लिखितम् अपवित्रकथानकं पठति। देवभाषाम् अपवित्रां कृतवतः भवतः इतःपरं नास्ति ममाश्रयः । भवदीयवस्तूनि गृहीत्वा इदानीमेव निर्गच्छतु इतः'' इति गर्जितवान् ।

निरुपायः एलिसरः स्वीयं वस्त्रद्वयं स्वीकृत्य ततः प्रस्थितः । एवं रूस्-देशतः प्रस्थितस्सः बहून् देशान् अटित्वा इस्रेलूदेशं समागत्य जेरूसलें नगरे वसति स्म । तस्मिन् समये एलिसरः ''मदीया हीब्रूभाषा व्यवहारात् दूरं गता अस्ति । अत एव मदीया यहूद्यसंस्कृतिः नष्टप्राया अस्ति । मम भाषा पुनः व्यवहारे प्रतिष्ठापयितव्या, येन मम संस्कृतिः रक्षिता भवेत् । एतदर्थं मया जीवनीयम् । मम जीवने इतोऽपि महत्तरं कार्यं नान्यत् किमपि भवितुमर्हति'' इत्यचिन्तयत् सः ।

कालान्तरे एलिसरः डेबोरा नाम्नीं तरुणीं परिणीतवान् । हिब्रूभाषायाम् अभिरुचिमती डेबोराऽपि कालक्रमेण तां प्रयत्नेन अशिक्षत ।

कदाचित् डेबोरया सह भाषमाणः एलिसरः तामेवमुवाच - प्रिये ! आवयोः जनिष्यमाणः पुत्रः हीब्रू मातृभाषी भवतु । द्विसहस्रवर्षाणामनन्तरं हीब्रूभाषामातृभाषी शिशुः अस्मद्गेहे जनिष्यति । भवती च प्रथमस्य हीब्रूमातृभाषिणः शिशोर्माता इति ख्यातिं प्राप्स्यति इति । तदैव सः 'जनिष्यमाणः शिशुः' नान्यां भाषां शृणुयादृते हीब्रूभाषायाः इति निर्णयमकरोत् ।

गच्छता कालेन डेबोरा गर्भवती अभवत् । क्रमशः सा आसन्नप्रसवा च सञ्जाता । तस्याः साहाय्यार्थं काचित् परिचारिका एलिसरेण नियुक्ता । ''शिशोः प्रसवसमये भवत्या कोऽपि शब्दः न करणीयः'' इति सा परिचारिका तेन कठोरं सूचिता च आसीत् । यतः सा हीब्रूभाषां न जानाति स्म । एलिसरस्य सूचनामनुसरन्ती सा मौनेनैव सर्वकार्याणि निरूढवती ।




१८८२ तमे वर्षे कस्मिंश्चित् सुदिने द्विसहस्रवर्षाणामनन्तरं सर्वप्रथमः हिब्रूमातृभाषिकः शिशुः तस्य गृहे जातः । जातस्य शिशोः कर्णे डेबोरा ''मत्पुत्रके''ति प्रथमं हीब्रूभाषाशब्दमेव उच्चारितवती ।

तेषु दिनेषु यहूद्येषु काचित् प्रथा आसीत्। यत् ''नवजातं पुंशिशुं यदि हस्ताभ्याम् उन्नीयते तर्हि सन्तानहीनाः महिलाः सन्ततिं प्राप्नुवन्तीति। तदनुसारम् अनेकाः तादृश्यः महिलाः नवजातशिशुमुन्नेतुम् एलिसरस्य गृहमागताः । परन्तु एलिसरः एकैकस्याः अपि हीब्रूभाषाज्ञानं परिशील्य एव शिशोरुन्नयने अवकाशं परिकल्पयामास । ताः

SCERT TELANGANA

सर्वाः निश्शब्दमाश्रित्य शिशुमुन्नीतवत्यः । यतः ताः हीब्रूभाषां न जानन्ति स्म । ततस्ताः नवजातशिशोः बेन् झियोनः इति नामकरणमकुर्वन् ।

बेन् झियोनः दिने दिने शनैः प्रवर्धमानः वर्षद्वयानन्तरं प्रथमं हीब्रूभाषाशब्दम् उच्चारितवान् । दम्पत्योः मुखे अपूर्वः हासः निर्गतः । ततः शुद्धया हीब्रूभाषया वदन्तं, हसन्तं रुदन्तं च पुत्रं दृष्ट्वा दम्पतीभ्यां ताभ्यां सार्थकता अनुभूता जीवने । एवम् एलिसरस्य पुत्रः बेन्झियोनः हीब्रूभाषया एव वदति इत्येषा वार्ता जेरूसलें नगरे सर्वत्र प्रसृता । तं विशिष्टं शिशुं द्रष्टुं बहवः जनाः एलिसरस्य गृहमागच्छन्ति स्म ।

एकस्मिन् दिने एलिसरस्य सुहृत् पिनेसूनामकः अवदत्- ''मित्र ! हीब्रूभाषायाः पुनरुज्जीवनाय भवता क्रियमाणं प्रयासम् अहमभिनन्दामि । भवदीये अस्मिन् युद्धे अहं सहकरोमि अपि । तथापि मित्र! एषः प्रयत्नः ज्येष्ठानामस्माकं भवतु । न तत्र शिशवः साधनत्वेन उपयोक्तव्याः । मुग्धमेनं शिशुं तत्र बलिपशुं मा करोतु । सः इदानीं हीब्रूभाषया वदति इति भवान् यत् चिन्तयति सा भ्रान्तिरेव । स तु श्रुतं पुनरुच्चारयति, प्रशिक्षितः शुक इव, तावदेव । शुकभाषितमात्रम् एतत् । द्विसहस्रवर्षेभ्यः अव्यवहृतया भाषया कस्यापि शिशोः अभिवर्धनं सर्वथा न शक्यम् । सर्वाभिव्यञ्जनसमर्थया भाषया केवलं शिशोः अभिवर्धनं भवति । फ्रेञ्च्, जर्मन्, रूस् इत्येतासु कामपि भाषां पाठयतु तम् । तया तं लालयतु, तस्मै गायतु, कथाः श्रावयतु, तेन पुष्पमिव विकसति तस्य अन्तरङ्गम् । अन्यथा सः मूर्खः एव भवति ।''

''नैव । न कदापि अन्यया भाषया सम्भाषणं करोमि अहं मम पुत्रेण सह । '' इति एलिसरः निष्ठुरतया समादधात् ।

''परन्तु मित्र ! तेन स्वपुत्रं बलिपशुं करोति भवान् ! यदि तथा करोति तर्हि न कोऽपि देवः तं शिशुं रक्षति । कृपया तं करुणया पश्यतु । यतः अस्मिन् प्रयत्ने तु कदापि सफलः न भविष्यति ।''

''यदि प्रथमपुत्रस्य विषये मम प्रयत्नः विफलः भविष्यति तर्हि अहं प्रयत्नमनुवर्तयिष्यामि द्वितीयस्य अपत्यस्य विषये । यदि तत्रापि विफलः भविष्यामि तर्हि अनुवर्तयिष्यामि तृतीयस्य, चतुर्थस्य चापि वा विषये । नाहं विरमामि यावत् सफलता न प्राप्येत'' इति एलिसरः दृढस्वरेण अवदत् ।

बालकः बेन्झियोनः गृहात् बहिः कदापि न प्रेष्यते स्म । गृहे एव सः स्वमातापितृभ्यां हीब्रूभाषां शृण्वन् तथैव वदन् वर्धमान आसीत् । एवं रूपेण वर्धमानः सः केवलं विद्यालयं प्रेष्यते स्म । परन्तु तत्र हीब्रूभाषायाः ऋते अन्यान् विषयान् अवगन्तुं नाशक्नोत् । गृहतः बहिर्गत्वा बालैस्सह क्रीडनमपि पित्रा निषिद्धमासीत् । एतैः कारणैः बेनझियोनस्य मनसि पितरि व्यतिरेकभावना समुत्पन्ना । अथ कदाचित् सायंसमये अष्टवर्षीयः सः गृहात् बहिर्गतः । बेन्झियोनः मित्रैस्सह क्रीडन्, दुष्टैः प्रेरितो भूत्वा ''पितृविषये

### विचिन्त्य वदन्तु

* 'मम भाषा पुनः व्यवहारे प्रतिष्ठापयितव्या, येन मम संस्कृतिः रक्षिता भवेत्' इति एलिसरः अवोचत् खलु ! तत्कथं सत्यमिति समर्थयन्तः वदन्तु ।
* स्वजातस्य बालस्य भाषाज्ञानाभ्यसनाय मातापितृभ्यां क्रियमाणानां प्रयत्नानां विश्लेषणं कुर्वन्तु ।

SCERT TELANGANA

प्रतीकारः कर्तव्यः'' इति निश्चयमकरोत् । ततः ते बालाः स्वगृहेभ्यः कुक्कुटाण्डानि दूषितानि शाकानि च सङ्गृहीतवन्तः । किञ्चित् कालानन्तरम् एलिसरः तेन मार्गेण गृहमागच्छन्नासीत् । यदा सः तेषां समीपमागतवान् तदा तस्योपरि झटिति चतसृभ्यः दिग्भ्यः ते अण्डानां, शाकानां शिलाखण्डानाञ्च वर्षणमकुर्वन्। तदा एलिसरस्य दृष्टिः गणमध्ये स्थितस्य बेनझियोनस्य उपरि निपतिता । आश्चर्येण स्तब्धः सः झटिति पुत्रं गृहीत्वा, आकर्षन् इव त्वरितपदैः गृहं प्राप्य निश्शब्दं स्वप्रकोष्टं प्रविश्य द्वारं कीलयित्वा छिन्नः कदलीस्तम्भ इव शय्यायां न्यपतत् । विदितवृत्तान्ता डेबोरा तस्यां रात्रौ पुत्रं विस्तरेण एलिसरस्य जीवनवृत्तान्तं तस्य लक्ष्यञ्च श्रावितवती । विस्मयावहम् अद्भुतं रोमाञ्चकं च तद्वृत्तान्तं शृतवतः बेन्झियोनस्य नेत्रे अश्रुपूर्णे जाते । तदा सः अहं ''न कदापि पितुः विरोधं करिष्यामि । अपि तु तस्य जीवनलक्ष्यसाधने सहयोगं करिष्यामि'' इति मातरं प्रति श्रुतवान् । तदनुसारं सः पितुः हिब्रूभाषोज्जीवनकार्ये सहभागी अभवत् ।

कालक्रमेण भाषोद्यमी एलिसरः बेन् यहूद्यः क्षयरोगग्रस्तः अभवत् । एलिसरस्य क्षयरोगः तस्य पत्न्यां डेबोरायामपि संक्रान्तः आसीत् । समयेऽस्मिन् एलिसरस्य माता फेगा विंशतिवर्षात्मकस्य दीर्घकालस्यानन्तरं पुत्रस्य समीपमागता । तादृशं क्षयरोगपीडितं तं दृष्ट्वा भावपूर्णा जाता सा पृष्टवती ''अयि पुत्र ! कथमस्ति भवान् ? अपि कुशलम् ? कथमेवं कृशः अस्ति ? परन्तु एलिसरः किञ्चित् कालं मौनमेव आश्रितवान् आसीत् । ततः सः हीब्रूभाषया अवदत् अम्ब ! पवित्रायाम् अस्याम् इस्रेल् भूम्यां भवत्याः पुत्रः हीब्रूभाषया एव भाषते । न तु अन्यभाषया ! क्षन्तव्योऽहम् । यदि मया सह वार्तालापः करणीयः तर्हि भवत्या हीब्रूभाषाभ्यासः करणीयः । ततः आरभ्य विस्मृत्यापि हीब्रूभाषाभिन्नं शब्दमेकमपि फेगा नोच्चारयामास । अनन्तरं षष्ठिवर्षीयया तया वृद्धया हीब्रूभाषायाः 'अ आ इ ई' इत्यभ्यासः आरब्धः ।

एलिसरः स्वेन चाल्यमानया ''दि डीर्'' पत्रिकया विभिन्नदेशेषु वसतां यहूद्यानां सङ्घटनम् आरभत । सङ्घटनेऽस्मिन् यहूद्येभ्यः प्रेरणादानाय तेन प्रदत्तं ध्येयवाक्यमासीत् ''नैषः स्वप्नः यदि भवान् इच्छती''ति (If you will it, it is no dream) तदेव ध्येयवाक्यं वदन्तः असङ्ख्याः यहूद्याः स्वकार्यक्षेत्रं इस्रेलदेशम् अवातरन् । तदनन्तरं १८९७ तमे वर्षे स्विट्जर्लैण्डदेशे बासल् नगरे ''विश्वस्य यहूद्यसम्मेलनम्'' अत्यन्तं यशस्वितया निर्वर्तितम् अभवत् । तदनन्तरं बहवः यहूद्याः विभिन्नदेशेभ्यः इस्रेलदेशमागत्य निवासमारब्धवन्तः जेरूसलें नगरे । परं हीब्रूभाषायाः उपयोगे नूतनशब्दानामभावेन तैः क्लेशः अनुभूयते स्म। एतेन कारणेन एलिसरः आधुनिककालानुगुणम् मया नूतनशब्दाः स्रष्टव्याः इति निश्चयमकरोत् । तदनुगुणं सः पूर्णमपि तस्यावधानं कोषनिर्माणकार्ये केन्द्रितं कृतवान् । एलिसरस्य पञ्चाशत्तमे जन्मदिनोत्सवे अद्वितीयस्य कोशस्य प्रथमभागः ''प्राचीनहीब्रूभाषायाः आधुनिकहीब्रूभाषायाश्च समग्रः शब्दकोशः'' इति नाम्ना प्रकाशितः अभवत्। कालेऽस्मिन् तस्य पुत्रः बेन्झियोनोऽपि युवा भूत्वा बालानां कृते पत्रिकासञ्चालनप्रयत्नमकरोत् । तथा तस्य पितुः ''दि डीर'' पत्रिकानिर्वहणे हीब्रूभाषायाः पुनरुज्जीवनकार्येषु च सोत्साहं सहभागी अभवत् ।



SCERT TELANGANA

कोषनिर्माणकार्येऽस्मिन् व्यग्रो भूत्वा एलिसरः तस्य स्वास्थ्यं निर्लक्षीकृतवान् इत्यतः तस्य क्षयरोगः कासश्च संवर्धितौ जातौ । हीब्रूभाषायाः तथा यहूद्यसंस्कृतेश्च पुनरुज्जीवने स्वमूल्यं जीवनं भगवते पुष्पमिव समर्पितवतः एलिसरः बेन् यहूद्यस्य श्वासः स्थगितोऽभवत् १९२२ तमे वर्षे तस्य अस्वास्थ्यकारणेन । यद्यपि तदनीमपि देशस्य स्वातन्त्र्यं न प्राप्तमासीत् तथापि हीब्रूभाषा तु पर्याप्तमात्रेण व्यवहारपथमागता आसीत् । बाल्यादारभ्य एलिसरेण दृष्टः कश्चन अद्भुतः स्वप्नः ''द्विसहस्रवर्षेभ्यः व्यवहारपथात् दूरं गतायाः हीब्रूभाषायाः व्यवहारपथे पुनरानयनम्'' इत्येषः पूर्णतया साकारतां गतः अभवत् । अनतिकाले एव इस्रेलदेशे ब्रिटिशराजप्रतिनिधिः स्यामुयलः आज्ञां प्रसारितवान् यत् ''इङ्ग्लिष्, अरबिक्, हीब्रू इत्येताः तिस्रः भाषाः देशस्य अधिकृताः व्यवहारभाषाः'' इति ।

**विचिन्त्य वदन्तु**

* 'न निश्चितार्थात् विरमन्ति धीराः' इति विषयः एलिसरस्य विषये कथं समन्वितो भवतीति विवृण्वन्तु ।
* 'संस्कृतभाषायाः पुनर्वैभव - सम्पादनार्थं भारतदेशस्य कृते 'एलिसरसदृशः' मानवः आवश्यकः इति समर्थयन्तः भाषन्ताम् ?

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।**

१. 'मम संस्कृतिः नष्टप्राया जाता' इति एलिसरः किमर्थं चिन्तयति ?

२. मातृभाषायाः निर्वचनं किं भवितुमर्हति ?

**आ) अधः दत्तानि वाक्यानि पाठे अन्विष्य अनुच्छेदस्य सङ्ख्यां लिखन्तु ।**

१. शुकभाषितमात्रम् एतत् ।

२. नाहं विरमामि यावत् सफलता न प्राप्येत ।

३. मम भाषा पुनः व्यवहारे प्रतिष्ठापयितव्या ।

४. परन्तु हिब्रूभाषायाः उपयोगे नूतनशब्दानामभावेन तैः क्लेशः अनुभूयते स्म ।

५. भवदीये अस्मिन् युद्धे अहं सहकारं करोमि ।

**इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

रामायणे समुद्रतरणार्थं वानरवीराः शिलाः आनीय अपूर्वं सेतुं रचितवन्तः । तत्र कश्चन चिक्रोडः ''अहमपि रामकार्ये भागस्वामी भवेयम्'' इति चिन्तयित्वा समुद्रं सिकतया पूरयितुं प्रयतते । इदानीं भारते संस्कृतभाषाप्रचारोद्यमः प्रचलति । बहवः कार्यकर्तारः समर्पितजीवनाः संस्कृतप्रचारं कुर्वन्ति । तत्र वयमपि चिक्रोड इव भागं स्वीकृत्य धन्याः भवेम ।

१. किमर्थं वानरवीराः सेतुं रचितवन्तः ?

२. चिक्रोडः किं चिन्तयित्वा सिकतां पूरयति ?

३. इदानीं भारते कः उद्यमः प्रचलति ?

४. कीदृशाः संस्कृतप्रचारं कुर्वन्ति ?

५. वयं कथं धन्याः भवेम ?

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. एलिसरस्य मातुलः तं किमर्थं गृहात् बहिष्कृतवान् ?

२. हिब्रूभाषायाः विषये यहूद्यानां भावना कीदृशी आसीत् ?

३. पाठस्यास्य रचयितुः परिचयं लिखन्तु ।

४. बेन्झियोनः किमर्थं स्वपितरि द्वेषभावनां प्राप्तवान् ?

५. कदाचित् एलिसरस्य मित्रं पिनेस् 'भवत्पुत्रं बलिपशुं मा करोतु' इत्युक्तवान् । तदा एलिसरः तं किमुक्तवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ) अधः दत्तयोः प्रश्नयोः लघुसमाधाने स्वीयवाक्यैः लिखन्तु ।**

१. "शिशोः प्रसवसमये भवत्या कोऽपि शब्दः न करणीयः" इति एलिसरः परिचारिकां कठोरं सूचयति । तत्र कारणं किम् ?

२. बालाः व्यवहारभाषां कथं शिक्षन्ते ?

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. शिशोः मातृभाषाधिगमने मातापितॄणां प्राधान्यं कीदृशम् ?

२. भाषाम् व्यवहारपथम् आनेतुं के के उपायाः आश्रयणीयाः ?

**इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. 'नित्यव्यवहारे हीब्रूभाषां वदन्तु' इति यथा एलिसरः प्रचारं कृतवान् । तथा भवन्तः अपि संस्कृतविषये जनान् सूचयितुं करपत्रमेकं रचयन्तु ।

२. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

నా పేరు మామిడి చెట్టు. నా ఆకులను ఉత్సవాలలో, శుభకార్యాలలో తోరణాలుగా చేసి ద్వారాలకు కడతారు. ఎందుకంటే నా ఆకులలోఎక్కువ సమయం ప్రాణవాయువైన ఆమ్లజనిని విడుదల చేసే సామర్థ్యం ఉంది. కావున పిల్లలూ మీ పాఠశాలలో ఉత్సవాలు జరిగేటప్పుడు నా ఆకులను తోరణాలుగా కట్టండి. ఎక్కువ ఆమ్లజనిని పొందండి.

SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **अधः दत्तानां पदानां समानार्थकपदानि मञ्जूषातः संगृह्य लिखन्तु ।**

१. भाषा　　२. वार्तालापः　　३. माता
४. अलङ्कारः　　५. परिणयः　　६. आशयः

| | | | | |
|---|---|---|---|---|
| अम्बा | सल्लापः | लक्ष्यम् | मण्डनम् | भारती |
| भूषणम् | वाणी | उद्वाहः | जननी | भूषा |
| सम्भाषणम् | विवाहः | जनयित्री | संवादः | पाणिग्रहणम् |

आ) **अधः दत्तैः पदैः वाक्यानि रचयन्तु ।**

१. यदा - तदा　　२. यदि - तर्हि　　३. यत् - तत्
४. यः - सः　　५. यतः - ततः

इ) **'ल्यप् - क्तवतु' प्रत्ययान्तपदानि पाठात् चित्वा लिखन्तु ।**

### २. व्याकरणांशाः

(अ) **सन्धिं कृत्वा सन्धिनाम लिखन्तु ।**

१. कः + चन　　२. इतः + अपि　　३. पुनः + उत्थानम्
४. उत् + चारणम्　　५. मम + आश्रयः

(आ) **सन्धिं विभज्य सन्धिनाम लिखन्तु ।**

१. वर्धमान आसीत्　　२. पुत्रकेति
३. सङ्घटनेऽस्मिन्　　४. उन्नीतवत्यः

* **अधः दत्तानि उदाहरणानि परिशीलयन्तु ।**

१. त्वं + करोषि -
त्व + ङ् + करोषि = त्वङ्करोषि / त्वंकरोषि　　(ं = ङ्)
२. सं + पृक्तौ =
स + म् + पृक्तौ = सम्पृक्तौ / संपृक्तौ　(ं = म्)
३. देवालयं + गच्छति
देवालय + ङ् + गच्छति = देवालयङ्गच्छति / देवालयं गच्छति　　(ं = ङ्)
उपरि दत्तानां पदानां परिशीलनेन इदम् अवगम्यते ।


SCERT TELANGANA

पदान्ते स्थितस्य अनुस्वारस्य (ं) वर्गीयव्यञ्जनेषु परेषु तत्तद्वर्गस्य पञ्चमो वर्णः विकल्पेन भवति, एवं यवलेषु परेषु, यँ, वँ, लँ इत्यादेशोऽपि विकल्पेन भवति ।

"एषः परसवर्णसन्धिः"

| अनुस्वारः (ं) + वर्गीयव्यञ्जनानि, य, व, ल = ङ्, ञ्, ण्, न्, म्, यँ, वँ, लँ |
|---|

### इ) अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

#### 1. सन्धिं कुर्वन्तु ।

१. अं + चितः
२. अं + कयति
३. रिपुं + जयति
४. रुचिकरं + भोजनम्
५. अलङ्करं + करोति
६. वाहनं + चलति
७. विमानं + डयते

#### 2. विसन्धिं कुर्वन्तु ।

१. चञ्चलः
२. कलङ्कः
३. वञ्चनम्
४. सञ्चितः
५. पाण्डित्यम्
६ पर्णम्पतति
७. ग्रामङ्गच्छति
८. कथमयम्मूषिकः
९. मन्दम्मन्दम्
१०. डम्बरम्

**परियोजनाकार्यम्**

तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे छात्राः उपाध्यायेन सह परस्परं च संस्कृतेनैव सम्भाषणं कुर्वन्ति । भवन्तः अपि एकस्मिन् दिने पूर्णतया भवतां मित्रैः सह, अध्यापकेन सह, परिवारजनैः सह च संस्कृतेन एव भाषणं कृत्वा भवतां अनुभूतीः विलिख्य कक्ष्यायां प्रदर्शयन्तु ।

**दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।**

SCERT TELANGANA

प्रथमः भागः

# ३.शकुन्तलायाः पतिगृहप्रस्थानम्

## पठन्तु, विचिन्त्य वदन्तु

शिक्षकः - भोः छात्राः ! ह्यः कक्ष्यां प्रति न आगताः किमर्थम् ?

छात्राः - महोदय ! वयं सर्वे पाठशालावार्षिकोत्सवाय सन्नद्धतां कर्तुं गतवन्तः।

शिक्षकः - कीदृशी सन्नद्धता भोः ।

छात्राः - गीतानां, नृत्यानाम् अभ्यासं कुर्मः । इतोऽपि किं करणीयमिति चिन्तामग्नाः स्मः । अन्यत् किमपि अस्ति चेत् कृपया सूचयन्तु ।

शिक्षकः - अस्ति खलु ! विश्वप्रसिद्धेन महाकविकालिदासेन विरचितं अभिज्ञानशाकुन्तलम्। अस्मिन् पितापुत्र्योः, प्रकृतिमानवयोः च अविनाभावसम्बन्धः इत्याद्यनेकविषयाः सुष्ठु निरूपिताः। ईदृशम् उत्तमनाटकम् अभिनेतुं शक्नुमः खलु !

छात्राः - धन्यवादाः महोदय ! वयं इतोऽपि एतन्नाटकम् अधिकृत्य ज्ञातुम् इच्छामः ।

शिक्षकः - एवं तर्हि अहमद्य अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्कं पाठयिष्यामि।

**प्रश्नाः**

१. पर्वदिनसन्दर्भे भवन्तः पाठशालायां कान् सांस्कृतिककार्यक्रमान् कुर्वन्ति?

२. कालिदासेन किं नाटकं विरचितम् ?

३. शाकुन्तलनाटके के विषयाः वर्णिताः ?

## उद्देश्यम्

* कालिदासनाटकरचनाशैल्याः अवगमनपुरस्सरं मानवसम्बन्धानां महत्त्वावबोधनम् ।
* स्नेहप्रवृत्त्या, वात्सल्येन सत्साङ्गत्यसम्पादनस्य आवश्यकतानिरूपणम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

## कविपरिचयः

कविकुलगुरुः कालिदासः संस्कृतकविषु अग्रगण्यः । कालिदासः रघुवंशम्, कुमारसम्भवम् इति महाकाव्यद्वयम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलमिति त्रीणि दृश्यकाव्यानि, ऋतुसंहारः, मेघसन्देशः इति खण्डकाव्यद्वयञ्च रचितवान् । अस्य कालः क्री.पू. प्रथमशताब्दिः इति विमर्शकाः वदन्ति । उपमालङ्कारप्रयोगे कालिदासः अद्वितीयः । अत एव 'उपमा कालिदासस्य' इत्युक्तिः प्रसिद्धिर्जाता । कालिदासस्य कवित्वम् अतिमधुरं मनोहरं च। अस्य नाटकेषु सम्भाषणरीतिः अतीव सरला मधुरा च । अभिज्ञानशाकुन्तलम् विश्वप्रख्यातं नाटकम् । अत एव

"काव्येषु नाटकं रम्यम् नाटकेषु शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्" ।

इति श्लोकः प्रथितोऽभूत् ।

प्रस्तुतपाठ्यभागः अभिज्ञानशाकुन्तले चतुर्थाङ्कात् गृहीतः ।

## प्रवेशिका

शकुन्तलादुष्यन्तयोः गान्धर्वविधिना परिणयोऽभूदिति विदित्वा कण्वः तां दुष्यन्तस्य समीपं प्रेषयितुम् उद्युक्तः सन् अतीव मनोवेदनां प्राप्नोति । अयं कण्वः कः ? केषां विषये बाधामनुभूतवान् किमर्थञ्च ? इत्यादिविषयान् प्रस्तुतपाठ्यांशे पठित्वा जानन्तु ।

प्रियंवदा - (प्रविश्य) - अनसूये ! त्वरस्व, त्वरस्व शकुन्तलायाः प्रस्थानकौतूहलं निर्वर्तयितुम् ।

अनसूया - (सविस्मयम्) सखि ! कथमिव ।

प्रियंवदा - शृणु, इदानीमेव सुखसुप्तिकाप्रच्छननिमित्तं शकुन्तलायाः सकाशं गताऽस्मि ।

अनसूया - ततस्ततः ?

प्रियंवदा - तत एनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकण्वेनैवमभिनन्दितं - 'वत्से ! दिष्ट्या धूमावरुद्धदृष्टेरपि यजमानस्य पावकस्यैव मुखे आहुतिर्निपतिता । सुशिष्यपरिदत्तेव विद्या अशोचनीयाऽसि मे संवृत्ता । अद्यैव 'त्वामृषिपरिरक्षितां कृत्वा भर्तुः सकाशं विसर्जयामि' इति ।

अनसूया - सखि ! केन पुनराख्यातस्तातकण्वस्याऽयं वृत्तान्तः ?

प्रियंवदा - अग्निशरणं प्रविष्टस्य किल शरीरं विना छन्दोमय्या वाचा ।

अनसूया - (सविस्मयं) कथमिव ?

प्रियंवदा - शृणु ।

दुष्यन्तेनाऽऽहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥

अनसूया - (प्रियंवदामाश्लिष्य) सखि ! प्रियं मेऽप्रियम् । किन्त्वद्यैव शकुन्तला नीयते इति उत्कण्ठासाधारणं परितोषमनुभवामि ।

प्रियंवदा - सखि ! वयं कथमपि उत्कण्ठां विनोदयिष्यामः । सा इदानीं तपस्विनी निवृत्ता भवतु ।

अनसूया - तेन हि एकस्मिंश्चूतशाखावलम्बिते नारिकेलसमुद्धके एतन्निमित्तमेव मया कालहरणक्षमा केसरमालिका निक्षिप्ता तिष्ठति । तदिमां नलिनीपत्रसङ्गतां कुरु । यावदस्या अहमपि गोरोचनां, तीर्थमृत्तिकां, दूर्वाः, किसलयानि, मङ्गलसमालम्भनं विरचयामि ।
(प्रियंवदा - तथा करोति)
(अनसूया - निष्क्रान्ता)

(नेपथ्ये - )

(गौतमि ! आदिश्यन्तां शार्ङ्गरव - शारद्वतमिश्राः - 'वत्सां शकुन्तलां नेतुं सज्जीभवन्तु भवन्तः' इति ।)

प्रियंवदा - अनसूये ! त्वरस्व त्वरस्व । एते खलु हस्तिनापुरगामिन ऋषयः शब्दायन्ते ।

अनसूया - (समालम्भनहस्ता प्रविश्य) सखि ! एहि गच्छावः । (इति परिक्रामतः ।)

प्रियंवदा - (विलोक्य) एषा सूर्योदये एव कृतमज्जना प्रतीष्टनीवाराभिः स्वस्तिवाचनिकाभिः तापसीभिरभिनन्द्यमाना तिष्ठति शकुन्तला तदुपसर्पाव एनाम् । (इत्युभे तथा कुरुतः)
(ततः प्रविशति यथानिर्दिष्टव्यापारा सपरिवारा शकुन्तला)

शकुन्तला - (भगवतीःवन्दे)

गौतमी - जाते ! भर्तुर्बहुमानसुखहेतुकं देवीशब्दमधिगच्छ ।

तापस्यः - वीरप्रसविनी भव ।
(इत्याशिषो दत्त्वा गौतमीवर्जं सर्वा निष्क्रान्ताः)

सख्यौ - (उपगम्य) समज्जनं ते भूतम् ।

शकुन्तला - स्वागतं प्रियसख्योः । इतो निषीदतम् ।

सख्यौ - (उपविश्य) हला ! ऋजुका तावद्भव, यावत्ते मङ्गलसमालम्भनं कुर्वः ।

शकुन्तला - उचितमप्येतदद्य बहु मन्तव्यं, यतो दुर्लभं तावत् पुनर्मे प्रियसखीमण्डनं भविष्यति ।
(इति बाष्पं विसृजति)

सख्यौ - सखि ! न युक्तं मङ्गलकाले रोदितुम् । (इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)

प्रियंवदा - सखि ! आभरणार्हं ते रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्य्यते ।
(प्रविश्य आभरणहस्तः)

ऋषिकुमारः - इदमलङ्कारजातम् । अलङ्क्रियतामायुष्मती ।
(सर्वाः - विलोक्य विस्मिताः)

SCERT TELANGANA

## विचिन्त्य वदन्तु

* 'अग्निगर्भां शमीम् इव' इति कालिदासः उक्तवान् खलु ! कथनमिदं प्रस्तुतसन्दर्भे कथमन्वेतीति विवृण्वन्तु ।
* शकुन्तलायै आश्रमवासिनः भिन्नप्रकारैः आशीषः दत्तवन्तः खलु ! तत् विवृण्वन्तु ।

गौतमी - वत्स ! हारीत ! कुत इदमासादितम् ?

हारीतः - तातकण्वप्रभावात् ।

गौतमी - किं मानसी सिद्धिः ?

हारीतः - न खलु ! श्रूयताम् । तत्रभवता कण्वेन वयमाज्ञप्ताः 'शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरते' ति ।

प्रियंवदा - (शकुन्तलां विलोक्य) हला ! कोटरसम्भवापि मधुकरी पुष्करमध्वेव अभिलषति ।

गौतमी - जाते ! अनयाऽभ्युपपत्त्या सूचिता - 'भर्तुर्गेहे अनुभवितव्या राजलक्ष्मीः' ।
(शकुन्तला - लज्जां नाटयति ।)

हारीतः - यावदिमां वनस्पतिसेवामभिषेकार्थं मालिनीमवतीर्णाय तत्रभवते कण्वाय निवेदयामि
(इति निष्क्रान्तः)

अनसूया - (चिन्तयित्वा विलोक्य च) ! सखि ! अननुभूतभूषणोऽयं जनः कथं त्वामलङ्करोतु । चित्रपरिचयेनेदानीं तेऽङ्गेष्वाभारणविनियोगं कुर्वः ।

शकुन्तला - जानामि वां निपुणत्वम् ।
(सख्यौ - नाट्येनाऽलङ्कारान् विनियुञ्जाते ।)
(ततः प्रविशति स्नानोत्तीर्णः कण्वः)

कण्वः - (विचिन्त्य)
यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥
(इति निष्क्रान्तः)

सख्यौ - हला शकुन्तले ! अवसितमण्डनाऽसि, साम्प्रतं परिधेहि क्षौमयुगलम् ।
(शकुन्तला उत्थाय नाट्येन परिधत्ते ।)

गौतमी - जाते ! एष ते आनन्दबाष्पपरिवाहिना लोचनेन परिष्वजमान इव गुरुरुपस्थितः । तत्समुदाचारं प्रतिपद्यस्व ।
(शकुन्तला - सव्रीडं वन्दनां करोति ।)

कण्वः - वत्से !
ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पूरुमेवाप्नुहि ॥

गौतमी - जाते ! वरः खल्वेषः, नाऽऽशीः ।

कण्वः - वत्से ! इतः सद्यो हुतानग्नीन् प्रदक्षिणीकुरुष्व ।
(सर्वे - तथा कारयितुं परिक्रामन्ति ।)

कण्वः - वत्से ! प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व नु ते शार्ङ्गरव शारद्वतमिश्राः?

शिष्यौ - (प्रविश्य) भगवन् ! इमौ स्वः ।

कण्वः - वत्सौ ! भगिन्याः पन्थानमादेशयतम् !

शिष्यौ - इत इतो भवति ।

(सर्वे - परिक्रामन्ति ।)

कण्वः - भो भोः ! संनिहितवनदेवतास्तपोवनतरवः ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नाऽऽदत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।

(सर्वे - सविस्मयमाकर्णयन्ति ।)

शार्ङ्गरवः - (कोकिलशब्दं सूचयित्वा ) भगवन् !

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ।।

गौतमी - जाते ! ज्ञातिजनस्निग्धाभिरनुज्ञातगमनाऽसि तपोवनदेवताभिः, तत्प्रणम भगवतीः ।

शकुन्तला - (सप्रणामं परिक्रम्य, जनान्तिकम्) हला प्रियंवदे ! आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमपदं परित्यजन्त्या दुःखादुःखेन चरणौ मे पुरोन्मुखौ न निपततः ।

प्रियंवदा - न केवलं त्वमेव तपोवनविरहकातरा, त्वयोपस्थितवियोगस्य तपोवनस्याप्यवस्थां प्रेक्षस्व तावत् ।

उद्गीर्णदर्भकबला मृगी परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रूणीव लताः ।।

शकुन्तला - (स्मृत्वा) तात ! लताभगिनीं तावन्माधवीमामन्त्रयिष्ये ।

कण्वः - वत्से ! अवैमि ते तस्यां सौहार्दम् । इयं सा दक्षिणेन पश्य ।

शकुन्तला - (उपेत्य, लतामालिङ्ग्य) लताभगिनि ।

(चूतसङ्गताऽपि) प्रत्यालिङ्गतामितो गतैः शाखामयैर्बाहुभिः । अद्यप्रभृति दूरवर्तिनी खलु ! ते भविष्यामि । तात! अहमिवेयं त्वया चिन्तनीया ।

कण्वः - वत्से !

सङ्कल्पितं प्रथममेव मया त्वदर्थे
भर्तारमात्मसदृशं स्वगणैर्गताऽसि ।
अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः
कान्तं समीपसहकारमिमं करिष्ये ।।

तदितः प्रस्थानं प्रतिपद्यस्व ।

SCERT TELANGANA

शकुन्तला - (सख्यावुपेत्य -) हला ! एषा द्वयोरपि वां हस्ते निक्षेपः । (इति बाष्पं विसृजतः) (अयं जन इदानीं कस्य हस्ते समर्पितः?)



कण्वः - अनसूये ! प्रियंवदे ! अलं रुदितेन । ननु भवतीभ्यामेव शकुन्तला स्थिरीकर्तव्या । (इति सर्वे परिक्रामन्ति ।)

शिष्यौ - भगवन् ! 'ओदकान्तं स्निग्धोऽनुगम्यते' इति श्रूयते । तदिदं सरसीतीरम् । अत्र नः सन्दिश्य प्रतिगन्तुमर्हसि ।

कण्वः - तेन हीमां क्षीरिवृक्षच्छायामाश्रयामः । (सर्वे - तथा नाटयन्ति)

कण्वः - किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपं सन्देष्टव्यम् ? (इति चिन्तयति)

कण्वः - वत्स ! शार्ङ्गरव ! इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्याऽभिधातव्यः ....।

शार्ङ्गरवः - आज्ञापयतु भवान् ।

कण्वः - अस्मान्त्साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन -
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिश्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया,
भाग्याधीनमतः परं, न खलु तद्वाच्यं वधूबन्धुभिः ।।

शार्ङ्गरवः - गृहीतोऽयं सन्देशः ।

कण्वः - (शकुन्तलां विलोक्य.....) वत्से ! त्वमिदानीमनुशासनीयाऽसि वनौकसोऽपि वयं लौकिकज्ञा एव ।

शार्ङ्गरवः - भगवन् ! न खलु कश्चिदविषयो नाम धीमताम् ।

कण्वः - सा त्वमितः पतिगृहं प्राप्य -

शुश्रूषस्व, गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याऽऽधयः ।।

गौतमी वा किं मन्यते ?

SCERT TELANGANA

गौतमी - एतावान् खलु वधूजने उपदेशः । जाते एतत्खलु हृदये कुरु, मा विस्मरिष्यसि ।

कण्वः - वत्से ! एहि परिष्वजस्व मां, सखीजनञ्च ।

शकुन्तला - तात ! इत एव किं प्रियसख्यौ निवर्तिष्येते ।

कण्वः - वत्से ! इमे अपि प्रदेये, तन्न युक्तमनयोस्तत्र गन्तुम् ।
त्वया सह गौतमी गमिष्यति ।

शकुन्तला - (पितुरङ्कमाश्लिष्य)
(कथमिदानीं तातस्याऽङ्कात्परिभ्रष्टा - मलयपर्वतादुन्मूलिता चन्दनलतेव - देशान्तरे जीवितं धारयिष्यामि ?)

कण्वः - वत्से ! किमेवं कातराऽसि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैरस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवाऽर्कं प्रसूय च पावनं,
मम विरहजां न त्वं वत्से ! शुचं गणयिष्यसि ॥

शकुन्तला - (पितुः पादयोः पतित्वा ....) तात ! वन्दे ।

कण्वः - वत्से ! यदहमिच्छामि तदस्तु ते ।

शकुन्तला - (सख्यावुपगम्य.....) सख्यौ ! एतां, द्वे अपि मां सममेव परिष्वजेथाम् ।

सख्यौ - (तथा कृत्वा .......) सखि ! यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत्तदाऽस्य इदमात्मनो नामधेयाऽङ्कितमङ्गुलीयकं दर्शयिष्यसि

शकुन्तला - अनेन वां सन्देशेन कम्पितं मे हृदयम् ।

सख्यौ - सखि ! मा बिभेहि । अतिस्नेहः पापशङ्की ।

शार्ङ्गरवः - भगवन् ! दूरमधिरूढः सविता, तत्त्वरयाऽत्रभवतीम् ।

शकुन्तला - (भूयः पितुरङ्कमाश्लिष्य, आश्रमाभिमुखीभूय च....)
तात ! कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये ?

कण्वः - वत्से !

भूत्वा चिराय चतुरन्तमहीसपत्नी,
दौष्यन्तिमप्रतिरथं तनयं प्रसूय ।
तत्संनिवेशितधुरेण सहैव भर्त्रा
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥

गौतमी - (कण्वं प्रति) जाते ! परिहीयते ते गमनवेला, तन्निवर्त्तय पितरम् । अथवा चिरेणापि एषा न निवर्तिष्यते । तन्निवर्तय भवान् ।

कण्वः - वत्से ! उपरुध्यते मे तपोऽनुष्ठानम् ।

शकुन्तला - तपश्चरणव्यापारेण निरुत्कण्ठस्तातः, अहं पुनरुत्कण्ठभागिनी संवृत्ता ।

**विचिन्त्य वदन्तु**

* 'गृहिणीपदम्' अलङ्कर्तुं तत्कालीनस्त्रीभिः कीदृशकार्याणि करणीयानि इति कण्वः चिन्तितवान् ?

SCERT TELANGANA

कण्वः - वत्से ! मामेवं जडीकरोषि । (निःश्वस्य) -
अपयास्यति मे शोकः, कथं नु वत्से ! त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥
गच्छ । शिवास्ते सन्तु पन्थानः ।

(इति निष्क्रान्ताः)

(शकुन्तलया सह गौतमी - शार्ङ्गरव - शारद्वतमिश्राः)

सख्यौ - (चिरं विचिन्त्य, सकरुणं) हा धिक् ! हा धिक् ! अन्तरिता शकुन्तला वनराजिभिः ।

कण्वः - (सनिःश्वासम्....) अनसूये ! प्रियंवदे ! गता वां सहचरी । निगृह्य शोकावेगं मामनुगच्छतम् ।
(सर्वे प्रस्थिताः)

उभे - तात ! शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।

कण्वः - स्नेहप्रवृत्तिरेवं दर्शिनी । (सविमर्शं परिक्रम्य)
हन्त भोः ! शकुन्तलां पतिगृहे विसर्ज्य लब्धमिदानीं स्वास्थ्यम् ।

कुतः - अर्थो हि कन्या परकीय एव,
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥
(इति निष्क्रान्ताः सर्वे)

**विचिन्त्य वदन्तु**

* आधुनिककाले विवाहविधिः तथा वध्वोः पतिगृहप्रेषणम् इत्यादयः कार्यक्रमाः कथं क्रियन्ते ?

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।**

१. ''काव्येषु नाटकं रम्यम्'' इति किमर्थं वदन्ति ?
२. शकुन्तलायाः पतिगृहगमनसमये आश्रमजन्तूनां स्थितिः कीदृशी आसीत् ?

**आ) श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्
वैक्लब्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुखैर्नवैः ।

१. एनं श्लोकं कः उक्तवान् ?
२. का पतिगृहं यास्यति ?
३. कण्वस्य कण्ठः कथमभूत् ? दर्शनं कथमभूत् ?
४. अरण्यौकसः इत्यस्य अर्थः कः ?



SCERT TELANGANA

**इ) अधः दत्तम् अनुच्छेदं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

एतच्छ्रुत्वा हिरण्यकः (मूषिकः) चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । तत्र चित्रग्रीव उवाच - मित्र ! मामैवं कुरु । प्रथममस्मदाश्रितानामेतेषां तावत् पाशान् छिन्दि । मम पाशान् पश्चात् छेत्स्यसि । हिरण्यकोऽप्याह - अहमल्पशक्तिः दन्ताश्च मे कोमलाः । तदेतेषां पाशान् छेत्तुं, कथं समर्थो भवामि । तद्यावन्मे दन्ताः न त्रुट्यन्ति तावत्तव पाशं छिनद्मि । तदन्तरमप्येतेषां बन्धनं यावच्छक्यं छेत्स्यामि इति । चित्रग्रीव उवाच । अस्त्वेवं, तथापि यथाशक्ति बन्धनमेतेषां खण्डय । ''आत्मपरित्यागेनापि यदाश्रितानां परिरक्षणं नीतिवेदिनां सम्मतम् ।

१. हिरण्यकः किमर्थमागतवान् ?

२. चित्रग्रीवः हिरण्यकं प्रति किमुक्तवान् ?

३. हिरण्यकः किं समाधानं दत्तवान् ?

**(ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. 'सुशिष्यपरिदत्तेव विद्या अशोचनीयासि मे संवृत्ता' इति प्रियंवदा किमर्थमुक्तवती ?

२. कण्वः वनदेवतास्वरूपान् तरून् उद्दिश्य किमुक्तवान् ?

३. गौतम्या शकुन्तलायै दत्तः आशीर्वादः कः ?

४. कण्वः शकुन्तलां किमुपदिष्टवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. पतिगृहे वधूः कथं व्यवहरेत् ?

२. प्रियंवदा शकुन्तलायाः स्वगृहत्यागसमये प्रकृतेः अवस्थां कथं वर्णयति ?

३. नाटके शकुन्तला वृक्षरक्षणे श्रद्धाम् अकरोत् । भवान् / भवती वृक्षरक्षणाय किं करोति ?

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. कण्वपात्रस्य वैशिष्ट्यं लिखन्तु ?

२. पतिगृहप्रापणसमये लोके सामान्यजनैः अनुभूयमानं दुःखं वर्णयन्तु ।

**इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. अस्मिन् पाठे विद्यमानानि सूक्तिवाक्यानि सङ्गृह्य लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

అపజయాలను లక్ష్యపెట్టకు. అవి వాటిల్లడం సహజం. ఈ అపజయాలు జీవితానికి అలంకారప్రాయాలు. ఇవి లేని జీవితమూ ఒక జీవితమేనా? పోరాటానికి సంసిద్ధం చేసేవి ఈ అపజయాలే కదా. ఇవే జీవితసౌరభాలు కాబట్టి ఈ పొరపాట్లను లెక్కించ వద్దు. అపజయాలచే నిరుత్సాహపడకండి. లక్ష్యసిద్ధికై వేయిసార్లు పోరాడండి. వెయ్యిసార్లు ఓటమి వాటిల్లినా, ఇంకొకసారి మళ్ళీ ప్రయత్నించండి.



SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **अधः रेखाङ्कितपदानां समानार्थकपदानि मञ्जूषातः चित्वा तानि उपयुज्य नूतनवाक्यानि रचयन्तु ।**

| वृक्षाः | कुटीरेषु | दृष्ट्वा | पुत्रीम् | नेत्रम् |
|---|---|---|---|---|

१. सर्वस्य लोचनम् शास्त्रम् ।

२. तरवः हि प्राणभूताः भूतले ।

३. कण्वः वत्सां शकुन्तलाम् उपादिशत् ।

४. ऋषयः पुरा उटजेषु वसन्ति स्म ।

५. तापसाः प्रकृतेः सौन्दर्यम् विलोक्य अमोदन्त ।

आ) **पाठं पठित्वा अधः दत्तानि पदानि विवृण्वन्तु ।**

१. वधूजनोपदेशः २. शिवास्ते सन्तु पन्थानः ३. ओदकान्तं स्निग्धोऽनुगम्यते ।

### २. व्याकरणांशाः

(अ) **अधः दत्तपदानां सन्धिं / सन्धिविच्छेदं कृत्वा सन्धिनामानि लिखन्तु ।**

१. दृष्टेः + अपि २. त्वयि + अस्याः ३. ययातेः + इव

४. आहुतिर्निपतिता ५. स्निग्धोऽनुगम्यते

(आ) **अधः दत्तेभ्यः पदेभ्यः उपसर्ग - धातुप्रत्ययान् विभज्य लिखन्तु ।**

| | पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| उदा - | निक्षिप्ता | नि | क्षिप् | क्त |

१. संस्पृष्टम् २. विलोक्य ३. निक्षिप्य ४. परिक्रम्य ५. निश्वस्य

(इ) **अधः दत्तानां पदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।**

१. अग्निगर्भाम् २. संयमधनाः ३. सपत्न्यः ४. लज्जावनतमुखी

* **अधः दत्तविवरणं पठन्तु, अवगच्छन्तु ।**

**बालकः श्लोकं पठति ।**

उपरितनवाक्ये विद्यमानानां कर्तृ-कर्म-क्रियापदानां विषये भवन्तः पूर्वकक्ष्यायां ज्ञातवन्तः। अयं प्रयोगः सकर्मककर्तरि प्रयोगः इत्यपि ज्ञातवन्तः ।

SCERT TELANGANA

* **अधः दत्तं वाक्यं परिशीलयन्तु ।**

| | | |
|---|---|---|
| बालकेन | श्लोकः | पठ्यते । |
| **कर्ता** | **कर्म** | **क्रियापदम्** |

- वाक्येऽस्मिन् कर्तृपदं तृतीयाविभक्तौ अस्ति ।
- कर्मपदं प्रथमाविभक्तौ अस्ति ।
- क्रियापदम् आत्मनेपदिवत् भासते । क्रियापदं कर्मपदम् अनुसरति ।
- अतोऽयं **'कर्मणिप्रयोगः'** इति उच्यते ।

यस्मिन् प्रयोगे कर्मपदस्य प्राधान्यं भवति सः कर्मणिप्रयोगः ।

कर्मणिप्रयोगे कर्मपदं यस्मिन् वचने भवति क्रियापदं तस्मिन्नेव वचने भवति ।

* **अधः दत्तानि वाक्यानि परिशीलयन्तु ।**

| **कर्तरिप्रयोगः** | - | **कर्मणिप्रयोगः** |
|---|---|---|
| १. छात्रः परीक्षां लिखति | - | छात्रेण परीक्षा लिख्यते । |
| २. क्रीडाकारः क्रीडां क्रीडति | - | क्रीडाकारेण क्रीडा क्रीड्यते । |
| ३. यात्रिकः ग्रामं गच्छति | - | यात्रिकेण ग्रामः गम्यते । |

* **अधः दत्तानि क्रियापदानि अवगच्छन्तु ।**

| | | | | | |
|---|---|---|---|---|---|
| क्रीडति | - | क्रीड्यते | लिखति | - | लिख्यते |
| गच्छति | - | गम्यते | करोति | - | क्रियते |
| पश्यति | - | दृश्यते | वदति | - | उच्यते |
| खादति | - | खाद्यते | क्षालयति | - | क्षाल्यते |
| पिबति | - | पीयते | | | |

(ई) **अधः दत्तान् कर्तरिप्रयोगान् कर्मणिप्रयोगत्वेन परिवर्तयन्तु ।**

१. सः भोजनं करोति ।

२. सेविका वस्त्रं क्षालयति ।

३. जनकः स्यूतं नयति ।

४. आरक्षकः चोरं गृह्णाति ।

५. बालिका परीक्षां लिखति ।

(उ) **अधः दत्तानि क्रियापदानि उपयुज्य कर्मणिप्रयोगान् लिखन्तु ।**

१. दृश्यते  २. गम्यते  ३. पीयते  ४. ज्ञायते

**परियोजनाकार्यम्**

१. वध्वाः पतिगृहगमनसमये मातापितृणां संवादम् उपदेशान् च स्वीयवाक्यैः लिखित्वा आनयन्तु ।

२. वार्षिकोत्सवदिवसे शाकुन्तलनाटके चतुर्थाङ्कं प्रदर्शयन्तु ।



SCERT TELANGANA

द्वितीयः भागः

# ४.अणुशास्त्रज्ञः कणादमहर्षिः

**पठन्तु, विचिन्त्य वदन्तु**

रविः - (उच्चैः पाठं पठति) रैट्सोदरौ विमानं निर्मितवन्तौ । सर् ऐजाक् न्यूटन् भूम्याकर्षणसिद्धान्तं प्रतिपादितवान् । ग्राहम्बेल् दूरवाणीं निर्मितवान् (पठनं मध्ये स्थगयित्वा) तात ! मम एकः सन्देहः .....

पिता - पृच्छतु ।

रविः - एते सर्वे विदेशीयाः एव । किं विदेशीयाः एव आविष्कृतवन्तः ? न भारतीयाः?

पिता - बहवः भारतीयाः अनेकान् आविश्चक्रुः । आर्यभट्टः खगोलशास्त्रीयान् अनेकान् विषयान् प्रतिपादितवान् । सुश्रुतः प्लास्तिक् शल्यचिकित्साविधानं कणादः अणुसिद्धान्तञ्च आविश्चकार । एवं प्राचीनभारतीयाः बहवः बहून् सिद्धान्तान् प्रतिपादितवन्तः।

रविः - तथा वा !

**प्रश्नाः**

१. सर् ऐजाक् न्यूटन् किं प्रतिपादितवान् ?

२. भारतीयशास्त्रज्ञैः प्रतिपादितांशाः के ?

३. उपरि सम्भाषणं कं विषयम् उद्दिश्य प्रचलितम् ?

**उद्देश्यम्**

* छात्रेषु प्राचीनभारतीयशास्त्रज्ञानां चरित्रे, तेषाम् आविष्कारेषु च आदरभावानायाः विकासः ।
* वैज्ञानिकचिन्तनाभ्यासस्य संवर्धनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## प्रवेशिका

'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति लोकोक्तिः । कणादरचितं वैशेषिकदर्शनम्, पाणिनिप्रणीतं व्यकरणशास्त्रं च सर्वशास्त्रावगमने उपकारकं भवतीति अस्य भावः । तादृशः कणादः कुत्र आसीत् ? तस्य विशेषता का ? इति पाठमेतं पठित्वा ज्ञायन्ताम् ।

प्राचीने भारतवर्षे महर्षयः योगिजनाः निवसन्ति स्म । ते यद्यत्कुर्वन्ति स्म तत्सर्वमपि भारतीयसंस्कृतेः औन्नत्यं सूचयति । अतः तेषां जीवनं कथमासीदिति अवश्यं ज्ञातव्यम् । तेषां जीवनव्यवहारं दृष्ट्वा वयम् अस्मत्प्राचीनसंस्कृतिविकासं ज्ञातुं प्रभवामः ।

ऋषिपरम्परातः भारतीयविचारधारा आरब्धा । तत्कारणेन भारतीयजनचिन्तनवैभवम् अत्यन्तं स्फुटं भवति । अतः अन्यदेशीयाः भारतीयचिन्तनं बहु प्रशंसितवन्तः । यतः भारतीयचिन्तनं सर्वदा प्रमाणयुक्तम् अनुभवसिद्धं च भवति । तदानीन्तनी ऋषिपरम्परा शास्त्राध्ययनस्य अधिकं प्राधान्यं प्रादात् । तदानीन्तनाः छात्राः शास्त्राध्ययनं कृत्वा तस्य मननं चिन्तनं च कुर्वन्ति स्म । तपस्यया आध्यात्मिकम् अनुभवमपि प्राप्नुवन्ति स्म । भारतीयमहर्षीणां चिन्तनप्रक्रिया दर्शनशास्त्रमिति नाम्ना प्रथिता ।

**दर्शनशास्त्रम्**

अस्माकं ज्ञानस्य स्रोतांसि वेदाः। वेदतत्त्वं दर्शनशास्त्रं प्रतिपादयति । अतः यद्वैदिकमूलचिन्तनं वर्तते तदास्तिकदर्शनमिति कथ्यते । यच्च चिन्तनं वेदं निन्दति वेदविरुद्धं च प्रतिपादयति तन्नास्तिकदर्शनमिति कथ्यते । **पाणिनेः जैमिनेश्चैव व्यासस्य कपिलस्य च । कणादाक्षपादस्य दर्शनानि षडेव हि** । व्याकरण-मीमांसा - वेदान्त - साङ्ख्य - वैशेषिक - न्यायानि आस्तिकदर्शनानि षट् । एतानि सर्वाणि दर्शनानि ऋषिप्रणीतानि । व्याकरणदर्शनस्य प्रवर्तकः महर्षिः पाणिनिः । पूर्वमीमांसादर्शनं महर्षिः जैमिनिः रचयामास । वेदान्तदर्शनस्य प्रणेता महर्षिः वेदव्यासः । साङ्ख्यदर्शनस्य कर्ता महर्षिः कपिलः । वैशेषिकदर्शनं कणादमहर्षिः न्यायदर्शनं गौतममहर्षिश्च प्रणिनाय ।



**कणादबाल्यवृत्तान्तः**

षट्सु आस्तिकदर्शनेष्वन्यतमं वैशेषिकम् । अस्य प्रणेता कणादमहर्षिः । अयं क्री.पू. १२०० तमे वर्षे जन्म लेभे । एषः उलूकस्य पुत्रः । अत एव अस्य औलूक्यः इति नाम। अत्यन्तं मन्दबुद्धिः अयं सदा अध्ययनसमये पृष्ठभागे उपविश्य निद्राति स्म । तेन कारणेन सः किमपि नावगच्छति स्म । सकृद्गुरुः तद्विषयं विज्ञाय पठने रुचिर्नास्ति चेत् गुरुकुलं त्यक्त्वा गच्छेति आदिदेश । बालकणादः किमर्थं मम अध्ययने रुचिः न भवतीति चिन्तया पर्वतशिखरं गत्वा उच्चैः क्रन्दनं चकार। केनापि तस्य क्रन्दनं न श्रुतम् ।

SCERT TELANGANA

गुरुः 'कणादः' कुत्र गतः इति शिष्यानपृच्छत् । ''गुरुदेव ! कणादः प्रातः कुत्रापि गत्वा एतावत्पर्यन्तं नागतः । अस्माभिः बहु अन्विष्टः'' इति शिष्याः तमसूचयन् ।

गुरुः एकं शिष्यमाहूय ''कणादस्य गृहं गत्वा सः तत्र अस्ति वेति ज्ञात्वा आगच्छतु । तस्य पिता 'कणादः गृहं नागतः' इति वदति चेत् गुरुकुलेऽपि नास्तीति सूचयत्विति'' अपि आज्ञापयत् ।

कणादः यस्मिन् पर्वते अतिष्ठत् तस्मिन् पर्वतप्रदेशे रात्रौ जनसञ्चाराभावकारणेन केवलं सिंहव्याघ्रादीनां गर्जनं श्रूयते स्म । गजाः वृक्षान् उत्पाटयन्ति स्म । सर्पाः इतस्ततः चरन्ति स्म । हिंस्रपशुसमूहाः स्वस्वाहारार्थं भ्रमन्ति स्म । तत्रैव कणादः बहु रुदित्वा बृहच्छिलाखण्डे प्रातःकालपर्यन्तं निद्रां प्राप ।

गुरुणा आदिष्टः शिष्यः प्रातःकाले कणादगृहं प्रातिष्ठत् । सः मध्येमार्गं क्रन्दनं श्रुत्वा ''अवश्यमयं क्रन्दनध्वनिः कणादस्यैव स्यादिति अचिन्तयत् । किन्तु पर्वतप्रदेशः अतीव भयङ्करः हिंस्रजन्तूनां गर्जनादिभिः अतः शिष्यः पर्वतप्रदेशं त्यक्त्वा कणादगृहमगच्छत् ।

गुरुकुले मम पुत्रः कथमस्तीति शिष्यं पृष्टवती कणादस्य माता ।

''गुरुकुले नास्तीति कारणेन अत्र आगतोऽस्मि गुरोराज्ञयेति'' शिष्यः प्रोवाच । तच्छ्रुत्वा सा अत्यन्तं रुदितवती । किञ्चित्कालानन्तरं कणादस्य पिता आगत्य समस्तवृत्तान्तं श्रुत्वा अत्यन्तदुःखम् अन्वभवत्। तदनन्तरं गृहमागतेन शिष्येण सह कणादस्य जनकोऽपि गुरुकुलं निरगात्। तत्र गुरुः ''भवतः पुत्रः सम्यक् न पठतीति कारणेन तमहम् अनिन्दम् । क्रोधेन दुःखेन वा सः गुरुकुलं त्यक्त्वा कुत्रापि अगच्छत्'' इति जनकमकथयत्। तस्मिन्नेव समये शिष्यः गुरुम् उक्तवान्, आश्रमसमीपस्थ-पर्वते कस्यचित् बालकस्य क्रन्दनध्वनिमश्रुणवम्। मन्ये सः ध्वनिः कणादस्य स्यादिति अनन्तरं विचिन्त्य सर्वे पर्वतसमीपं गन्तुम् उद्युक्ताः ।

**विचिन्त्य वदन्तु**

* ऋषिपरम्पराविषये भवन्तः किं जानन्ति ?
* षड्दर्शनानि उद्दिश्य वदन्तु ।
* कणादस्य अदर्शनेन के उद्विग्नाः अभवन् ? तथैव भवद्विषये के उद्विग्नाः भवन्तीति वदन्तु ।

**कणादस्य तपश्चरणम्**

कणादः रोदनं त्यक्त्वा तस्मिन् प्रस्तरखण्डे उपविश्य ईश्वरजपं करोति स्म । तस्मिन्नेव समये सर्वे गुरुकुलच्छात्राः, आचार्यः कणादस्य जनकः च तत्र प्राप्नुवन् । पुत्रस्य स्थितिं दृष्ट्वा पिता रोदिति स्म । सर्वे कणादस्य तपश्चरणं दृष्ट्वा आश्चर्यमन्वभवन् । तदनु ते '' त्वं बालकोऽसि। तपश्चरणं मास्तु । अतः पठने मतिं देहि । कालक्रमेण त्वं विद्यावान् बुद्धिमान् च भविष्यसि'' इति अवदन् । परन्तु बालकणादः स्वप्रतिज्ञायाम् अविचलः आसीत्। ''यावत्पर्यन्तं मम बुद्धिशक्तिः प्रखरा न भविष्यति, तावत्पर्यन्तमहं तपः करिष्यामि'' इति स सनिश्चयं प्राकटयत् । आश्रमस्य अन्तेवासिनः खिन्नमनस्काः भूत्वा पर्वतप्रदेशात् प्रतिनिवृत्ताः ।

**औलूक्यः ''कणादः'' अभवत्**

बहुदिनानन्तरमेकस्मिन्दिने कणादः तपःकरणसमये एकं ब्राह्मणमपश्यत् । स च ब्राह्मणः साक्षात् ईश्वरः। ब्राह्मणवेषधारी भूत्वा ईश्वरः एव कणादस्य समीपम् आगच्छत्। ईश्वरः तव तपसः कारणं किमित्यपृच्छत्

''गुरुकुले मम मेधाशक्तिः नास्तीत्यपप्रथा वर्तते। अतः मेधाशक्तिप्राप्त्यर्थं तपः आचरामि'' इति परमेश्वरम् अवदत् सः। तदानीं ब्राह्मणस्वरूपी ईश्वरः अपृच्छत् एवं तव भोजनपदार्थेषु अधिकरुचिः वर्तते, अध्ययने नास्ति। यस्य आसक्तिः यस्मिन् पदार्थे अधिका भवति, तेन स एव पदार्थः लभ्यते। अतः गुरुकुले सम्यक् भोजनं कृत्वा कक्ष्यायां निद्रामकरोः। तेन त्वं विद्यां कथम् प्राप्नोषि'' इति। एवं पृष्ट्वा ईश्वरः तिरोहितोऽभूत्।

**विचिन्त्य वदन्तु**

* यदि ईश्वरः प्रत्यक्षीभवति तर्हि भवान् कीदृशं वरं वृणीष्यति?

ब्राह्मणवचोभिः कणादस्य ज्ञानोदयः जातः। स सत्वरं पर्वतादवतीर्य गुरुकुलं प्रविश्य गुरुं प्रणम्य ''हे पूज्यगुरुवर ! अहम् इदानीमध्ययनार्थं सिद्धोऽस्मि। भवन्तः यावत्पर्यन्तं पाठयन्ति, तावत्पर्यन्तं श्रद्धया पठिष्यामि इति न्यवेदयत्। गुरुः अध्ययने शिष्यमनोभावं दृष्ट्वा समतुष्यत्। सः प्रमोदेन कणादं सम्यक् अध्यापयति स्म। कणादोऽपि यथा गुरुः पाठयति, तथा सम्यक् पठति स्म। स ईश्वरोपदेशं सदा स्मरन् गुरुकुले सर्वभोजनानन्तरम् अवशिष्टमन्नं खदति स्म। तदभ्यासः तस्य जीवनान्तिमक्षणपर्यन्तम् आसीत्। क्रमशः बालकणादः विद्या - बुद्धि - त्याग - तपोबलेन कणादमहर्षिरभवत्।

**कणादस्य अन्तिमदशा**

कणादजीवनस्यान्तिमावस्थायां जनाः सस्यादानसमये उपकाररूपेण सस्यानि आनीय आश्रमे यच्छन्ति स्म। कणादः अत्यन्तदुर्बलः चलितुमप्यसमर्थश्चासीत्। परन्तु सः तत्र विद्यमानस्य एकस्यापि सस्यस्य उपयोगं नाकरोत्। तादृश्यां दुर्बलावस्थायामपि सस्यक्षेत्रं गच्छति स्म। यस्मिन् क्षेत्रे सस्यानामादानम् अभवत् तत्र ये सस्यकणाः अवशिष्टाः, तान् सस्यकणानानीय तान् खादन् स जीवति स्म। तस्मात् कारणात् तस्य नाम ''कणादः'' इति प्रथितम्। कणादमहर्षिः सस्यकणान् भक्षयन् वैशेषिकदर्शनसूत्राणि रचयामास।

**कणादस्य वैशेषिकदर्शनस्वरूपम्**

वैशेषिकदर्शने अत्यन्तम् उपयोगिविषयाः वर्तन्ते। आधुनिके विज्ञानजगति यत् उपयोगकरं पदार्थविज्ञानं वर्तते तदत्र पूर्वमेव उपवर्णितमस्ति। वैशेषिकदर्शने एव अणु-परमाणुविषयाः आद्यत्वेन प्रतिपादिताः। अत्र द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाः इति षड् भावपदार्थानां वर्णनमस्ति। अभावः इति अपरः पदार्थो वर्तते।

अत्र विशेषनामकपदार्थस्य विवरणमस्ति। तस्मात् कारणात् अस्य दर्शनस्य नाम वैशेषिकदर्शनमिति। अत्र विशेषपदार्थः नित्यः व्यापकः अनन्तश्च भवति। इतः तादृशः नित्यपदार्थः, अनन्तपदार्थः च नित्यद्रव्येषु आकाशपरमाणुप्रभृतिष्वेव वर्तते। सृष्टिप्रक्रियायां परमाणुवादम् इदम्प्रथमतया कणादः प्रत्यपादयत्

परमाणुद्वयसंयोगेन द्व्यणुकं, द्व्यणुकत्रयसंयोगेन त्र्यणुकं, एवं क्रमेण निर्दिष्टप्रक्रियानुसारं चतुरणुकादिसिद्धिर्भवति। एतं जगतः सर्वपदार्थनिर्माणं भवति। अयमेव परमाणुवादः। परमाणुवादप्रवर्तकः कणाद एव। आधुनिककालेऽपि परमाणुविषये चर्चाः प्रचलन्ति। परमाणुविभाजनस्य विषये वैज्ञानिकाः न्यूट्रॉन्, प्रोटॅन्, इलेक्ट्रॉन् इति तथ्यं कणादस्य शास्त्रादेव स्व्यकुर्वन्। कणादः उञ्छवृत्त्या जीवनं यापयन्



एतादृशं महत्त्वपूर्णम् अणुसिद्धान्तम् आविश्चकारेति एषः विषयः नूनं भारतस्य गौरवास्पदं भवति ।

ताद्दशत्यागपूर्णजीवनेनैव एतादृशं महत्कार्यं साधयितुं शक्यते इत्यस्माकम् ऋषिसम्प्रदायः अस्मान् बोधयति । तस्मात् तेषां जीवनं, व्यवहारं, त्यागं तपश्च दृष्ट्वा वयम् अवश्यं शिक्षां प्राप्नुयाम । जीवनेऽपि तच्छिक्षायाः उपयोगं कुर्याम ।

**विचिन्त्य वदन्तु**

* कणादस्य दर्शनग्रन्थाय वैशेषिकदर्शनम् इति नाम कथमागतम् ?
* 'कणादः अणुशास्त्रपितामहः' इति विषयं समर्थयन्तु ।

**विशेषांशाः**

कणादः - केदारेषु पतितान् धान्यकणान् अत्ति (खादति) इति कणादः ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।**

१. गुरुकुलजीवनं नाम किम् । प्राचीनभारतीयगुरुकुलव्यवस्थायाः महत्त्वम् उद्दिश्य चर्चां कुर्वन्तु ।

२. कणादमहर्षेः ज्ञानोदयः जातः इति ज्ञातवन्तः खलु ! भवन्तः भवतां ज्ञानाभिवृद्ध्यै किं कुर्वन्तीति वदन्तु ?

**आ) पाठं पठित्वा अधः दत्तां मञ्जूषां पूरयन्तु ।**

| क्रं.सं | दर्शनम् | | कर्ता |
|---|---|---|---|
| १. | व्याकरणदर्शनम् | - | |
| २. | पूर्वमीमांसादर्शनम् | - | |
| ३. | उत्तरमीमांसादर्शनम् (वेदान्तम्) | - | |
| ४. | साङ्ख्यदर्शनम् | - | |
| ५. | वैशेषिकदर्शनम् | - | |
| ६. | न्यायदर्शनम् | - | |

SCERT TELANGANA

## इ) अधः दत्तमनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

व्याकरणशास्त्रस्य अपरं नाम 'शब्दशास्त्रम्' इति । शब्दशास्त्रप्रवर्तको भवति पाणिनिमहर्षिः। असौ वैदिकलौकिकसंस्कृतभाषयोः व्याकरणं प्रणिनाय । अस्य मातापितरौ दाक्षीव्याडौ स्तः । पाणिनिः शालातुर (लाहोर) नामके ग्रामे जनिम् अवाप । तपस्वी पाणिनिः एकदा नृत्यन्तं महेश्वरं प्रत्यक्षं चकार । महेश्वरः नृत्तावसानसमये स्वढक्कां चतुर्दशवारं ननाद । भगवान् पाणिनिः महेश्वरढक्कातः समुत्पन्नान् चतुर्दशशब्दान् अवलम्ब्य चतुर्दशमाहेश्वरसूत्राणि निर्माय 'अष्टाध्यायी' इत्याख्यं व्याकरणग्रन्थं व्यरचयत् । अष्टाध्याय्यां व्याकरणविषयाः सूत्ररूपेण उपनिबद्धाः । अस्याम् अष्टौ अध्यायाः, प्रत्येकस्मिन् अध्याये चत्वारः पादाश्च सन्ति आहत्य ३९८३ सूत्राणि च सन्ति ।

१. शब्दशास्त्रमिति कस्य शास्त्रस्य नाम ?
२. शब्दशास्त्रप्रवर्तकः कः ?
३. पाणिनेः मातापितरौ कौ ? सः कुत्र जातः ?
४. अष्टाध्याय्यां कति अध्यायाः, सूत्राणि च वर्तन्ते ?
५. माहेश्वरसूत्राणि कति ? कथम् उत्पन्नानि ?
६. अस्यानुच्छेदस्य शीर्षकं सूचयन्तु ।

## ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. औलूक्यस्य 'कणादः' इति नाम कथं लब्धम् ।
२. पर्वतप्रदेशः कथमस्ति ?
३. गुरुणा सह गुरुकुलच्छात्राः पर्वतसमीपं गत्वा कणादं किमसूचयन् ?
४. षट् भावपदार्थाः के ? लिखन्तु?
५. कणादः स्वकीयवैशेषिकदर्शने परमाणुविभाजनं कथं प्रतिपादितवान् इति लिखन्तु ।

# II. भावव्यक्तीकरणम् - सर्जनात्मकता

## अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. भारतीयजनानां चिन्तनम् अतीव उन्नतमासीत् । तत् कथमिति लिखन्तु ।
३. गुरुः कदा सन्तुष्यति ?
४. ''यस्य आसक्तिः यस्मिन् पदार्थे अधिका भवति तेन स एव पदार्थः लभ्यते'' इत्यमुमंशं स्वीयानुभवपूर्वकं लिखन्तु ।

## आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. महर्षिकणादपाठ्यांशस्य सारांशं स्वीयवाक्यैः लिखन्तु ।
२. आधुनिकविज्ञानस्य मूलं प्राचीनभारतीयशास्त्राणि इति कथनं समर्थयन्तु ।

## इ) सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

१. कणादगृहं गतस्य शिष्यस्य कणादमातापित्रोः च मध्ये सम्भूतं सम्भाषणं विपुलतया लिखन्तु ।

SCERT TELANGANA

२. अधः दत्तमनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

మేఘనాథ్ సాహా 1893లో అక్టోబర్ మాసంలో 6వ తేదీన జన్మించారు. వీరికి సంస్కృతాంగ్ల బెంగాలీ సాహిత్యాలలో ప్రావీణ్యం కలదు. వీరు ప్రఫుల్ల చంద్రరాయ్, జగదీశ్ చంద్రబోస్‌ల శిష్యులు. కాంతిని కొలిచే ఒక ఉపకరణం తయారు చేసి కలకత్తా విశ్వవిద్యాలయం నుండి డాక్టరేట్ ఉపాధిని పొందారు. వీరు తన ఆలోచనలను సమాజం ముందు నిరూపించడానికి 'సైన్స్‌కల్చర్' అనే సంస్థను స్థాపించారు. ఆ తరువాత 'ఎక్స్‌ప్లోరేషన్ జియోఫిజిక్స్' అనే భౌతికశాస్త్రం యొక్క నూతనశాఖ యొక్క ఆవిష్కరణలో ప్రధాన పాత్ర పోషించారు. ఈ తంత్రజ్ఞానం ద్వారా భూగర్భంలో ఏ ఖనిజం ఉందనేది తెలుసుకోవచ్చును.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

**अ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदान्युपयुज्य नूतनवाक्यानि रचयन्तु ।**

१. बुद्धिः प्रखरा चेत् शीघ्रं ज्ञानोदयः भवति ।
२. सर्वः अविचलस्सन् भगवतः ध्यानं कुर्वीत ।
३. ग्रीष्मातपे प्रस्तरखण्डे उपवेष्टुं नैव शक्यते ।
४. छात्रः ज्ञानप्राप्त्यर्थं प्रमोदेन गुरुसन्निधिं गच्छेत् ।
५. भारतदेशे केचन उञ्छवृत्त्या जीवन्तः महत्कार्याणि समसाधयन् ।

**आ) अधः दत्तेभ्यः पदेभ्यः असम्बद्धपदानि चिन्वन्तु ।**

उदा : जलं, पानीयं, सलिलं, सकलम्
१. ऋषिः, तपनः, तपस्वी, तापसः
२. गुरुः, अध्यापकः, पुरोहितः, आचार्यः
३. शिष्यः, छात्रः, सहाध्यायी, अन्तेवासी
४. क्रन्दनम्, आलापनम्, रोदनम्, आक्रोशनम्
५. ध्वनिः, निनादः नभः, शब्दः

### २. व्याकरणांशाः

**अ) पाठात् यणादेशसन्धिपदानि चित्वा विघटयन्तु ।**

**आ) सन्धिं कृत्वा सन्धिनाम निर्दिशन्तु ।**

१. शास्त्रात् + एव　　२. तपः + चरणम्　　३. तत् + शिक्षायाः
४. तिरोहितः + अभूत्　　५. कणादस्य + एव　　६. प्र + उवाच
७. गुरोः + आज्ञा　　८. न + अस्ति + इति

**इ) पाठस्थानि पञ्च षष्ठीतत्पुरुषसमासपदानि अन्विष्य तेषां विग्रहवाक्यानि लिखन्तु ।**

उदा - १. जीवनव्यवहारम् - जीवनस्य व्यवहारः
जीवनव्यवहारः तं जीवनव्यवहारम् ।
२. भारतीयसंस्कृतेः - भारतीयानां संस्कृतिः
भारतीयसंस्कृतिः, तस्याः भारतीयसंस्कृतेः ।

ई) **अधः दत्तानां विग्रहवाक्यानाम् आधारेण समस्तपदानि, समासनामानि च लिखन्तु ।**

उदा - महान् चासौ ऋषिश्च - महर्षिः - विशेषणपूर्वपदकर्मधारयसमासः

१. प्रमाणेन युक्तम्

२. मन्दा बुद्धिः यस्य सः

३. बालश्चासौ कणादश्च

४. खिन्नं मनः यस्य सः

५. अन्तिमा चासौ अवस्था च अन्तिमावस्था । तस्यां

६. द्रव्यं च गुणश्च कर्म च सामान्यं च विशेषश्च समावायश्च

७. परमश्चासौ अणुश्च परमाणुः । परमाणोः द्वयं परमाणुद्वयम् । परमाणुद्वयस्य संयोगः। परमाणुद्वयसंयोगः तेन

* **अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणमवगच्छन्तु ।**

| | | | |
|---|---|---|---|
| षट् + मासाः | = | षण्मासाः | (ट्+म = ण्) |
| जगत् + नाथः | = | जगन्नाथः | (त्+न = न्) |
| वाक् + मयम् | = | वाङ्मयम् | (क्+म = ङ्) |
| अप् + मयम् | = | अम्मयम् | (प्+म = म्) |

**वर्गीयव्यञ्जनेभ्यः अनुनासिके परे सति वर्गीयव्यञ्जनानां तत्तद्वर्गीयनुनासिकादेशो भवति ।**

**वर्गीयव्यञ्जनानि + अनुनासिकः = अनुनासिकः**

**एषः अनुनासिकसन्धिः**

ऊ) **अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।**

**1. सन्धिं कुर्वन्तु ।**

१. वाक् + नियमः

२. मत् + निवासः

३. विराट् + मयम्

४. तत् + नयति

५. षड् + मयूखः

**2. विसन्धिं कुर्वन्तु ।**

१. जगन्नायकः

२. तन्मात्रम्

३. तस्मान्नागरिकः

४. सम्राान्नागरिकाः

५. मृन्मयम्

**परियोजनाकार्यम्**

प्राचीनभारतीयशास्त्रज्ञानां नामानि,तेषां ग्रन्थानां वैज्ञानिकसिद्धान्तानां नामानि च पट्टिकारूपेण विलिख्य प्रदर्शयन्तु ।

द्वितीयः भागः

# ५.चन्द्रापीडस्य विद्याभ्यासः

**पठन्तु, विचिन्त्य वदन्तु**

'विद्यया अमृतमश्नुते' इति उक्तिः प्रसिद्धैव । पूर्वकाले श्रीरामादयः विद्यां वशिष्ठमहर्षेः समीपे अध्यगच्छन् । तदानीन्तनकाले विद्या जीवने अनुप्रयुज्यते स्म । तेन सा विद्या चिरं बुद्धौ तिष्ठति स्म । धर्मभीमार्जुनादयोऽपि प्रपञ्चप्रसिद्धयोद्धारः अभवन् इत्यत्र गुरुकुलविद्यायाः महत्त्वमेव कारणम् । तथैव एकलव्योऽपि द्रोणं गुरुं मत्वा अरण्ये धनुर्विद्यां स्वयमधीतवान् । तदानीन्तनविद्यया उदात्तजीवनं समाजिकव्यवहारकौशलं, समस्तकलाशास्त्रादि-विषयावगमनं भवति स्म, विवेकानन्दोऽपि स्वगुरोः मार्गदर्शनेन विश्वप्रसिद्धः अभवत्, इदानीं वयं पूर्वकालस्य अध्ययनपद्धतीः पाठ्यक्रमादिविषयाँश्च एतत्कथामाध्यमेन ज्ञास्यामः।

**प्रश्नाः**

१. गुरुकुले के विद्याम् अधीतवन्तः ?
२. पूर्वकाले विद्या किमर्थं चिरं बुद्धौ तिष्ठति स्म ?
३. विद्यायाः उपयोगाः के ?

**उद्देश्यम्**

* संस्कृतसाहित्ये गद्यरचनायाः स्वरूपपरिचयः । कादम्बरीगद्यस्य रसास्वादनम् ।
* छात्राणां संस्कृतशब्दप्रयोगसामर्थ्यस्य विकासनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

**कविपरिचयः**

पाठ्यभागोऽयं महाकवेः बाणस्य कादम्बरीतः सङ्गृहीतः । क्रीस्तोः परं ५९० तः ६५० पर्यन्तमस्य महाकवेः अवस्थितिः इत्यनुमीयते । कादम्बरी, हर्षचरितं तथा चण्डीशतकं चास्य कृतयः लभ्यन्ते । श्रीहर्षवर्धनेनाहूतोऽयं कविः तदास्थानमलञ्चकार । कवेरस्य योगदानादेव गद्यरचनायाः कवीनां निकषं वदन्तीति'' ख्यातिः समपद्यत । ''बाणोच्छिष्टं जगत्सर्वं'', ''कादम्बरीरसास्वादे आहारोऽपि न रोचते'' इत्यादि वचनैः संस्कृतसाहित्येतिहासे अस्य स्थानं निरूपयतः ।

श्लो ।। नवार्थो जातिरग्राम्यो श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम् ।। इति
प्रतिपादयता बाणेन स्वशैली सहृदयानामुपायनीकृता इति निष्कर्षः ।

**प्रवेशिका**

कश्चन राजकुमारः गुरुकुले प्रविश्य कठोरपरिश्रमेण अनेकविद्याः अधिगत्य स्वगृहं प्रत्यागच्छत्। अधीतानेकविद्यं तं दृष्ट्वा तस्य पितरौ अतितरामानन्दम् अन्वभवताम् । कोऽयं राजकुमारः ? सः काः विद्याः अधीतवान् इत्यादिकम् अनेन पाठेन ज्ञायताम् ।

अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्ते मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्ट इति स्वप्नानुरूपमेव राजा स्वसूनोश्चन्द्रापीड इति नाम चकार ।

क्रमेण कृतचूडाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चन्द्रापीडस्य ।

आचार्यकुलपुत्रप्रायपरिजनपरिवारम् अपनीताशेषशिशुजनक्रीडनव्यासङ्गम् अनन्यमनसम् अखिलविद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडं शोभने दिवसे अर्पयांबभूव ।

चन्द्रापीडोऽप्यनन्यहृदयतया तथा नियन्त्रितो राज्ञा अचिरेणैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानः सर्वा विद्या जग्राह । मणिदर्पण इवातिनिर्मले तस्मिन् सञ्चक्राम सकलकलाकलापः तथाहि पदे, वाक्ये, प्रमाणे, धर्मशास्त्रे, राजनीतिषु, व्यायामविद्यासु, चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुधविशेषेषु, रथचर्यासु, गजपृष्ठेषु, तुरङ्गमेषु, वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषु वाद्येषु, भरतादिप्रणीतेषु, नृत्यशास्त्रेषु, नारदीयप्रभृतिषु, गान्धर्ववेदविशेषेषु हस्तिशिक्षायां तुरगवयोज्ञाने, पुरुषलक्षणेषु, चित्रकर्मणि, यन्त्रच्छेद्ये, पुस्तकव्यापारे, लेख्यकर्मणि, सर्वासु द्यूतकलासु गन्धशास्त्रेषु, शकुनिरुतज्ञाने, ग्रहगणिते, रत्नपरीक्षासु, दारुकर्मणि, दत्तव्यापारे, वास्तुविद्यासु,

आयुर्वेदमन्त्रप्रयोगे विषापहरणे, सुरङ्गोपभेदे, तरणे, लङ्घने, प्लुतिषु, आरोहणे, इन्द्रजाले, कथासु नाटकेष्वाख्यायिकासु काव्येषु महाभारतपुराणेतिहासरामायणेषु सर्वलिपिषु, सर्वदेशभाषासु, सर्वसञ्ज्ञासु, शिल्पेषु, छन्दस्स्वन्येष्वपि कलाविशेषेषु परं कौशलमवाप ।

एवं च क्रमेण समारूढयौवनारम्भं परिसमाप्तसकलकलाविज्ञानमधीताशेषविद्यं चावगम्यानु - मोदितमाचार्यैश्चन्द्रापीडमानेतुं राजा बलाधिकृतं बलाहकनामानमाहूय बहुतुरगबलपदातिपरिवृतमतिप्रशस्तेऽहनि



प्राहिणोत् । स गत्वा विद्यागृहं द्वारपैः समावेदितः प्रविश्य क्षितितलाविलम्बितचूडामणिना शिरसा प्रणम्य स्वभूमिसमुचिते राजसमीप इव सविनयमासने राजपुत्रानुमतो न्यषीदत् । स्थित्वा च मुहूर्तमात्रं वलाहकश्चन्द्रापीडमुपसृत्य दर्शितविनयो व्यजिज्ञपत् । कुमार महाराजः समाज्ञापयति पूर्णा नो मनोरथाः, अधीतानि शास्त्राणि, शिक्षिताः सकलाः कलाः गतोऽसि सर्वायुधविद्यासु परां प्रतिष्ठाम्, अनुमतोऽसि निर्गमाय विद्यागृहात् सर्वाचार्यैः उपगृहीतशिक्षं गन्धगजकुमारकमिव वारिबन्धाद्विनिर्गतम् अधिगतसकलकलाकलापकं पौर्णमासीशशिन - मिवोद्गतं पश्यतु त्वां जनः व्रजन्तु सफलतामतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि, दर्शनं प्रति ते समुत्सुकान्यतीय सर्वाण्यन्तःपुराणि,

### विचिन्त्य वदन्तु

* 'चन्द्रपीडस्य मनः मणिदर्पण इव विद्यते' इत्युक्तं खलु ! तथा किमर्थमुक्तम् ? तस्य प्रयोजनं किम् ?
* राजकुमारः चन्द्रापीडः अनेकविद्यासु कलासु च प्रवीणः इति पठितवन्तः खलु ! राजकुमाराय एतावत्यः विद्याः आवश्यकाः वा ? किमर्थम् ?

अयमत्रभवतो दशमो वत्सरो विद्यागृहमधिवसतः, प्रविष्टोऽसि षष्ठमनुभवन् वर्षम्, एवं सम्पिण्डितेनाधुना षोडशेन प्रवर्धसे। तदद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्त्वा दर्शनमखिलाभ्यो मातृभ्यः अभिवाद्य च गुरुन् अपगतनियन्त्रणो यथासुखमनुभवराज्यसुखानि नवयौवनललितानि च, सम्मानय राजलोकं, पूजय द्विजातीन्, परिपालय प्रजाः, आनन्दय बन्धुवर्गम्, अयं च ते त्रिभुवनैकरत्नमनिलगरुडसमजव इन्द्रायुधनामा तुरङ्गमः प्रेषितो महाराजेन द्वारि तिष्ठति ।

इत्यभिधाय विरतवचसि वलाहके चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा नवजलधरध्वानगम्भीरया गिरा प्रवेश्यतामिन्द्रायुध इति निर्जिगमिषुरादिदेश ।

अथानेन मधुरहेषितेन दत्तारोहणाभ्यनुज्ञ इव इन्द्रायुधमारुरोह चन्द्रापीडः ।

पुरः प्रधावता तरुणवीरपुरुषप्रायेणानेकसहस्त्रसङ्ख्येन पदातिपरिजनेन जय जीवेति च मधुरवचसा मङ्गलप्रायमनवरतमुच्चैः पठता वन्दिजनेन स्तूयमानो नगराभिमुखः प्रतस्थे ।

विलोक्य इति च प्रतीहारवचनान्तरमतिदूरावनतेन चलितचूडामणिना शिरसा कृतप्रणामम् एह्येहि इत्यभिदधानो दूरादेव प्रसारितभुजयुगलः शयनतलादीषदुच्छ्वसितमूर्तिरानन्दजलापूर्यमाणलोचनः समुद्गतपुलककण्ठकतया सीव्यन्निवैकीकुर्वन्निव तं पिता विनयावनतमालिलिङ्ग ।

गच्छ वत्स पुत्रवत्सलां मातरमभिवाद्य दर्शनलालसा यथाक्रमं सर्वा जननीः दर्शनेनानन्दय इति विसर्जितः पित्रा सविनयमुत्थाय निवारितपरिजनोऽन्तःपुरप्रवेशयोग्येन राजपरिजनेनोपदिश्यमानवर्त्मा अन्तःपुरमाययौ ।

समुपसृत्य मातरं प्रणनाम । सातु चन्द्रापीडं पुनःपुनरालिङ्ग्य ललाटदेशे वक्षसि भुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशन्ती तमवादीत् वत्स ! कठिनहृदयस्ते पिता येनेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमभान्तमियन्तं कालं लम्भिता, कथमसि सोढ्वा नातिदीर्घामिमाङ्गुरुजनयन्त्रणाम् । अहो बालस्याऽपि सतः कठोरस्येव ते महद्धैर्यं, अहो विगतशिशुजनक्रीडाकौतुकलाघवमर्भकस्यापि ते हृदयम्, अहो गुरुजनस्योपरि भक्तिरसाधारणा । सर्वथा यथा पितुः प्रसादात् समस्ताभिरुपेतो विद्याभिरुपेत - मालोकयिष्यामि । इत्येवमभिधाय लज्जास्मितावनतमात्ममुखप्रतिबिम्बगर्भे विकचकमलकृतकर्णपल्लवावतंस इव कपोले पर्यचुम्बदेवम् । एवं दर्शनेन नन्दयामास, निर्गत्य च राजकुलद्वारावस्थितमिन्द्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुकनासं द्रष्टुमयासीत् ।

**विचिन्त्य वदन्तु**

* बहुकालानन्तरं स्वसन्तत्या मिलितवतोःमातापित्रोः अनुभूतयः कथं भवन्तीति विश्लेषणं कुर्वन्तु ।

शुकनासभवनं प्रविश्य चानेकनरेन्द्रसाहस्त्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरावनतेन मौलिना शुकनासं ववन्दे ।

शुकनासस्समुद्गतप्रीतिपुलकैरङ्गैरावेद्यमानहृदयहर्षप्रकर्षस्तमब्रवीत् ।

तात ! चन्द्रपीड ! अद्य खलु देवस्य तारापीडस्य समाप्तविद्यमुपारूढयौवनमालोक्य भवन्तं सुचिराद् भुवनराज्यफलप्राप्तिरुपजाता । अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म, अद्य प्रसन्नाः कुलदेवताः न ह्यपुण्यभाजां भवादृशाः सकलत्रिभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यन्ते, क्वेदं वयः, क्वेयममानुषी शक्तिः, क्व चेदमशेषविद्याग्रहणसामर्थ्यम्, अहो धन्याः प्रजाः यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता, किं खलु कृतमवदातं कर्म वसुन्धरया ययासि भर्ता समासादितः ।

वह बाहुना वसुन्धराभारं सह पित्रा इत्यभिधाय, स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य, तं विसर्जयाञ्चकार ।

एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारान् उपकरणसम्भारसङ्ग्रहार्थमादिदेश।

## एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ) अधः दत्तयोः प्रश्नयोः समाधाने विचिन्त्य वदन्तु ।

१. चन्द्रापीडस्य विद्याभ्यासमधिकृत्य पाठः प्रवृत्तः किल, तदानीन्तनविद्याभ्यासस्य आधुनिकविद्याभ्यासस्य च तुलनां कृत्वा वदन्तु ।

२. चन्द्रापीडः एव भवदीयं मित्रमिति विचिन्त्य तमुद्दिश्य वदन्तु ।

### आ) अधः दत्तानि वाक्यानि केन उक्तानि इति लिखन्तु ।

१. तात ! चन्द्रापीड !

२. अहो ! गुरुजनस्योपरि भक्तिरसाधारणी

३. एह्येहि

४. जय ! जय !

५. कुमार ! महाराजः समाज्ञापयति !

६. अद्य प्रसन्नाः कुलदेवताः !

७. परिपालय प्रजाः

८. गच्छ वत्स ! पुत्रवत्सलां मातरमभिवादय ।

### इ) अधः दत्तमनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

नद्याः तीरे अस्ति कश्चन आश्रमः । आश्रमे गुरवः स्वशिष्यैः सह पर्णकुटीरं निर्माय निवसन्ति । शिष्याः गुरुभ्यः सकलाः विद्याः अधिगच्छन्ति । ते अरण्यात् समिधः आनयन्ति । ग्रामेभ्यः भिक्षावस्तूनि आनयन्ति पाककार्यं च कुर्वन्ति । गुरोः शुश्रूषां कुर्वन्तः विद्याभ्यासं कुर्वन्ति ।

आश्रमपरिसरे हरिण-धेन्वादिसाधुजन्तवः सिंह-व्याघ्रादिहिंस्रजन्तवः च वसन्ति । तेषु परस्परं द्वेषः न भवति । अतः हिंस्रजन्तुभ्यः साधुजन्तवः न बिभ्यति । आश्रमस्य रक्षणं निर्वहणं च राजाश्रयेण क्रियते । ग्रामेभ्यः जनाः आश्रमस्य गुरुभ्यः उपदेशान् श्रुण्वन्ति । गुरुः इत्थमुपदिशति -

लोभात् क्रोधः प्रभवति क्रोधात् द्रोहः प्रवर्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ॥

१. अनुच्छेदे दत्तानि पञ्चमीविभक्तियुक्तानि वाक्यानि एकत्र लिखन्तु ?

२. गुरूपदेशश्लोकस्य भावं लिखन्तु ?

३. शिष्याः आश्रमे 'कानि कानि कार्याणि कुर्वन्ति स्म ।

४. अधः दत्तेभ्यः पदेभ्यः 'बिभ्यति' इत्यस्य समानार्थकं पदं चिन्वन्तु ।

१. आनन्दन्ति    २. त्रस्यन्ति

३. नृत्यन्ति    ४. गच्छन्ति

ई) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. चन्द्रापीडाय कृतानां संस्काराणां नामानि लिखन्तु ।

२. चन्द्रापीडेन गुरुकुले अधीतासु विद्यासु आधुनिकविद्याः काः ?

३. चन्द्रापीडस्य काञ्चन सद्गुणान् लिखन्तु ।

४. कवेः परिचयं लिखन्तु ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) **अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. "अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म" इति शुकनासः किमर्थम् उक्तवान् इति विवृण्वन्तु ।

२. "विद्या ददाति विनयम् " एतत् वाक्यम् अनुसृत्य चन्द्रापीडं वर्णयन्तु ।

३. कतिपयमासान् गृहात् दूरे स्थितान् स्वपुत्रान् दृष्ट्वा तेषां मातापितरः कीदृशीं प्रतिक्रियां प्रदर्शयन्ति ?

४. पाठ्यांशपठनेन भवत्सु कीदृशी अनुभूतिः सञ्जाता ?

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. चन्द्रापीडस्य विद्याभ्यासम् अधिकृत्य लिखन्तु ।

२. प्राचीनकालिकानां विद्यानां स्वरूपं वर्णयन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. भवदीयपाठशालायां प्रतिभाशालिनम् एकं विद्यार्थिनम् उद्दिश्य लिखन्तु ।

२. अधः दत्तम् अनुछेदं संस्कृतेन अनुवदन्तु !

"విద్యను అందించువాడు గురువు. ఎవ్వరూ లేని వారికి బంధువు. మనస్సును వికసింపజేయువాడు గురువు. జీవితమునకు జీవము పోయువాడు గురువు. మనిషిలోని మానవత్వమును నిలబెట్టువాడు, అజ్ఞాన చీకటిని పారద్రోలి విజ్ఞానకాంతులను వెలిగించువాడు, ప్రాణమునకు ప్రాణవాయువును ఇచ్చువాడు గురువు. అందుకే గురువే దైవము. గురువే తల్లి గురువే తండ్రి."

## भाषाशाः

### १. पदजालाभिवृद्धिः

अ) **अधः दत्तानां रेखाङ्कितपदानां समानार्थकपदानि मञ्जूषातः चित्वा तानि उपयुज्य नूतनवाक्यानि रचयन्तु ।**

| लोचनाभ्यां | समजनि | शनैः | यथाक्रमं | समन्ततः |
|---|---|---|---|---|

१. वयं <u>नेत्राभ्यां</u> पश्यामः ।

२. रामः अयोध्यानगरे <u>जातः</u> ।

३. कूर्मः <u>मन्दं</u> गच्छति ।

४. स्यूते पुस्तकानि <u>क्रमशः</u> स्थापयतु ।

५. <u>सर्वतः</u> वायुः वाति ।

आ) **पाठं पठित्वा अधः दत्तानि पदानि विवृण्वन्तु ।**

१. द्यूतकला    २. आयुर्वेदः

३. पुराणम्    ४. इतिहासः

इ) **पाठे स्थितानां विविधविद्यानां सूचीं कुर्वन्तु ।**

ई) **अधः रेखाङ्कितपदनां व्युत्पत्त्यर्थान् क्रमेण संयोजयन्तु ।**

| | | |
|---|---|---|
| १. मनांसि मथ्नाति इति | - | पिता |
| २. प्रकृष्टेन जायन्त इति | - | चन्द्रः |
| ३. चन्द्रयति आह्लादयति इति | - | माता |
| ४. पाति रक्षति इति | - | मन्मथः |
| ५. माति वर्तते गर्भोऽत्र | - | प्रजाः |

उ) **अधः दत्तानां पदानाम् अर्थं ज्ञात्वा स्वीयवाक्यानि लिखन्तु ।**

उदाः मुहुर्मुहुः = पुनः पुनः

मुहुर्मुहुः पठनेन पाठ्यांशाः अवगम्यन्ते ।

१. अहो    २. उपसृत्य    ३. अजस्रम्    ४. प्रणम्य    ५. निषण्णं



SCERT TELANGANA

## २. व्याकरणांशाः

अ) **अधः दत्तानां पदानां विच्छेदनं कृत्वा सन्धिनाम लिखन्तु ।**

१. शुकनासोऽपि २. विषापहरणं
३. तैरयम् ४. अन्येष्वपि
५. गुरुर्बभूव

आ) **अधः दत्ते प्रत्येकस्मिन् पदे सन्धिद्वयम् अस्ति । तत् विच्छिद्य द्वयोः अपि सन्ध्योः नामानि लिखन्तु ।**

१. राज्ञाचिरेणैव २. क्रीडताप्यनेन
३. चास्यासने ४. कालेनानुरूपाभिर्वधूः
५. दैवतान्यनुचितम्

इ) **अधः दत्तानां समासानां विग्रहवाक्यानि लिखन्तु ।**

१. विरलपरिजनः २. यथासुखम्
३. अरिजनः ४. यथोचितम्
५. सर्वाचार्याः ६. यथास्वम्
७. धवलितवासुकिः ८. यथाक्रमम्

**परियोजनाकार्यम्**

प्राचीनविद्यानां आधुनिकविद्यानाञ्च पट्टिकां निर्मान्तु ।

**निःस्पृहस्य तृणं जगत् ।**

SCERT TELANGANA

द्वितीयः भागः

# ६. किं जलम् उत्तमम् ?

**पठन्तु, विचिन्त्य वदन्तु**

गृहाङ्गणे एकः वृद्धः कांश्चन श्लोकान् पठन् तिष्ठति ।
यथा -

रत्नैर्महार्घैः न तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थात् विरमन्ति धीराः ॥

एनं श्लोकं श्रुत्वा तस्य पौत्री ज्योतिर्मयी तत्रागत्य एवं पृष्टवती । तात! देवाः सर्वसमर्थाः खलु ! तर्हि अमृतोत्पादनाय ईदृशः श्रमः आवश्यकः किम् ? पौत्र्याः प्रश्नं श्रुत्वा हसन् पितामहः - बाले ! उत्तमतया पृष्टं त्वया । देवाः सर्वसमर्थाः । एवं धीरबुद्धयः । तथापि ते सर्वेषाम् आदर्शाः भवेयुः । अतः मनोरथेनैव स्वेच्छां पूरयितुं समर्थाः सन्तः अपि ते परिश्रमेणैव साधयितुं प्रयतन्ते। 'श्रम एव जयति' इत्यस्य वाक्यस्य सत्यं निरूपयितुं ते वाञ्छन्ति ।

**प्रश्नाः**

१. देवाः कैः न तुष्टाः ?
२. देवाः अमृतं प्राप्यापि कं स्वीकृतवन्तः ?
३. देवाः स्वेच्छां पूरयितुं समर्थाः सन्तोऽपि कस्मिन् विषये आदर्शतया वर्तन्ते ?

**उद्देश्यम्**

* श्रममहत्त्वस्य अवबोधनम्, श्रमकरणार्थम् अभिप्रेरणम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

साने गुरुजी महोदयस्य 'मधुराः कथाः' इति पुस्तकं संस्कृतेन डा.माधवी जोशी अन्ववदत् । अनूदितात् तस्मात् ग्रन्थात् एका कथा प्रस्तुतपाठ्यांशरूपेण स्वीकृता ।

## प्रवेशिका

रामः पुष्पाणि नमस्कृतवान् ! लक्ष्मणोऽपि नमस्कृतवान् । भक्तजनाः यानि पुष्पाणि रामचरणयोः संस्थाप्य नमस्कुर्वन्ति तानि पुष्पाणि रामलक्ष्मणौ नमस्कृतवन्तौ । तौ उत्तमौ पुराणपुरुषौ तथा किमर्थं कृतवन्ताविति प्रकृतपाठं पठित्वा जानन्तु ।

एकदा शिक्षकः छात्रैः सह वनभोजनार्थं गतवान् । छात्राः अतीव मुदिताः । हसन्तः खेलन्तः छात्राः चलन्ति स्म । काव्यशास्त्रविनोदं कुर्वन्तः शिक्षकः छात्राः च गच्छन्ति स्म । पर्जन्यकालः समाप्तप्रायः । हस्तानक्षत्रस्य कालः आसीत् । पर्याप्तप्रमाणेन जातया वृष्ट्या वर्धितं सस्यं धान्यं च शोभते स्म ।

''अस्मिन् जगति किं जलम् अतीव उत्तमम् ? अतीव पूतं जलं किम् ? किं च जलं मूल्यवत्?'' इति शिक्षकः प्रश्नं पृष्टवान् ।

''गङ्गायाः जलं सर्वेषु पूतम्'' इति सदाशिवः उक्तवान् ।

''पर्जन्यस्य जलं सर्वेषु महत्त्वपूर्णम्'' इति विनायकः उक्तवान् ।

''सिंहदुर्गे देवतटाकजलम् अतीव उत्तमम्'' इति शङ्करः उक्तवान् ।

''पश्चात्तापात् नेत्रमुक्तं जलं सर्वेषु महत्तमम्'' इति विचारं कुर्वन् लक्ष्मणः उक्तवान् ।

''स्नेहाय मानवः रोदिति, तत् अश्रुजलं वास्तविकं जलम्'' इति वत्सलः नामदेवः उक्तवान् ।

छात्राः एवम् उत्तराणि दत्तवन्तः । किन्तु तैः उत्तरैः आचार्यः न सन्तुष्टः ''मम मनसि यत् उत्तरम् आसीत् तत् केनापि न कथितम्'' इति उक्तवान् । ''भवतः मनसि किम् उत्तरम् अस्ति?'' इति छात्राः पृष्टवन्तः । अहम् एकां कथां कथयामि । ततः भवन्तः उत्तरं ज्ञातुमर्हन्ति इति शिक्षकः उक्तवान् । किं प्रियं बालानां कथायाः ऋते ? ''कथां कथयामि'' इति यावत् शिक्षकेण उक्तं तावत् सर्वे छात्राः शिक्षकसमीपम् आगतवन्तः । कथा प्रारब्धा ।

रामः लक्ष्मणः च सीताम् अन्विष्यन्तौ वने अटतः स्म । मार्गे भिल्लपुरन्ध्री शबरी मिलितवती । सा रामस्य प्रतीक्षां कुर्वती आसीत् । सा रामस्य पूजां कृतवती । मधुराणि फलानि समर्पितवती च । यत्र शबरी निवसति स्म सः कश्चन प्राचीनः आश्रमः आसीत् । तत्र तदा शबरी एकाकिनी निवसति स्म । तस्य आश्रमस्य पुरतः यावत् दूरे दृष्टिः प्रसार्यते तावत् पुष्पाणि एव दृश्यन्ते स्म । सुन्दराणि सुगन्धीनि

SCERT TELANGANA

पुष्पाणि । रामचन्द्रः पुनः पुनः तानि पुष्पाणि पश्यति स्म । सः शबरीं पृष्टवान्, ''शबरि ! कः एतेषां पुष्पसस्यानाम् आरोपणं कृतवान् ? अहो ! कियन्ति सुन्दराणि दृश्यन्ते ! अहो सुगन्धोऽपि कियान् मधुरः !''

शबरी प्रत्युत्तरं दत्तवती, ''राम ! एतस्य कश्चन इतिहासः अस्ति । कथयामि, शृणोतु भवान् । बहुभ्यः वर्षेभ्यः पूर्वम् अत्र मतङ्गस्य महर्षेः आश्रमः आसीत् । तस्य कीर्तिः सुदूरं प्रसृता । नानाप्रदेशतः विद्यार्थिनः अध्ययनार्थम् आगत्य तस्य आश्रमे निवसन्ति स्म । मतङ्गमहर्षिः अतीव छात्रवत्सलः । सः यथा स्नेहसागरः तथा ज्ञानसागरः अपि आसीत् । आश्रमे पठन्तः छात्राः भविष्ये सज्जनाः भवेयुः इति एतदर्थं सः प्रयतते स्म ।

एकदा किम् अभवत् ? ग्रीष्मकालः समाप्तप्रायः । अचिरादेव रोहिणीमृगादीनां पर्जन्यस्य नक्षत्राणां कालः आरप्स्यते । किन्तु पर्जन्यकालार्थम् आश्रमे इन्धनस्य कापि व्यवस्था कल्पिता न आसीत् । शुष्ककाष्ठसङ्ग्रहः कृतः नासीत्। पर्जन्यकाले आर्द्रकाष्ठानि कथं ज्वलेयुः ? पाकः कथं भवेत् ? यावत् ग्रीष्मस्य दिनचतुष्टयम् अवशिष्टं तावदेव अरण्यतः शुष्ककाष्ठानां सञ्चाः आनीय स्थापनीयाः । परन्तु कः गमिष्यति, आनेष्यति च ?

## विचिन्त्य वदन्तु

* अध्यापकः छात्राणां सकाशात् आगतेभ्यः समाधानेभ्यः सन्तोषं न प्राप्नोत् इति अपठन् खलु ! तस्य कारणं किमिति भवन्तः भावयन्ति ?
* पवित्रजलं किम् ? इति पृष्टः अध्यापकः अन्ते रामायणे स्थितां कथामेकां प्रारभत खलु ! अस्य विषयद्वयस्य कस्सम्बन्ध इति ऊहित्वा वदन्तु ।

छात्राः स्वयमेव वनं गमिष्यन्ति इति मतङ्गमहर्षिः चिन्तयति स्म । किन्तु छात्राः न गतवन्तः। अन्ते एकस्मिन् दिने वृद्धः मतङ्गमहर्षिः हस्ते कुठारं गृहीत्वा स्वयं प्रस्थानं कृतवान् । एतत् दृष्ट्वा सर्वे छात्राः अपि प्रस्थिताः । आश्रमे निवासार्थम् आगताः अतिथयः महर्षयः अपि प्रस्थानं कृतवन्तः । यदा महापुरुषः पुरः गच्छति तदा सर्वं विश्वं तम् अनुसरति ।

आश्रमस्थाः सर्वे वनं गतवन्तः । काष्ठच्छेदनं कृतवन्तः । तैः काष्ठानां महासञ्चाः च बद्धाः । बालानां मस्तके लघुकाष्ठसञ्चाः, प्रौढानां मस्तके महाकाष्ठसञ्चाः। मतङ्गमहर्षिः स्वमस्तके काष्ठभारं गृहीतवान् । सर्वे आश्रमं प्रतिनिवृत्ताः । तृतीयः प्रहरः आसन्नः । सर्वे स्वेदाक्लिन्नाः । शरीरतः स्वेदः स्रवति स्म । ते स्वेदबिन्दवः भूमौ पतन्ति स्म ।



आश्रमः प्राप्तः । सर्वे विश्रामं कृतवन्तः । तस्यां रात्रौ अध्ययनं न प्रवृत्तम् । श्रान्ताः सर्वे

SCERT TELANGANA

शीघ्रं सुप्तवन्तः । केवलं भगवान् मतङ्गमहर्षिः ध्यानं करोति स्म । मम आश्रमस्य छात्राः भाविकाले सज्जनाः भवेयुः, जगतः सेवां कुर्युः'' इति एवं सः प्रभुं प्रार्थयते स्म ।

उषःकालः अभवत् । मतङ्गमहर्षिः मधुरस्वरेण आहूय छात्रान् अजागरयत् । यावत् सः छात्रैः सह यथा नित्यं तथा नदीं प्रति प्रस्थितः तावत् अहो आश्चर्यम्, सहसा मधुरः सुगन्धः आगतः । ''कुतः आगच्छति एषः मधुरः गन्धः?'' इति छात्राः पृच्छन्ति स्म । ''गच्छन्तु, अन्विष्यन्तु'' इति मतङ्गमहर्षिः उक्तवान् ।

तस्य सुगन्धस्य अन्वेषणं कर्तुं छात्राः प्रस्थितवन्तः । यस्याः दिशः सुगन्धः आगच्छति स्म तां दिशमुद्दिश्य चलितवन्तः । येन मार्गेण पूर्वेद्युः ते वनं गतवन्तः तथा प्रत्यागतवन्तः च, तस्य मार्गस्य दिशः सुगन्धः आगच्छति स्म । छात्राः तत्रैव गतवन्तः । राम ! किं ते छात्राः दृष्टवन्तः ? ते बालकाः स्थाने स्थाने सुन्दराणि पुष्पाणि विकसितानि दृष्टवन्तः । पुष्पाणि पूर्वेद्युः न आसन् । सहसा कुतः आगतानि ? किम् आकाशस्थाः तारकाः आश्रमस्य पुरतः आगत्य पूताः भवितुम् इच्छन्ति स्म ? कः पुष्पसस्यानाम् आरोपणं कृतवान् ?

### विचिन्त्य वदन्तु

* महर्षिः मतङ्गः शिष्यान् अरण्यं प्रति नेतुं किं कार्यम् अकरोत् ? अस्मिन् विषये सः महर्षिः कियत्पर्यन्तं सफलोऽभूत् ?
* छात्राणाम् आश्चर्यस्य कारणं किम् ?

छात्राः धावन्तः मतङ्गमहर्षेः समीपम् आगतवन्तः । ते ताम् आश्चर्यकरवार्तां गुरवे निवेदितवन्तः। मतङ्गमहर्षिः स्वयं तत् अपूर्वं दृश्यं द्रष्टुं गतवान् । सूर्यस्य कोमलाः किरणाः सर्वत्र प्रसरन्ति स्म । ते तानि पुष्पाणि चुम्बन्ति इव । रमणीयम् अपूर्वदृश्यम् । मतङ्गमहर्षिः पश्यन् एव स्थितः । सोऽपि भक्तिमयेन स्नेहेन तानि पुष्पाणि हस्तेन स्पृष्ट्वा तेषां वन्दनं कृतवान्।

''भगवन्, कुतः आगतानि एतानि पुष्पाणि ?'' इति छात्राः पृष्टवन्तः ?

''भवतां स्वेदतः । ह्यः भवन्तः एतेन मार्गेण मस्तके काष्ठसञ्चान् गृहीत्वा आगतवन्तः । भवतां शरीरेभ्यः स्वेदः निपतति स्म । सः अस्यां भूमौ पतति स्म । सः भूमिं सिञ्चति स्म । श्रमजातः पवित्रः स्वेदः। कर्मणां स्वेदः । ततः पवित्रं किम् अस्ति ? भवन्तः कथं श्राम्यन्ति ? कथं स्वेदक्लिन्नाः भवन्ति इति द्रष्टुं भूमाता एतानि पुष्परूपाणि सहस्रं नेत्राणि उद्घाटितवती इव । तस्याः हृदयं भवताम् उद्योगं दृष्ट्वा विकसितम् इव । हे बालकाः ! न हि परिश्रमात् ऋते पवित्रम् इह किमपि विद्यते । श्रमजातः स्वेदः तावत् देव एव । भवतां मनस्सु एतत् मुद्रयितुं यत्र यत्र भवतां स्वेदः पतितः तत्र तत्र देवः पुष्पाणि विकासितवान् । भवन्तः कदापि आलस्यं मा कुर्वन्तु । श्रमस्य महिमानं प्रभुः एतेषां पुष्पाणां रूपेण पाठयति । श्रमस्य स्वेदः न भवति चेत् जगत् कथं प्रचलेत् ? कृषीवलः न श्राम्यति, तस्य स्वेदः क्षेत्रे न स्रवति चेत् सस्यं कथं वर्धेत ? वायिकः वस्त्रं वयन् श्रान्तः न भवति चेत् भवन्तः शरीरेषु किं धरेयुः ? श्रमिकाः श्रमं कृत्वा भवतां गृहाणि न निर्मान्ति चेत् भवन्तः कुत्र निवसेयुः ? एतत् जगत् श्रमिकैः प्रचाल्यते । भवन्तः यदा तरुणाः भविष्यन्ति तदा स्वयं श्राम्यन्तु । श्रमिकाणां सम्मानं कुर्वन्तु । वेदेषु कश्चन महर्षिः लिखितवान् ।

**“न हि श्रान्तस्य ऋते सख्याय देवाः ।”**इत्यस्य अर्थः - यः न श्रान्तः तेन सह सख्यं देवः न करोति। देवः तस्यैव हस्तं स्नेहेन किमपि धरिष्यति यस्य हस्तः कार्यं कृत्वा श्रान्तः, जगति मङ्गलं कर्तुं श्रमं कृतवान् च । अलसस्य निरुद्यमस्य च देवः मित्रं न भवति । इदानीं कदापि श्रमकरणे आलस्यं मा कुर्वन्तु । ज्ञातं किं भवद्भिः ? “इति मतङ्गमहर्षिः स्नेहेन पृष्टवान्।

“आम्, आचार्य ! वयं श्रमं करिष्यामः । किमपि कार्यं कर्तुं न लज्जामहे । श्रमिकान् तृणवत् न गणयेम । वयं श्रमिकाणां सम्मानं कुर्याम । तैः विश्वं प्रचाल्यते इति सदैव मनसि निधाय तेषु कृतज्ञाः भवेम । प्रथमं ते सुखिनः सन्ति उत न इति पश्येम” इति छात्राः मतङ्गमहर्षिम् उक्तवन्तः ।

राम ! एषः एतेषां पुष्पाणाम् इतिहासः अस्ति । एतानि पुष्पाणि सदैव द्वादशमासेषु विकसन्ति । कोऽपि तेभ्यः जलं ददाति उत न ददाति चेदपि एतानि नित्यं प्रफुल्लितानि दृश्यन्ते । स्वेदस्य सः एकः बिन्दुः अनन्तकालपर्यन्तं तेभ्यः आर्द्रतां दास्यति इव । इदानीम् अस्मिन् आश्रमे कोऽपि नास्ति । भगवान् मतङ्गः निजधाम अगच्छत् अतः अत्र कः स्थास्यति ? अत्र इदानीं न छात्राः, न कश्चित् ऋषिः मुनिः वा । परन्तु एतानि पुष्पाणि मौनेन मतङ्गमहर्षेः महिमानं विश्वं कथयन्ति । राम ! भवते ददानि किम् एतानि पुष्पाणि ?”

“मास्तु । अहं तानि पुष्पाणि वन्दे । तानि पुष्पाणि नाम तस्य महर्षेः तपस्या, तस्य महर्षेः पुण्यानि” इति उक्त्वा रामः तानि पुष्पाणि नमस्कृतवान् । लक्ष्मणः अपि नमस्कृतवान् । रामलक्ष्मणौ प्रस्थितौ । पुष्पाणां सुगन्धः शबर्याः भक्तिः तथा च मतङ्गमहर्षेः पुण्यानि ताभ्यां सह गच्छन्ति स्म ।

शिक्षकः कथनं स्थगितवान् । छात्राः न वदन्ति स्म । “सर्वे मौनेन चलन्ति स्म” “समाप्ता किं कथा?” इति मधुकरः उक्तवान् । “तर्हि किं जलम् उत्तमम् ?” इति मधुकरः पृष्टवान् । “स्वेदस्य जलम्” इति लक्ष्मणः उक्तवान् । धनिकानां तु सततं स्वेदः उद्भवति । तल्पे शयानानां तेषां स्वेदः भवति। शरीरे बहूनि वस्त्राणि भवन्ति अतः स्वेदः भवति । केषाञ्चन जनानां शरीरे अतीव वातप्रकोपः भवति । तेषां कियान् स्वेदः आगच्छति इति मधुकरः उक्तवान् ।

“सः स्वेदः न । यस्मात् स्वेदात् किमपि उपयोगि वस्तु निर्मितं भवति, सर्वेषां कृते आवश्यकानि वस्तूनि निर्मितानि भवन्ति, धान्यं, पुष्पाणि, फलानि, गृहाणि, द्वाराणि, वस्त्राणि, गृहोपयोगीनि विविधानि वस्तूनि इत्यादीनि निर्मितानि भवन्ति सः च स्वेदः पवित्रः । परिश्रमजनितस्य उद्यमस्य स्वेदः । सः स्वेदः यस्य मस्तकतः शरीरतः च निर्गच्छति सः पवित्रः, सः पूज्यः, सः युक्तः, सत्यं स एव मनुष्यः । किन्तु इदानीं तादृशाः जनाः विरलाः । भवन्तः यदा तरुणाः भविष्यन्ति तदा तेषां श्रमिकाणां निमित्तं कार्यं कृत्वा तेषां जीवनं सुखमयं कुर्वन्तु” इति शिक्षकः उक्तवान् ।

**विचिन्त्य वदन्तु**

* अनेन अनुच्छेदेन तानि पुष्पाणि कथं विकसितानि इति अवगतानि खलु ! एतत् आधारीकृत्य प्रस्तुतपाठस्य अन्यत् नाम वदन्तु ।
* ‘यः न श्रान्तः तेन सह देवः सख्यं न करोति’ इति अपठन् खलु ! अस्य वृत्तान्तस्य निदर्शनानि पुराणगाथासु भवन्ति । तानि आलोच्य वदन्तु ।

**विचिन्त्य वदन्तु**

* श्रामिकाणां महत्त्वं विवृण्वन्तु ।
* मधुकरस्य प्रश्नं विश्लिष्य सम्यक् आलोच्य च समाधानानि ददतु ।

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. 'स्वेदस्य पुष्पाणि' अस्य नाम्नः श्रवणेन किमवगतवन्तः ?

२. अस्मिन् जगति किं जलं पवित्रमिति भवन्तः चिन्तयन्ति ? किमर्थम् ?

३. एतेन पाठेन भवन्तः किम् अवगतवन्तः ?

४. परिश्रमजनितस्य उद्यमस्य स्वेदः एव उत्तमः इति पाठे वर्णितं स्वलु ! भवान् एतत् अङ्गीकरोति वा किमर्थम् ?

### आ) अधः दत्तानि वाक्यानि कः कस्मै उक्तवान् इति लिखन्तु ।

१. गङ्गायाः जलं सर्वेषु पूतम् ।

२. सिंहदुर्गे देवतटाकजलम् अतीव उत्तमम् ।

३. भगवन् ! कुतः आगतानि एतानि पुष्पाणि ?

४. तस्याः हृदयम् भवताम् उद्योगं दृष्ट्वा विकसितम् इव ।

### इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

भारतभूमिः कर्मभूमिः, पुण्यभूमिः धन्यभूमिश्च अस्माकं देशस्य जनपदानि एव मूलाधाराः भवन्ति । अत्र सर्वे जनाः स्वकर्माणि श्रद्धया कुर्वन्तः आनन्दमनुभवन्ति । कृषीवलः स्वकष्टफलानि धान्यदीनि संस्पृश्य आनन्दमनुभवति । चर्मकराः पादरक्षाः समीकृत्य तापमपनयन्ति, स्वर्णकाराः नैपुण्येन सुन्दराणि स्वर्णाभरणानि आविष्कुर्वन्ति, कर्मागारेषु कर्मचारिणः आत्मनः स्वेदं जनोपयुक्तवस्तुरूपेण परिणमय्य जनान् सन्तोषयन्ति। एवं सर्वे श्रामिकजनाः स्वीयशक्त्या अत्यद्भुतानि वस्तूनि आविष्कृत्य जनानां प्रीतिपात्राणि भवन्ति !

१. भारतभूमिः कीदृशी ?

२. देशस्य मूलाधाराः के ?

३. कृषीवलाः कथम् आनन्दमनुभवन्ति ?

४. के जनानां प्रीतिपात्राणि भवन्ति ?

५. अनुच्छेदस्य शीर्षिकां सूचयन्तु !



SCERT TELANGANA

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. वनभोजनार्थं के के गताः ?

२. मतङ्गमहर्षेः आश्रमः कुत्रास्ति ?

३. कः पवित्रः स्वेदः ?

४. रामः किमर्थं पुष्पाणि नमस्कृतवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. भवान् श्रामिकजनान् कथं सम्भावयति ?

२. अस्य पाठस्य अन्यां शीर्षिकां सूचयन्तु । कारणानि लिखन्तु ।

३. ''न हि श्रान्तस्य ऋते सख्याय देवाः'' अमुं विषयं भवन्तः कथं समर्थयन्ति ?

आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. श्रमैकजीवनसौन्दर्यं नाम किम् ? अस्मिन् विषये भवताम् अभिप्रायं लिखन्तु ।

२. पाठयभागस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

इ) सर्जनात्मकततया / प्रशंसात्मकतया समाधानानि लिखन्तु ।

२. भवतः पाठशालाभिवृद्धिकार्ये के के जनाः किं किं दायित्वं वहन्तीति सूचीं कुर्वन्तु ।

१. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

శ్రమ అనే పునాదిపైనే అభివృద్ధి భవనం ఆధారపడి ఉంటుంది. శ్రమించడానికి ఎవరూ సిగ్గుపడకూడదు. సోమరితనంతో సమాజానికి భారం కాకూడదు. శ్రమైకజీవనసౌందర్యాన్ని చూడగలగాలి. శ్రమను గౌరవంగా భావించడం నేర్చుకోవాలి. శ్రమసంస్కృతిలో జీవించడం నేర్చుకోవాలి.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) भवतः परिसरेषु लभ्यमानानां केषाञ्चन पुष्पाणां नामानि लिखन्तु ।

आ) अधः दत्तानि पदानि उपयुज्य उदाहरणानुसारं वाक्यानि रचयन्तु ।

उदाः - मैत्री - मित्रम्

मैत्र्या शत्रुम् अपि मित्रम् कर्तुं शक्नुमः ।

१. कृषकाः - श्रामिकाः

२. तपः - मौनम्

३. पुष्पाणि - सुगन्धः

४. आचार्यः - छात्राः

SCERT TELANGANA

इ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां समानार्थकपदानि लिखन्तु ।

उदाः मुनयः विपिनेषु तपः कुर्वन्ति ।

विपिनेषु - अरण्येषु, गहनेषु

१. धूमज्योतिस्सलिलमरुतां सन्निपातः मेघः ।

२. पुष्पाणां सुगन्धः आघ्रातव्यः भवति ।

३. मार्गस्य अन्तिमभागे पर्वतः अस्ति ।

४. श्रमजातः स्वेदः पवित्रः

५. भवन्तः उद्यमे आलस्यं मा कुर्वन्तु ।

ई) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां विरुद्धार्थकपदानि लिखित्वा तान्युपयुज्य वाक्यानि रचयन्तु ।

उदाः सा रामाय मधुराणि फलानि समर्पितवती ।

मधुरः × तिक्तः

निम्बवृक्षस्य फलानि तिक्तानि भवन्ति

१. तत्र कश्चन प्राचीनः आश्रमः अस्ति ।

२. भवन्तः उद्यमे आलस्यं मा कुर्वन्तु ।

३. श्रमिकाणां सम्मानं कुर्वन्तु ।

४. धनिकानां तु सततं स्वेदः उद्भवति ।

५. इदानीं तादृशाः जनाः विरलाः ।

## २. व्याकरणांशाः

अ) पाठं पठित्वा अधः दत्तानां सन्धीनां पञ्च उदाहरणानि लिखन्तु ।

१. विसर्गसन्धिः २. यणादेशसन्धिः

आ) पाठस्थ 'क्त' प्रत्ययान्तपदानि पञ्च चित्वा लिखन्तु ।

उदा - गतः ।

इ) अधः दत्तानि सामान्यवाक्यानि संश्लिष्टवाक्यरूपेण परिवर्त्य लिखन्तु ।

उदा - रामलक्ष्मणौ वनं गतवन्तौ ।

रामलक्ष्मणौ भिल्लपुरन्ध्र्या शबर्या मिलितवन्तौ ।

**संश्लिष्टवाक्यम्** - रामलक्ष्मणौ वनं गत्वा भिल्लपुरन्ध्र्या शबर्या मिलितवन्तौ ।

१. आश्रमजनाः सर्वे वनं गतवन्तः

आश्रमजनाः काष्ठच्छेदनं कृतवन्तः ।

२. छात्राः आश्रमं प्राप्तवन्तः ।

छात्राः विश्रामं कृतवन्तः ।

३. रामः पुष्पाणि नमस्कृतवान् ।

लक्ष्मणः अपि नमस्कृतवान् ।

४. छात्राः न वदन्ति स्म ।

छात्राः मौनेन चलन्ति स्म ।

५. श्रमिकाः गृहनिर्माणं कुर्वन्ति ।

भवतां वर्षातपैः रक्षणं ददति ।

**ई) अधः दत्तानि वाक्यानि निर्देशानुसारं परिवर्तयन्तु ।**

१. वानरेण वृक्षः आरुह्यते । (कर्तरि)
२. भक्ताः देवालयं गच्छन्ति । (कर्मणि)
३. नर्तक्या नाट्यं क्रियते । (कर्तरि)
४. सौचिकेन वस्त्रं सीव्यते । (कर्मणि)
५. बालिका पत्रिकां क्रीणाति ।(कर्मणि)

**उ) अधः दत्तेषु वाक्येषु रिक्तस्थानानि पूरयन्तु ।**

१. सैनिकः देशं ---------------- । (रक्षति / रक्ष्यते)
२. नायकैः ----------------- क्रियते । (अभिनयः / अभिनयम्)
३. एतया जलं ----------------- । (पिबति / पीयते)
४. -------------- कथां वदति । (सः / तेन)
५. युवकैः सेवाकार्यं ------------------ । (कुर्वन्ति / क्रियते)

**ऊ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानि संशोधयन्तु ।**

१. यात्रिकः काशीं <u>गम्यते</u> ।
२. जननी <u>पाकः</u> पचति ।
३. छात्राः पुस्तकं <u>नीयते</u> ।
४. <u>गायकः</u> गीतं गीयते ।
५. लेखिकया <u>ग्रन्थं</u> लिख्यते ।

**परियोजनाकार्यम्**

भवतां गृहपरिसरे स्थितान् श्रामिकान् पृष्ट्वा तेषां सुखदुःखानि पत्रे विलिख्य कक्षायां श्रावयन्तु ।



SCERT TELANGANA

तृतीयः भागः

# ७. शठं प्रति शाठ्यम्

**पठन्तु, विचिन्त्य वदन्तु**

सीतान्वेषणाय प्रस्थिताः वानराः दक्षिणसमुद्रतीरं प्राप्ताः । लङ्कानगर्यां सीता अस्तीति श्रुत्वा आञ्जनेयः समुद्रलङ्घनं कर्तुकामः सन् महेन्द्रपर्वतात् पुप्लुवे । मार्गान्तरे नागमाता सुरसा तम् अवरुध्य ''भवान् मम मुखे प्रविशेत् । एषः दैवनिर्णयः'' इत्युक्तवती । आञ्जनेयः ''सीतायाः अन्वेषणाय अहं गच्छामि । कार्यसमाप्त्यनन्तरम् भवत्याः मुखम् अवश्यं प्रवेक्ष्यामि'' इत्यभ्यर्थितवान् । किन्तु सा न श्रुतवती । 'भवान् मम मुखम् अवश्यं प्रविशेद्' इति पुनर्जगाद सा । तदा आञ्जनेयः तस्य कायं विशालं कृतवान् । सुरसापि तस्याः मुखं विस्तारितवती । हठात् स आञ्जनेयः सूक्ष्मरूपं धृत्वा तस्याः मुखविवरं प्रविश्य क्षणे बहिः निरगात् । ''मातः ! भवत्याः कामना मया पूरिता ! अहं गच्छामि'' इति उक्त्वा सः प्रस्थितवान् ।

**प्रश्नाः**

१. सीतान्वेषणाय के प्रस्थिताः ?
२. नागमाता किमर्थम् आञ्जनेयं निरुद्धवती ?
३. अस्मिन् सन्दर्भे आञ्जनेयस्य चातुर्यं किम्?

**उद्देश्यम्**

* सामाजिकदुराचाराणां विषये ज्ञानवर्धनम् ।
* पारिवारिकसमस्यानामवबोधनम् प्रतिस्पन्दनगुणवर्धनम् ।
* गृहे उत्तरदायित्वस्य स्वीकरणाभ्यासवर्धनम् ।

**छात्रेभ्यः सूचनाः**

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

**कविपरिचयः**

पाठ्यभागोऽयं संस्कृतभारती - बेङ्गलूरुद्वारा प्रकाशितात् 'कविकोपकलापः' इत्यस्मात् नाटकसङ्ग्रहात् सङ्गृहीतः ।

**प्रवेशिका**

आधुनिककाले सामाजिकदुराचारेषु 'वरशुल्कदुराचारः' एकः । अनेन बह्व्यः स्त्रियः पीडिताः भवन्ति । अनेन अनेककुटुम्बानां विच्छित्तिः जायते । तादृशदुराचारनिर्मूलनस्य आवश्यकतां छात्राः जानीयुः । प्रस्तुतपाठे 'रेवतीश्रीधरौ' अस्मिन् विषये कियत्पर्यन्तं कृतकृत्यौ भवतः इति अवगच्छन्तु ।

## (प्रथमं दृश्यम्)

(श्रीनिवासस्य गृहम् । चिन्तामग्नः श्रीनिवासः आसन्दे उपविष्टः अस्ति । पुरतः त्रिपाद्याः उपरि काफीचषकः अस्ति ।)

लक्ष्मीः - (प्रविश्य) भोः ... भोः ... ।

श्रीनिवासः - (निरुत्तरम्)

लक्ष्मीः - (समीपम् आगत्य) किमिदं भोः अहम् आह्वयन्ती एव अस्मि, भवान् न शृणोति एव .....! किं चिन्तयति ?

श्रीनिवासः - हूँ .... अन्या का चिन्ता स्यात्, रेवत्याः विवाहचिन्तां विना तदेव चिन्तयन् उपविष्टः ........... ।

लक्ष्मीः - हूँ .......... (स्मृत्वा) किं भोः! गतसप्ताहे अत्र आगत्य गतः सः शास्त्री पुनः न आगतवानेव किल, किमर्थं स्यात् ......... ?

(द्वारे शब्दः)

हूँ ........ कश्चित् आगतवान् इति मन्ये, द्वारम् उद्घाटयतु । अथवा ............ भवती स्वकार्यं पश्यतु । अहमेव उद्घाटयामि ।

(गत्वा द्वारम् उद्घाटयति, शास्त्री प्रविशति ।)

ओ.....हो....! निश्चयेन भवान् शतायुः शास्त्रिमहोदय ! यतः इदानीं भवतः नामस्मरणमेव कुर्वन्तौ आस्व । तावता भवानेव प्रत्यक्षं जातः । आगच्छतु .... उपविशतु ..... ।

शास्त्री - भवतु..... । गतसप्ताहे अहं कस्यचित् वरस्य विषयम् उक्तवान् आसं खलु, तद्विषये एव वार्तालापं कर्तुं गतवान् आसम् ।

श्रीनिवासः - किम् अभवत् ?
शास्त्री - वरः तु अत्यन्तं योग्यः ।
श्रीनिवासः - किं वयः तस्य ?
शास्त्री - अष्टाविंशतिः वर्षाणि ।
श्रीनिवासः - उद्योगः ........... ?
शास्त्री - कस्मिंश्चित् विद्यालये सः उपन्यासकः अस्ति ।
श्रीनिवासः - वरः कीदृशः ?
शास्त्री - स तु श्रीरामचन्द्रसदृशः भोः ! तावत् अधीतवान् चेदपि ज्येष्ठानां विषये कियान् विनयः, कीदृशी श्रद्धा ... ! यदि सः रेवत्याः पतिः भविष्यति तर्हि तस्याः भाग्यमेव।
श्रीनिवासः - तद्भवतु शास्त्रिमहोदय, ते सर्वे रेवतीम् अङ्गीकुर्युः वा ?
शास्त्री - रेवत्याः भावचित्रं मया प्रदर्शितम् । चित्रं दृष्ट्वा तु ते अत्यन्तं सन्तुष्टाः । अन्यच्च भवतः पुत्र्यां का न्यूनता भोः !
श्रीनिवासः - तर्हि वार्तालापं कर्तुं कदा गच्छाम......?
शास्त्री - तिष्ठतु, तिष्ठतु, महाशय ! मया इतोऽपि किञ्चित् वक्तव्यम् अस्ति ।
श्रीनिवासः - किं तत् ? वदतु भोः !
शास्त्री - वध्वाः विषये तेषाम् आक्षेपः कोऽपि नास्ति । किन्तु भवतः सकाशात् ते काश्चित् अपेक्षां कुर्वन्ति ।
श्रीनिवासः - काम् अपेक्षां कुर्वन्ति ?
शास्त्री - श्रीनिवासमहोदय ! भवान् जानाति एव, अस्मिन् काले वरदक्षिणां विना कोऽपि न वृणोति । 'वरदक्षिणां न स्वीकुर्मः'' इति केचन वदन्ति चेदपि वरोपचारः इति नाम्ना किमपि स्वीकुर्वन्ति एव ।

**विचिन्त्य वदन्तु**

* ''अस्मिन् काले वरदक्षिणां विना कोऽपि न वृणोति'' इति शास्त्रिमहोदयः अवदत् खलु ! तत् कियत्पर्यन्तं वास्तविकम् ? ''वरशुल्कं स्वीकरणीयम्'' इत्यस्मिन् विषये भवतामभिप्रायं वदन्तु ।

श्रीनिवासः - एते किमिच्छन्ति, वरदक्षिणाम् उत वरोपचारम् ?
शास्त्री - वस्तुतः वरदक्षिणास्वीकरणं सः वरः श्रीधरः न इच्छति इति श्रुतम् । परन्तु तस्य पिता तु न्यूनातिन्यूनं दशलक्षरूप्यकाणि इच्छति ।
लक्ष्मीः - दशलक्षरूप्यकाणि !
शास्त्री - आं भगिनि ! किं कर्तुं शक्यम् ! इदानीं कालः एव तादृशः । पश्यतु, गतमासे मम भगिन्याः पुत्र्याः विवाहः जातः । तस्याः पतिः कस्मिंश्चित् कार्यालये लिपिकारः। तस्मै अपि पञ्चलक्षरूप्यकाणि दातव्यानि अभवन् ।
श्रीनिवासः - शास्त्रिमहोदय ! यदि भवान् तस्य गृहं प्रति मां नेष्यति तर्हि अहमेव तेन सह वार्तालापं करोमि । अस्माकं परिस्थितिं ज्ञात्वा सः अङ्गीकुर्यादिति मम विश्वासः अस्ति ।
शास्त्री - सा तु केवलं भवतः भ्रान्तिः । भवतु, तर्हि अद्यैव गच्छामः ।


SCERT TELANGANA

## (द्वितीयं दृश्यम् )

(वीरभद्रस्य गृहम् । वीरभद्रः, श्रीनिवासः शास्त्री च आसन्देषु उपविष्टाः सन्ति ।)

वीरभद्रः - पश्यतु शास्त्रिमहोदय ! मम अभिप्रायम् अहं स्पष्टम् उक्तवान् अस्मि । वधूविषये अस्माकं कोऽपि आक्षेपः नास्ति । परन्तु वरदक्षिणाविषये तु मम निर्णयः एव अन्तिमः। तत्र परिवर्तनं तु न शक्यमेव ।

श्रीनिवासः - तथा न वदतु महाभाग ! अहं तु सेवानिवृत्तः प्राथमिकशालाशिक्षकः । इदानीं तु निवृत्तिवेतनेन कथमपि जीवनं यापयन् अस्मि । पुत्रीं यदि वधूरूपेण समीचीनं गृहं प्रापयामि, तर्हि मम उत्तरदायित्वं समाप्तं भवति । अनन्तरं 'राम, कृष्ण' इति देवध्यानं कुर्वन् कालं यापयामि ।

वीरभद्रः - तत्सर्वं सत्यं महाशय ! परन्तु भवतः यावत्यः समस्याः सन्ति ततोऽपि अधिकाः समस्याः ममापि सन्ति । मयापि पुत्र्याः विवाहः करणीयः अस्ति । वरदक्षिणां विना तां परिणेतुं कोऽपि सिद्धः भवति वा ? तस्याः विवाहसन्दर्भे मया कियत् दातव्यं भविष्यतीति कः जानाति ? तत्सर्वं विचिन्त्य एव अहम् एवम् उक्तवान् अस्मि ।

शास्त्री - तत्तु सत्यं ... परन्तु वीरभद्रमहाभाग ! रेवत्याः विषये किञ्चित् वक्तव्यम् अस्ति । सत्यं वक्तव्यं चेत् सा भवतः पुत्रस्य अत्यन्तम् अनुरूपा । तादृशी गुणवती सुशीला मया अन्या कापि न दृष्टा । गृहकार्यविषये तु सा अत्यन्तं कुशला ।

वीरभद्रः - हुँ ........ ततोऽपि गुणवतीनां विद्यावतीनां बह्वीनां वधूनां प्रस्तावाः आगताः आसन् भोः ! परन्तु मया स्पष्टं निराकृतम् । इदानीमपि चतुर्दशलक्षरूप्यकाणि दातुं सिद्धाः कन्यापितरः बहवः सन्ति । अहं तु भवतः विषये गौरवबुद्ध्या 'एषः सम्बन्धः भवतु' इति उक्तवान् । यदि तावत् दातुं न शक्यते तर्हि एषः सम्बन्धः मास्तु एव ।

श्रीनिवासः - तथा न वदतु महाभाग ! वयं भवतः सम्बन्धम् इच्छामः एव ।

शास्त्री - परन्तु वीरभद्रमहाभाग ! श्रीधरः वधूं दृष्ट्वा अङ्गीकुर्यात् खलु !

वीरभद्रः - तद्विषये भवतः चिन्ता एव मास्तु । मम पुत्रः श्रीरामचन्द्रः इव पितृवाक्यपरिपालकः मया सूचितां परिणेतुं सः सिद्धः भवत्येव । तत्र संशयः एव नास्ति । भवन्तः धनस्य व्यवस्थां कुर्वन्तु । अन्यत्सर्वं करिष्यामः ।

श्रीनिवासः - आ...... क्षम्यताम्, अहम् अन्तिमवारं प्रार्थये । अहं तावद् दातुं न शक्तः । कथमपि यत्किञ्चित् दद्याम् । तदेव स्वीकृत्य मम पुत्री भवद्भिः अङ्गीकर्तव्या ।

वीरभद्रः - शास्त्रिमहोदय, अहं यावद् वदामि चेदपि एषः मम समस्यां न अवगच्छति एव ! त्यजामः एतस्य सम्बन्धस्य विषयम् ।

श्रीनिवासः - न......न..... ! मम सप्ताहात्मकम् अवकाशं ददातु महाशय ! तावति काले अहं विचिन्त्य कथयिष्यामि ।

वीरभद्रः - अस्तु, तथैव करोतु । सप्ताहानन्तरम् आगत्य निर्णयं वदतु ।

शास्त्री - भवतु, वयं साधयाम । तर्हि ... !

(गच्छतः)

**विचिन्त्य वदन्तु**

* वीरभद्रस्य व्यक्तित्वमधिकृत्य वदन्तु ।



SCERT TELANGANA

## (तृतीयं दृश्यम्)

(श्रीनिवासस्य गृहम् । लक्ष्मीः श्रीनिवासः च उपविश्य सम्भाषणं कुर्वन्तौ स्तः ।)

लक्ष्मीः - हुँ ......... तर्हि गमनप्रयोजनं न सिद्धम् ।

श्रीनिवासः - किं कुर्मः लक्ष्मि ! वरः अत्यन्तं योग्यः । तथापि वरदक्षिणाविषये कथं तेषां व्यामोहः इति न जानामि ।

लक्ष्मीः - हुँ .......... को वा धनाशया मुक्तः भवति ? भवतु, एषः सम्बन्धः अस्माभिः कर्तुं न शक्यः इति विचिन्त्य तूष्णीं भवामः, तावदेव ।

श्रीनिवासः - (किञ्चित् विचिन्त्य, सगम्भीरम्) लक्ष्मि ! अहं तु रेवत्याः विवाहं तेन श्रीधरेण सहैव कारयामि ।

लक्ष्मीः - (साश्चर्यम्) इत्युक्ते ..... वरदक्षिणां विना ते अङ्गीकुर्युः इति इदानीमपि आशा वा ?

श्रीनिवासः - नैव, वरदक्षिणां दत्त्वा एव विवाहं कारयिष्यामि । दशलक्षरूप्यकाणि अपि दास्यामि । (रेवती प्रविशति । मातापितरौ गम्भीरसम्भाषणे मग्नौ इति ज्ञात्वा दूरे एव किमपि कार्यं कुर्वती इव तिष्ठति ।)

लक्ष्मीः - (साश्चर्यम्) किं भोः, भवान् दशलक्षरूप्यकाणि दास्यति वा ? सर्वकारस्य अदृष्टयोजनायां धनं किमपि लब्धं किम् ?

श्रीनिवासः - नैव लक्ष्मि ! एतत् गृहं विक्रीय धनं दास्यामि इति निर्णयं कृतवान् अस्मि ।

लक्ष्मीः - (सखेदम्) किम्......अस्मदीयमिति विद्यमानम् एतदेकं गृहमपि विक्रीणीते वा ? अग्रे का वा गतिः आवयोः ?

श्रीनिवासः - भवती चिन्तां न करोतु लक्ष्मि ! रेवती प्रथमम् उत्तमं गृहं प्राप्नोतु । तेन आवयोः उत्तरदायित्वं समाप्तं भवति । अनन्तरं खलु आवयोः जीवनस्य चिन्ता । गृहे उपविश्य कालं यापयितुं ममापि कष्टम् । अतः कुत्रापि पुनः कमपि उद्योगं करोमि । आवयोः जीवनार्थं यावत् आवश्यकं तावत् कथमपि सम्पादयितुं शक्यम् ।

**विचिन्त्य वदन्तु**

* श्रीनिवासः 'वरशुल्काय' स्वगृहं विक्रेतव्यमिति अचिन्तयत् खलु ! तत् युक्तं किम् ?

## (चतुर्थं दृश्यम्)

(श्रीनिवासस्य गृहम्)

रामरावः - आ... भवतः गृहम् अस्माभिः अङ्गीकृतं श्रीनिवासमहोदय । तथापि विंशतिलक्षरूप्यकाणि इति तु किञ्चित् अधिकमेव । भवतु, मूल्यस्य अर्धभागम् इदानीमेव ददामि, स्वीकरोतु । (धनं ददाति ।)

श्रीनिवासः - (स्वीकृत्य) धन्यवादः ।

रामरावः - अवशिष्टं धनं भवन्तः यदा गृहं त्यक्ष्यन्ति तदा दास्यामि । भवान् प्रथमं पुत्र्याः विवाहं समापयतु । गृहस्य पञ्जीकरणादिकम् अनन्तरं कारयिष्यामः ।

श्रीनिवासः - तथैव भवतु । पुनर्मिलामः ।



SCERT TELANGANA

## (पञ्चमं दृश्यम्)

(विवाहस्य दृश्यम् । उपविष्टौ वधूवरौ । पुरतः उपविष्टः शास्त्री मन्त्रं वदति । केचन इतस्ततः सञ्चरन्ति । पुरतः दृश्येते वीरभद्रः, श्रीनिवासः च ।)



वीरभद्रः - श्रीनिवासमहोदय ! कुत्र अस्ति धनम् ? प्रथमं धनं दातव्यम् अनन्तरमेव वध्वाः कण्ठे माङ्गल्यधारणम् ।

श्रीनिवासः - अत्र अस्ति महाशय ! अस्यां यानपेटिकायाम् अस्ति । स्वीकरोतु, सम्यक् दशलक्षरूप्यकाणि सन्ति । कृपया गणयतु। (यानपेटिकां ददाति ।)

वीरभद्रः - (स्वीकृत्य, हसन्) भवतु, तर्हि विवाहः प्रचलतु.....।

शास्त्री - माङ्गल्यं तन्तुनानेन मम जीवनहेतुना ।
कण्ठे बध्नामि सुभगे ! त्वं जीव शरदां शतम् ।।
(मङ्गलवाद्यानि श्रूयन्ते । श्रीधरः मङ्गलसूत्रं धारयति ।)

## (षष्ठं दृश्यम्)

(यानपेटिकां गृहीत्वा वीरभद्रः प्रविशति । प्रकोष्ठे मन्दः प्रकाशः अस्ति ।)

वीरभद्रः - (स्वगतम्) हूँ ..... कथमपि दशलक्षरूप्यकाणि हस्तङ्गतानि । दशलक्षरूप्यकाणि ! अथवा .... सकृत् गणयामि । अत्र कोऽपि नास्ति । शीघ्रं गणयामि ........ आ .... (पेटिकाम् उद्घाट्य पश्यति ।) सर्वाणि सहस्ररूप्यकाणां धनपत्राणि ! (गणयति ।) एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्....
(गृहीतच्छुरिकः चोरः शनैः प्रविशति)

चोरः - (समीपम् आगत्य) रे वीरभद्र ! धनं सर्वम् अत्र ददातु ।

वीरभद्रः - नैव.....नैव.... । धनं, मम धनम् ..... !

चोरः - धनपिशाच ! पुत्रस्य नाम्ना भवान् धनं गृह्णाति वा ? ददातु अत्र ...हूँ....।

वीरभद्रः - आ.... स्वीकरोतु, स्वीकरोतु! (सर्वं ददाति ।)

चोरः - साधु, साधु ! (स्वगतम्) इतोऽपि कञ्चित्कालम् अत्रैव तिष्ठतु एषः दुष्टः । एतस्य हस्तपादं वस्त्रेण बद्ध्वा मुखमपि वस्त्रेण पूरयामि येन एषः आक्रोशं कर्तुं न शक्नुयात्...।

(तथैव करोति । वीरभद्रः विरोधं कुर्वन् रोदिति । चोरः हसन् पेटिकां स्वीकृत्य गच्छति)

श्रीधरः - (प्रविश्य) अरे, पिता कुत्र अस्ति, न दृश्यते एव.... । तात ! तात.... ! (अन्विष्यन् समीपम् आगत्य) अरे, किमिदं भोः ? (विमोचयति) कथम् एवं सञ्जातम् ?

वीरभद्रः - चोरः, चोरः । कश्चित् चोरः आगत्य मम सर्वस्वम् अपहृतवान् । भवतः वरदक्षिणारूपेण प्राप्तानि दशलक्षरूप्यकाणि अपि अपहृतवान् ।

श्रीधरः - हा हन्त !

वीरभद्रः - सः चोरः अत्रैव कुत्रापि अस्ति, दूरं गतवान् न स्यात् । गृह्णातु तम् । चोरः .. चोरः .....। (उच्चैः आक्रोशति) (जना अपि आक्रोशन्ति । बैकूयानस्य शब्दः श्रूयते ।)

आरक्षकाधिकारी -(नेपथ्ये) किं भोः, किं सञ्जातम् ? कुत्र अस्ति चोरः ? किम् अपहृतम् ?

वीरभद्रः - मम दशलक्षरूप्यकाणि .....

श्रीधरः - (अर्धे एव) श्.....तात ! अत्र शृणोतु । कश्चित् आरक्षकाधिकारी आगतः अस्ति ।

वीरभद्रः - आ ..... समीचीनं जातम् । तं सर्वं निवेदयामि ।

श्रीधरः - (कर्णे) परन्तु तं निवेदयति चेत् इतोऽपि समस्या भवति ।

वीरभद्रः - का समस्या ?

श्रीधरः - भवतः समीपे तावत् धनं कुतः आगतम् इति प्रश्नः भवति । तदा तु वरदक्षिणारूपेण स्वीकृतम् इतिवक्तव्यमेव भवति । परन्तु इदानीं वरदक्षिणास्वीकरणं न्यायविरुद्धं नियमविरुद्धं खलु ! अतः तेनैव कारणेन भवतःमम च बन्धनमपि भविष्यति । आवाभ्यां कारागृहं प्रति गन्तव्यं भविष्यति ।

वीरभद्रः - (सगद्गदम्) तर्हि किं कुर्मः इदानीम् ?

श्रीधरः - भावन् तूष्णीं तिष्ठतु, अहं तम् आरक्षकाधिकारिणं कथमपि प्रेषयामि । (प्रेषयिष्यति)

**विचिन्त्य वदन्तु**

* वीरभद्रसकाशात् चोरः धनम् अपहृतवान् खलु ! स चोरः कः इति भवान् ऊहते ?

## (सप्तमं दृश्यम्)

श्रीधरः - रेवति ! रेवति !

रेवती - ........ !

श्रीधरः - रेवति ! इतोऽपि कोपः न गतः वा ?

रेवती - उ हूँ ..... ।

श्रीधरः - हूँ ..... किमर्थं मयि तावान् कोपः ?

रेवती - (रुदती) भवता मया लिखितं पत्रं न प्राप्तमासीत् वा ?

श्रीधरः - निश्चयेन प्राप्तमासीत् ।

रेवती - तत् पत्रं भवता न पठितं वा ?

श्रीधरः - पठितं, सम्यक् पठितम् । मुक्ताफलसदृशानि भवत्याः अक्षराणि पुनः पुनः पठितानि ।

रेवती - तर्हि तथापि किमर्थं माम् अङ्गीकृतवान् ?

SCERT TELANGANA

श्रीधरः - हुँ...... यतः तत् पत्रं पठितम्, अतः एव अङ्गीकृतवान् । तस्मिन् पत्रे किं लिखितवतीति स्मरति वा ? पश्यतु एतदेव खलु भवत्या लिखितं पत्रम् ? (दर्शयति)

रेवती - ऊ......

श्रीधरः - पुनरेकवारं पठामि वा ? (पठति)

श्रीमते श्रीधराय .....

सादरं वन्दनानि । एतत् पत्रं लिखन्त्याः मम परिचयः भवतः न स्यात् । अथवा भावचित्रद्वारा एतावता मम परिचयः जातः अपि स्यात् । अहं तस्य पुत्री यः परह्यः स्वपुत्र्याः विवाहविषये भवतः पितरं प्रार्थयितुम् आगतवान् आसीत् । तैः तत्र कृतः वार्तालापः भवता ज्ञातः स्यात् । वरदक्षिणां विना विवाहः न शक्यः एव इति भवतः पित्रा स्पष्टम् उक्तम् । मम पिता तु न तावान् धनिकः । तथापि सः कथमपि मम विवाहं कर्तुमिच्छन्, तदर्थं धनं सङ्ग्रहीतुम् अस्मदीयमिति विद्यमानम् एकमेव गृहमपि विक्रेतुं सज्ञः अस्ति इदानीम् । अस्माकं प्रतिरोधं विरुद्ध्यापि सः तस्य विक्रयणं करिष्यति एव । परन्तु यत् गृहं मम पिता अत्यन्तकष्टेन निर्मितवान्, यत्र तस्य जीवनस्य बहुभागः यापितः, तस्य गृहस्य विक्रयणं मम निमित्तं क्रियमाणम् अहं सर्वथा न इच्छामि ।

भवान् विद्यावान्, विद्यालये उपन्यासकः अपि । तथापि वरदक्षिणापिशाचात् न मुक्तः । तादृशस्य भवतः अपि यदि हृदयम् अस्ति, हृदये यदि केचन भावाः सन्ति, तर्हि कृपया एकम् उपकारं करोतु मां न अङ्गीकरोतु । किमपि कारणम् उक्त्वा मां निराकरोतु। तेन एषः विवाहः न भविष्यति । मम पित्रा सम्पादितं गृहमपि रक्षितं भवति ।

अन्यदपि स्पष्टं लिखामि - यदि मम अभिप्रायम् अविगणयन् मां परिणेष्यति, अहं भवतः अनुकूला पत्नी न भविष्यामि । यतः पितुः दुःखकारणेन भग्नहृदया अहं भवता सह सुखेन जीवितुम् अस्मिन् जन्मनि न शक्नोमि । अतः सविनयं प्रार्थये, मां निराकरोतु ।

इति काचित् मन्दभागा ।

(रेवती रोदिति)

श्रीधरः - हूँ ..... एतदेव खलु ! भवत्याः पत्रम् ।

रेवती - (रुदती) आम् .... । तर्हि, तथापि किमर्थं मां न निराकृतवान् । अहं जानामि, भवन्तः धनिकाः अस्मादृशानां जीवनैः क्रीडन्ति ।

**विचिन्त्य वदन्तु**

* रेवती श्रीधरं प्रति लेखलेखनविधानं समुचितं वा? अथवा केन प्रकारेण लेखनीयमिति भावयन्ति ?

श्रीधरः - हुँ.....भवतु, इदानीं मम अङ्गीकारेण किम् अभवत् ?

रेवती - (कोपेन) अन्यत् किम् ? अस्माकं गृहं विक्रीतं, मातापितरौ अनाथौ जातौ । यानि



SCERT TELANGANA

दशलक्षरूप्यकाणि गृहं विक्रीय भवतः पित्रे दत्तानि तानि अपि चोरितानि । अतः तस्य दृष्ट्या अपि अहम् अशुभकारिणी जाता । किमन्यत् भवेत् ? धनिकानां भवतां क्रीडायाम् अहं बलिपशुः अभवम् ।

श्रीधरः - बलिपशुः न जाता रेवति ! परन्तु मम गृहदेवता जाता भवती । भवती तस्मिन् विषये चिन्तां न करोतु । अद्य चोरेण दशलक्षरूप्यकाणि अपहृतानि खलु ! तानि कुत्रापि न गतानि । अत्रैव सन्ति, पश्यतु । (यानपेटिकां दर्शयति ।)

रेवती - (आश्चर्येण) आ..... ! तर्हि ..... तर्हि ....सः चोरः ...... ?

श्रीधरः - सः चोरः न, मम सहोद्योगी रमेशः । न केवलं सः, सः आरक्षकाधिकारी अपि मम मित्रमेव । इतोऽपि वदामि वा, भवत्याः पितुः गृहं क्रीतमिव येन नाटकं कृतं सः रामरावः अपि मम मित्रमेव । अतः एव सः आरम्भे एव तावत् धनं दत्तवान् ।

रेवती - एवं वा .... तर्हि एतावत्पर्यन्तं भवद्भिः सुदीर्घं नाटकमेव कृतम् !

श्रीधरः - हूँ .... भवती न जानीयात् यत् अयं श्रीधरः नाटके चतुरः इति । एतावत् अद्य पर्यन्तम् अनेकेषु नाटकेषु मया पारितोषिकाणि प्राप्तानि । परन्तु अस्मिन् नाटके मया अत्युत्कृष्टं पारितोषिकं प्राप्तं येन अहं धन्यः अस्मि ।

रेवती - किं तत्पारितोषिकम् ?

श्रीधरः - तत्तु पारितोषिकं निर्जीवं न, सजीवं पारितोषिकम् ..... त्वमेव ।

(द्वौ हसतः) **(पटाक्षेपः)**

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. एतस्य पाठ्यांशस्य ''शठं प्रति शाठ्यम्'' इति शीर्षिका समुचिता वा ? कथम् ?
२. नाटकविषये भवतः अभिप्रायः कः ? सहेतुकं विवृण्वन्तु ।
३. रेवती लेखं किमर्थं लिखितवती ।

**आ) पाठं पठित्वा अधः दत्तानि वाक्यानि कः कं प्रति उक्तवान् इति लिखन्तु ।**

१. काम् अपेक्षां कुर्वन्ति ?
२. मया सूचितां परिणेतुं सः सिद्धः भवत्येव ।
३. हुँ.... तर्हि गमनप्रयोजनं न सिद्धम् ।
४. भवान् प्रथमं पुत्र्याः विवाहं समापयतु ।
५. पुत्रस्य नाम्ना भवान् धनं गृह्णाति वा ।
६. आवाभ्यां कारागृहं गन्तव्यं भविष्यति ।
७. अस्माकं गृहं विक्रीतं, मातापितरौ अनाथौ जातौ ।

SCERT TELANGANA

इ) **अधः दत्तमनुच्छेदं पठित्वा दत्तानां विषयाणां साधुतां असाधुतां वा '✓', '×' इति चिह्नाभ्यां कोष्ठकेषु सूचयन्तु ।**

पुरुषो वा स्यान्नारी वा भवेत् आत्मनः परसात्करणे तस्य सम्पूर्णं स्वातन्त्र्यम् अस्ति । मानवो हि परमेश्वरस्य प्रमुखा सृष्टिः, विश्वस्मिन्ननुपमा शक्तिः । तस्य स्वातन्त्र्यचूर्णने न मनुष्यस्याधिकारः। शिक्षा मनुष्यस्य आत्मानमुचितानुचितविवेकिनं शक्तिशालिनं च निर्माति । यदि शिक्षितोऽपि आत्मनः सत्त्वानि नावधारयति तर्हि किं कृतं शिक्षया ? अत एव शिक्षितस्त्रीसमाजे निजाधिकाररक्षायाः प्रश्नः साम्प्रतं प्रवृत्तोऽस्ति । एनं प्रश्नम् उद्दिश्य अस्माकं समाजे नानारूपेण चर्चाः प्रचरन्ति । किन्तु आत्मनो हितं स्वयं स्त्रीजातिः चिन्तयेत् ।

१. अस्मिन् अनुच्छेदे नारीणामपेक्षया पुरुषाणामेव आधिक्यं भवेदिति अस्ति । ( )
२. स्वातन्त्र्यस्य स्वीकरणे, अस्वीकरणे वा मानवस्य अधिकारः नास्ति । ( )
३. धनं मनुष्यम् उचितानुचितविवेकिनं शक्तिशालिनं च निर्माति । ( )
४. शिक्षितस्त्रीसमाजे निजाधिकाररक्षायाः प्रश्नः साम्प्रतं प्रवृत्तो नास्ति । ( )
५. भगवतः अनुपमा विशिष्टा च सृष्टिः "मानवः"। ( )
६. अस्यानुच्छेदस्य सन्देशः 'सृष्टौ स्त्रीपुरुषयोः स्वातन्त्र्यं समानमेवेति' । ( )

ई) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. श्रीनिवासः किं चिन्तयन् आसीत् ?
२. वरस्य पिता विवाहं किमर्थम् अङ्गीकृतवान् ।
३. वरः कीदृशः इति वीरभद्रः कथयति ?
४. श्रीनिवासस्य उत्तरदायित्वं किम् ? सः कथं तस्य जीवनं यापयति ?

## II. भावाभिव्यक्तीकरणम् - सर्जनात्मकता

अ) **अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. वरदक्षिणायाः विषये भवतः अभिप्रायं लिखन्तु ।
२. श्रीधरेण कृतं कार्यम् समीचीनम् / असमीचीनं वा ? कथमिति लिखन्तु ।
३. पिता गृहं विक्रीयापि पुत्र्याः विवाहं कारयितुम् इच्छति । पिता किमर्थम् एवं चिन्तयति ? कारणानि लिखन्तु ।
४. मातापितरौ क्लेशं सोढ्वा अपि बालेभ्यः सन्तोषं प्रदातुमिच्छतः । भवन्तः तौ सन्तोषयितुं किं कर्तुं शक्नुवन्ति ?

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. पाठ्यांशस्य सारं स्वीयवाक्यैः लिखन्तु ।
२. वरदक्षिणानिर्मूलनाय समाजे कीदृशं परिवर्तनम् आवश्यकमिति लिखन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. 'वरदक्षिणानिर्मूलनाय पत्रिकायां सम्पादकीयं विरच्य प्रकाशयन्तु' इति पत्रिकासम्पादकाय लेखं लिखन्तु ।
२. वरदक्षिणानिर्मूलनाय कानिचन घोषणवाक्यानि लिखन्तु ।


SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **रेखाङ्कितपदानां समानार्थकपदानि मञ्जूषातः चित्वा तान्युपयुज्य वाक्यानि लिखन्तु।**

| कुत्र | समीचीनम् | इदानीम् | संशयः | तूष्णीम् |
|---|---|---|---|---|

१. अधुना अहं पाठं पठामि ।
२. सर्वैः उत्तमं कार्यं करणीयम् ।
३. क्व गच्छसि त्वम् ?
४. सन्देहः नास्ति, भवन्तः सर्वे उत्तमाः ।
५. छात्राः ! कक्ष्यायां निश्शब्दं तिष्ठन्तु ।

आ) **अधः दत्तपदानां विरुद्धार्थकपदानि मञ्जूषातः चित्वा लिखन्तु ।**

| उद्घाटयतु | स्वीकृत्य | आगत्य | मास्तु | त्यक्ष्यन्ति | दद्याम् |
|---|---|---|---|---|---|

१. त्यक्त्वा   २. पिदधातु   ३. स्वीकुर्याम्
४. निर्गत्य   ५. अस्तु   ६. ग्रहिष्यन्ति

इ) **पाठं पठित्वा अधः दत्तानि पदानि विवृण्वन्तु ।**

१. वरदक्षिणा   २. वरोपचारः   ३. विवाहः

### २. व्याकरणांशाः

अ) **सन्धिविच्छेदं कृत्वा सन्धिनाम लिखन्तु ।**

१. ततोऽपि   २. पुनर्मिलामः   ३. अद्यैव
४. इत्यपि   ५. सञ्चरन्ति

आ) **सन्धिं कृत्वा सन्धिनाम लिखन्तु ।**

१. तत् + एव   २. भवति + एव
३. विरुद्ध्य + अपि   ४. उपकारम् + करोतु
५. कः + चित्   ६. अन्यत् + च

इ) **अधः दत्तानि सामान्यवाक्यानि निर्दिष्टप्रत्ययान् उपयुज्य संश्लिष्टवाक्यरूपेण परिवर्तयन्तु ।**

उदा - रामः विद्यालयं गच्छति । पाठं पठति । (क्त्वा)
रामः विद्यालयं गत्वा पाठं पठति ।

१. लक्ष्मीः प्रकोष्ठं प्रविशति । लक्ष्मीः जलं पिबति । (ल्यप्)
२. वीरभद्रः अस्माकं परिस्थितिं जानाति । विवाहम् अङ्गीकरोति । (क्त्वा)
३. श्रीधरः वरदक्षिणां विना विवाहं करोति । श्रीधरः सिद्धः अस्ति । (तुमुन्)
४. रेवती किमपि पुस्तकं पश्यति । रेवती तयोः भाषणं शृणोति । (शतृ)



SCERT TELANGANA

ई) अधः दत्तान् क्रियापदस्थान् - उपसर्ग - धातु - प्रत्ययान् विभज्य लिखन्तु ।

१. विचिन्त्य २. उपविष्टः ३. प्रदर्शितम्
४. दृष्ट्वा ५. सम्पादयितुम् ६. आह्वयन्ती

उ) रेखाङ्कितानि अव्ययपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. यदि समये गच्छति तर्हि मित्रेण मिलति ।
२. मम समीपे धनं नास्ति, अतः पुस्तकं न क्रीतवान् ।
३. यावत् खादितुं शक्नोति, तावत् एव स्वीकरोतु ।
४. इदानीम् समाधानं लिखतु ।

* अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणम् अवगच्छन्तु ।

| | | | |
|---|---|---|---|
| १. तेऽत्र | = | ते + अत्र | (ए+अ = ए) |
| २. गृहेऽहम् | = | गृहे + अहम् | (ए+अ = ए) |
| ३. रामोऽहसत् | = | रामो + अहसत् | (ओ + अ = ओ) |
| ४. गोविन्दोऽतिथिः | = | गोविन्दो + अतिथिः | (ओ + अ = ओ) |

उपरितनेषु उदाहरणेषु -

- एकारात् अकारे परे एकार-अकारयोः स्थाने एकारः आगतः ।
- ओकारात् अकारे परे तयोः स्थाने ओकारः आगतः ।

**पदान्तात् एकारात् अकारे परे एकारः, पदान्तात् ओकारात् अकारे परे ओकारः च पूर्वपरयोः स्थाने एकादेशः भवति ।**

**अयं पूर्वरूपसन्धिः ।**

**सूत्रम् - एङः पदान्तात् अति**

(ऽ = इदं चिह्नम् अकारस्य स्पष्टप्रतिपत्तये लिख्यते । चिह्नमेतत् अवग्रहः / अकारप्रश्लेषः इत्युच्यते ।)

ऊ) अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

**1. सन्धिं कुर्वन्तु**

१. वित्तकोशो + अयम्
२. छात्रो + अवगच्छति
३. इतो + अपि
४. को + अस्ति
५. वरो + अत्र

**2. विसन्धिं कुर्वन्तु ।**

१. विद्यालयेऽपि
२. शप्तोऽहम्
३. ततोऽपि
४. चोरोऽपि
५. सर्वोऽपि

**परियोजनाकार्यम्**

कस्यचन सामाजिकदुराचारस्य विषये लघुसम्भाषणं लिखित्वा कक्ष्यायां प्रदर्शयन्तु ।



SCERT TELANGANA

तृतीयः भागः

# ८. भिषजो भैषज्यम्

## पठन्तु, विचिन्त्य वदन्तु

पुत्री - तात ! अद्य अस्माकं गुरुः कक्ष्यायां ''वैद्यो नारायणो हरिः'' इति उक्तवान् । अस्य अर्थः कः ?

पिता - वत्सले ! ''वैद्यः साक्षान्नारायणः एव'' इति अस्यार्थः ।

पुत्री - किमर्थं वैद्यः नारायणेन उपमितः?

पिता - यथा नारायणः स्थितिकारकः लोकरक्षकः तथैव वैद्योऽपि प्राणदायकः आरोग्यरक्षकः ।

पुत्री - अस्तु । किन्तु इदानीन्तनकाले केचन वैद्याः एतादृशीं सहृदयतां न प्रदर्शयन्तीति प्रवादः अस्ति खलु !

पिता - सत्यम् । स्वार्थपरता, धनासक्तिः एव एतस्य कारणम् ।

पुत्री - वैद्याः सर्वजनसुखाय, सर्वजनहिताय जीवन्तु इति अहम् अभिलषामि। अहमपि वैद्यविद्यां पठित्वा एवमेव अचरिष्यामि ।

पिता - साधु वाञ्छितम् । भवत्याः आशा सफला भवतु ।

पुत्री - धन्या अहम् ।

**प्रश्नाः**

१. अस्मिन् संवादे मौलिकांशः कः ?
२. वैद्याः कीदृशाः भवेयुः ?
३. यदि वैद्याः सहृदयतां परित्यजन्ति तर्हि किं भवति ?

## उद्देश्यम्

* ''मनुष्येण धनावाप्तये निर्धनेषु निरादरः न प्रदर्शनीयः अपि तु विपत्सु धनिकनिर्धनभेदं विना सर्वेषामपि यथाशक्ति साहाय्यं करणीयम्''। अमुं विषयं बोधयितुं एषः पाठ्यांशः प्रस्तुतः ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

## कविपरिचयः

एषः पाठ्यांशः महामहोपाध्यायबिरुदाञ्चितेन शताधिकग्रन्थकर्त्रा आचार्य पुल्लेल श्रीरामचन्द्रुडुमहोदयेन विरचितः । अयं महाभागः आन्ध्रप्रदेशस्य 'साहित्य अकाडमी' पुरस्कारेण राष्ट्रपतिपुरस्कारेण च पुरस्कृतः । एषः बहुशास्त्रकोविदश्च । तेषां पितरौ श्रीमती सत्यवतीसत्यनारायणशास्त्रिणौ । जन्मस्थानम् आन्ध्रप्रदेशस्थः इन्दुपल्लिग्रामः । एषः विद्वत्तल्लजः१९६० तमे वर्षे उस्मानियाविश्वविद्यालयीये संस्कृतविभागे आचार्यपदवीम् अलञ्चकार । १९८७ तमे वर्षे विभागात् सेवानिवृत्तिञ्च प्राप्नोत् ।

श्रीरामचन्द्रुडुमहोदयः न केवलं कविः, पण्डितः, अनुवादकः परन्तु काव्यनाटकादीनां निबन्धनेऽपि अतिनिपुणः । महानुभावस्य अस्य स्वतन्त्ररचनासु लघुकाव्यसंग्रहः सुसंहतभारतम् नाम नाटकं च प्रमुखे । 'सुसंहतभारतनाटकम्' उत्तरप्रदेशसर्वकारेण पुरस्कृतम् ।

प्रस्तुतपाठ्यांशः अस्य कविपण्डितस्य 'लघुकाव्यसंग्रहः' इति ग्रन्थात् स्वीकृतः।

## प्रवेशिका

प्रत्येकमपि व्यक्तेः अपि विध्युक्तधर्मः एकः भवति । सृष्टौ स्थितानि पञ्च भूतानि अपि स्वविध्युक्तधर्मं निर्वहन्तः भवन्ति । वायुः स्वविध्युक्तधर्मम् अपगम्य क्षणं यावत् न प्रसरति, तर्हि किं भविष्यतीति वक्तव्यस्य आवश्यकता नास्ति । अतः वायुरिव प्रत्येकमपि मानवेन अपि प्रतिफलापेक्षां विना स्वधर्मं कर्तुं प्रयतितव्यम् । अन्यथा तेन दुष्परिणामस्य फलम् अनुभोक्तव्यं भवति । तादृशः दृष्टान्तः अस्मिन् पाठ्यांशे दृश्यते । पठन्तु ।

''अये ! कोऽयं निर्बन्धः! समयनियमो नाम समयनियम एव । साक्षात् परमेश्वरोऽपि वा आगच्छतु'' इति सक्रोधं जगाद भिषक् वेङ्कटरावः । ''आर्य ! जानीम एव वयं भवतः कालनियमादिकम् । परन्तु एतादृशे आपत्समये अस्मास्वनुग्रहः कर्तव्यः'' इति सानुनयम् आगतेष्वेकः ग्रामीणः प्रार्थयामास । वेङ्कटरावस्य हृदयं पुनः शिलासदृशं सान्त्ववाक्यैः अविचलितमेवासीत् । ''अरे ! मूर्खाः ! सर्वदापि स्वसुखचिन्तैव युष्माकम् । वैद्योऽपि मानव एव, तस्यापि विश्रान्तिसुखादिकमावश्यकमिति न चिन्तयति युष्मासु एकोऽपि । शीघ्रम् अपसरत'' इति पुनः उच्चैः जगर्ज । किंकर्तव्यतामूढाः ते ग्रामीणाः अकारणकोपदारुणे भिषजः मुखे दीनाः दृष्टीः प्रसार्य, प्रतिगमनोन्मुखाः अभूवन् । अन्ततश्च तेष्वेकः युवा किञ्चिद्धैर्यं समालम्ब्य अग्रतो गत्वा 'आर्य! स्वसुखचिन्तेति अधिक्षिपति भवान् ! आकस्मिकयानप्रहारेण मूर्छितस्य मार्गे पतितस्य अज्ञातस्य बालस्य साहाय्यकरणमपि यदि 'स्वसुखम्' ''स्वार्थपरता'' इत्युच्यते, अहो ! करालः किलायं कालः इत्यवदत् । इदं श्रुत्वा द्विगुणीभूतक्रोधः भिषक् - ''अरे ! मूर्ख ! मम साहाय्यं याचितुमागतः मामेवाधिक्षिपसि ! को वा न जानाति युष्माकं कपटोपायम् ? अज्ञातो बाल इति

उक्त्वा विनैव शुल्कादिदानं चिकित्सां कारयितुं प्रयत्यते चेत् को वा मुर्खः विश्वसिष्यति ? गम्यतां यथागतम्। नोचेत् भटैः निष्कासयिष्यामि इत्यतिपरुषं जगाद । ‘‘आर्य ! न भवन्तं वञ्चयितुम् अस्माकम् अभिलाषः । दास्याम एव यथाशक्ति यत्किञ्चित् चिकित्साशुल्कम् । बहिरागत्य पश्यतु तावद्भवानेतस्य बालस्य मुखम् । तादृशस्य सुकुमारस्य एतादृशीम् अवस्थां दृष्ट्वापि वा भवतो हृदये करुणा जायेत’’ इति उद्गच्छन्तं कोपं नियम्य स युवा सविनयं प्रार्थयामास। भिषक् विकटं विहस्य ‘‘अहो ! भवदीयानां सुकुमारता ! तदिदं यदुच्यते गार्दभकिशोरसौकुमार्यमिति’’ इति वदन् राजभटस्थानं प्रति दूरभाषणीं नादयितुमारेभे । अत्रान्तरे कश्चिद् वृद्धः पुरः आगत्य ‘‘अये ! सर्वमपि सम्भाव्यत एवास्मिन् करुणालेशविहीने । किमर्थम् अनेन सह वृथा कलहेन याप्यते कालः ? क्षणे क्षणे किल परिक्षीयते बालस्य दशा । आगच्छत अन्यत्र गमिष्यामः’’ इति वदन् तं युवानम् अन्यांश्च अनयत् । वैद्यश्च अन्तर्विहस्य - ‘‘गच्छत रे सारमेयाः । न जाने किं वा छिन्नं भवति प्रतिदिनोपचीयमान - जनगणस्य भारतदेशस्य, यदि कश्चित् शुनकस्य शिशुः म्रियते’’ इति यत्किञ्चित् जल्पन् महता शब्देन कवाटं पिधाय अन्तरगच्छत् ।




### विचिन्त्य वदन्तु

* ग्रामीणानां विषये वेङ्कटरास्य प्रवर्तनाविधानं समुचितं वा ? विश्लिष्य वदन्तु ।
* ग्रामीणानां मनस्तत्त्वं विवृण्वन्तु ।

वेङ्कटरावः दरिद्राणां कुटुम्बे उदभूत्, पञ्चषवर्षदेशीय एव तस्मिन् माता पञ्चत्वमगात् । तस्य पिता सर्वमप्यात्मनः प्रेम तस्मिन्नेकस्मिंस्तनये केन्द्रीकृत्य जीविकामात्रपर्याप्तस्य क्षेत्रस्य साहाय्येन यथाकथञ्चित् कालं यापयति स्म । पुत्रस्य सुखमेव आत्मनः सुखं मन्यमानः सर्वथापि तस्य वर्धन एव तत्परः अभवत् । कुशाग्रधीः वेङ्कटरावोऽपि पाठशालायां सर्वासु कक्ष्यासु प्रथमतया उत्तीर्णतां लभमानः अन्ततः यथाकथञ्चित् वैद्यकलाशालायां स्थानमवाप्य एम्.बि.बि.एस्. परीक्षायां सफलः अभवत् । परन्तु कुटुम्बजीविकायाः एकावलम्बः क्षेत्रं सर्वमपि तस्य विद्यार्थं व्ययितमासीत् । तं क्षेत्रव्ययमपि सहस्रगुणादानसाधनभूतं मन्यमानः पिता तादृशस्य कालस्य प्रतीक्षां कुर्वन् मनोमोदकान्यास्वादयति स्म । कदा वा आत्मनः पुत्रः सहस्रशः वित्तं समुपार्जयेत्, कदा च वा आत्मनः सर्वाण्यपि दुःखानि दूरीभवेयुः इत्येव तस्य निरन्तरं चिन्ता आसीत् । पठितवैद्यविद्यः, आकाररूपसंपन्नो बुद्धिमानिति धिया वेङ्कटरावं कश्चिन्महाधनिकः आत्मनः जामातरमकार्षीत् । सुन्दराङ्ग्या

SCERT TELANGANA

जायया साकं प्रभूतं वित्तमप्यलभत वेङ्कटरावः । अनतिदीर्घकाल एव च तस्य आर्जनं प्रतिमासं द्वित्रिसहस्त्रसंख्यामतिचक्राम। एवं पितुः सुब्बय्यशास्त्रिणः आशायाः पूर्वो भागः सफल एवासीत्। द्वितीयभागस्य पुनः साफल्यं न कदापि लेभे येनासौ सर्वामेवात्मनः आशां विफलाममन्यत। प्रतिदिनमुपचीयमाने वेङ्कटरावस्य धने तत्संबद्धाः दुर्गुणा अपि द्विगुणेन वेगेन वर्धन्ते स्म ।

**"कीटबुद्धिर्मनुष्येषु देवताबुद्धिरात्मनि ।**
**प्रामाण्यबुद्धिः स्तोत्रेषु नूतनायाः श्रियः फलम् ॥"**

इति न्यायेन बुद्धित्रयमपि तस्मिन् एकदैव समाविष्टमभवत्। प्रथमायाः कीटबुद्धेः पिता सुब्बय्यशास्त्री एव तत्प्रथमतया लक्ष्यताम् अगमत् । सुतेन अनादृतोऽप्ययम् उत्तमवंशप्रसूतायाः स्नुषायाः आदरवशेन, एकैकपौत्रे स्नेहवशेन च यथाकथञ्चित् तत्रैव कञ्चित्कालं यापयामास । अन्ततश्चैकदा "अयं कोऽपि याचकः" इति कस्मैचित् मित्राय कथयतः पुत्रस्य वचः श्रुत्वा विमानाग्निदंदह्यमानचेताः दूरतः स्वग्रामे यथाकथञ्चित् जीवितावशेषं यापयितुं जगाम ।

विवाहो नाम वणिग्व्यवहार एवेति विश्वासः वेङ्कटरावस्य । तस्य मते धनमेव सर्वप्रधानम्, "सर्वं खल्विदं वित्तम्" इति चिन्तयन् सर्वमपि जगत् कनकमयमपश्यत् । एतादृशी चिन्ता कदा वा उद्भूता तस्य मानसे इति न निश्चयेन वक्तुं शक्यते। प्रायः वैद्यकलाशालायां धनिकानन्यान् सहाध्यायिनः पश्यन् आत्मानं निर्धनस्य पुत्रं जानन् असौ क्रमशः पितरि द्वेषं, धने चासक्तिं सममेव वर्धयामास मानसे । ऐश्वर्यवत्या कन्यया विवाहे च इयं धनासक्तिरेव मूलकारणम् । तस्य चायं विश्वासः यत् सकलगुणसंपन्नाया अपि धनिककुमार्याः निर्धनस्य पुत्रे अकृत्रिमं प्रेम असम्भाव्यमेवेति । अत एवायम् अन्वर्थनामधेयवत्याः भार्यायाः सुशीलायाः सहजं प्रेम अतथ्याभिनयं मन्यमानः स्वयं तस्यामादितः प्रभृति नातीव प्रेमवान् बभूव। वस्तुतश्च तस्य सहजप्रेम्णः एकैकपात्रं कुमारः सुरेश एव तयोः दाम्पत्यरज्जोः दृढः ग्रन्थिरासीत् येन सा बहोः कालात् पूर्वमेव नाशीर्यत ।

> ### विचिन्त्य वदन्तु
>
> * इदानीन्तनकालिकाः मातापितरः स्वीयपुत्रान् पाठयन्ति कथं शिक्षयन्ति ? भविष्यत्कालेते येषु वृत्तिषु स्थायित्वं प्राप्नुयुः इति इच्छन्ति ? अत्र हिताहितान् विश्लिष्य सम्भाषन्ताम् ।
> * 'विवाहः' इत्यस्मिन् विषये वेङ्कटरावस्य चिन्तनाविधानं समुचितं वा ? नोचेत् किं सुमुचितमिति सकारणं विवृण्वन्तु ।

वेङ्कटरावस्य इयं कठोरा प्रवृत्तिः एवं स्वकुटुम्बविषये एव परिमिता आसीत् । लोकेन पुनरसौ करुणामयान्तरङ्गः, सर्वविधचिकित्साविशारदः, परोपकारदीक्षितः भिषग्वरेण्यः अदृश्यत । एवं सफलोऽस्य सौजन्याभिनयः महत् यशः, प्रभूततमं वित्तं च प्रतिदिवसं वर्धयामास । क्रमेण च पूर्यमाणायां धनाभिलाषायाम् अधिकारवाञ्छाप्यस्य हृदये पदं न्यदधात् । क्रमशश्च सा दृढतरा अभवत् । उत्तमाधिकारविहीनम् ऐश्वर्यमपि निष्फलमिति मेने वेङ्कटरावः । समुपार्जितप्रभूतवित्तस्य लोकप्रियस्य चैतादृशस्य कियदिदं यदधिकारसम्पादनं नाम ! विनैव श्रमेण वेङ्कटरावः द्विवारं शासनसभायाः सभ्यतामलभत। परं तु तेन तावदैव सन्तोष्टव्यमासीत्। यतः बहुधा प्रयत्यापि स मन्त्रित्वादिकं प्राप्तुं नाशकत् । स्वार्थचिन्तयापि वा एतावत्पर्यन्तं कृतं लोकाराधनं व्यर्थं दृष्ट्वा वेङ्कटरावः भग्नमनोरथः अभवत् । अयं

चाशाभङ्गः क्रमेण तस्य हृदयान्तर्निगूढं सहजं द्वेषभावम् अहंकारं च उद्बोधयामास । अन्ते च तृतीयवारं शासनसभासभ्यत्वस्यापि अलाभः तस्मिन् यत्किञ्चिदवशिष्टं कपटसौजन्यं समूलमुन्मूलयामास । पितरि कृतप्रारम्भा कीटबुद्धिः अद्य सर्वेषु जनेषु विस्तारिता अभवत् । आत्मनः पराजयस्य एते एव कारणमिति सामान्यजनेषु तस्य महती जुगुप्सा अजायत । तादृशसौजन्यशीलस्य एतादृशं पारुष्यं दृष्ट्वा सर्वेऽपि विस्मयाविष्टा अभवन् । को वा जानाति कीदृशोऽस्य सहजः स्वभावः इति !

तस्मिन् दिवसे भिषजः वेङ्कटरावस्य मानसं किञ्चित् व्याकुलमिवासीत् । इदं तस्यातीव दुःसहं यत् सप्ताहात् पूर्वमेव प्रभुत्वचिकित्सालये नियोगेनागता आत्मनः सहाध्यायिनी भिषगङ्गना (Lady Doctor) अद्यावधि आत्मानं द्रष्टुं नागतेति । स्वयमेव तां द्रष्टुं जिगमिषोरपि तस्य पादौ पुरावृत्तं कञ्चन वृत्तान्तं स्मारं स्मारं पुरः न प्रावर्तेताम् । पुरा एकदा कलाशालायां शरीरावयवबोधकक्ष्यायाम् उपन्यासकस्य उपन्यासम् अश्रुत्वैव मुहुः आत्मानं पश्यन्तं तं वीक्ष्य मञ्जुहासिनी तस्य मूढत्वं प्रति किञ्चित् स्मेरवदना आसीत् । तच्च प्रेमचिह्नं मत्वा अयं कलाशालायाः बहिः किञ्चित् विकृतं चेष्टितुमारेभे येन पादुकाचपेटिकावर्जं सर्वैः अन्यैः सत्कारैः सत्कृतोऽभवत् । तदा निर्धनत्वात् तथा करणेऽपि अद्य संचितप्रभूतवित्तम् आत्मानं सत्करिष्यत्येव सा स्नेहेन अथवा प्रेम्णेति तस्य महती आशा आसीत् । एवं मानसिकहर्म्याणि निर्मिमाणोऽसौ तेषु असमयोपसृतेषु ग्रामीणेषु तथा क्रूरतया प्रववृते ।

अत्रान्तरे तेषां गमनानन्तरम् अर्धघण्टायाः पूर्वमेव दूरभाषिणी ननाद । भिषक् वेङ्कटरावः सावज्ञमिव श्रावणीं श्रवसि निधाय ''कः कोऽत्र भोः'' इत्यपृच्छत् । हन्त ! तेन चिरात् निरीक्षितः स्वरः शीघ्रमेव प्रभुत्वचिकित्सालयमागन्तुं प्रार्थयन् अश्रूयत । अतिक्लिष्टः किल कश्चित् याद‍ृच्छिकः प्रहारः चिकित्सितव्यः यत्र वेङ्कटरावस्य साहाय्यम् अपेक्ष्यते । इमम् अचिन्तितोपनतमवसरं दृष्ट्वा वेङ्कटरावस्य निरवधिः प्रमोदः अभवत् । शीघ्रमेव यथोपस्थितं वस्त्राणि धृत्वा बहिरागत्य सारथिम् उच्चैः आजुहाव । तदैव कुतोऽप्यागच्छन् सारथिः अवदत् ''आर्य ! पाठशालातः कुमारं सुरेशम् आनेतुं गच्छन् अहं मार्गे स्नेहयानस्य (Car) शिथिलबन्धां स्थापनीं (Break) दृढीकारयितुं स्वास्थ्यागारं (Repairing house) अगच्छम् । तत्र किञ्चिद्विलम्बः आसीत् । ततश्च पाठशालां गतोऽहं तत्र कुमारं नापश्यम् । प्रायः स पादचारेण....'' इति कथयत एव तस्य वचनम् अन्तरा आक्षिप्य वेङ्कटरावः''भवतु भवतु, तेनागतेन भवितव्यम् अद्यास्माभिः शीघ्रमेव प्रभुत्वचिकित्सालयं प्रति गन्तव्यम् । कष्टायां किल कस्याञ्चन चिकित्सायां मम साहाय्यमपेक्ष्यते'' इति वदन्, प्रत्युत्तरमप्रतीक्षमाणः शीघ्रमेव स्नेहयाने साटोपमुपविवेश । पुरा कदाप्यदृष्टां तां परचिकित्साश्रद्धामस्य दृष्ट्वा विस्मयाविष्टमनाः सारथिः शीघ्रमेव तं चिकित्सालयमनयत् । चिकित्सापवरकं प्रविष्ट एव वेङ्कटरावः नेत्राभ्यां मञ्जुहासिनीम् अन्विष्यन्,अर्धघण्टायाः पूर्वमेव आत्मनः समीपमागतान् ग्रामीणान् तेषां च निकटे शायितस्य बालस्य श्वासं परीक्ष्य अधरविस्फाटितकेन नैराश्यं सूचयन्तीं मञ्जुहासिनीं च विलोक्य व्रीडादुःखविहतमनाः मूर्छितोऽभवत् ।

## विचिन्त्य वदन्तु

* बाल्यात् आरभ्य पोषणकर्मणि स्थितस्य पितुः विषये वेङ्कटरावस्य प्रवर्तनं निन्दापूर्वकमासीत् खलु ! भवन्तस्तर्हि ज्येष्ठाः भूत्वा भवतां मातापितृभिः कथं व्यवहरिष्यन्ति ?
* 'धनमूलमिदं जगत्' इति विषयेण एकीभवन्ति किम्? सकारणं विवृण्वन्तु ।



SCERT TELANGANA

# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. वेङ्कटरावस्य स्वभावम् अवगतवन्तः खलु ! एतादृशान् पुरुषान् भवन्तः परिसरेषु दृष्टवन्तः स्युः । तान् अधिकृत्य चर्चां कुर्वन्तु ।

२. सुब्बय्यशास्त्रिणः स्थाने भवान् भवति चेत् किं करोति ?

३. कुटुम्बजीवने स्त्रीपरुषयोः व्यवहारः कथं भवेदिति वदन्तु ।

**आ) अधः निर्दिष्टविषयप्रतिपादकवाक्यानि अभिज्ञाय तेषामधः रेखाङ्कनं कुर्वन्तु, लिखन्तु च ।**

१. वेङ्कटरावस्य परुषवाक्यानि ।

२. सुब्बय्यशास्त्रिणः प्रेमप्रदर्शनपूर्वक वाक्यानि ।

३. आंग्लपदानां समानार्थकसंकृतपदानि ।

४. ग्रामीणजनानाम् अनुनयवाक्यानि ।

**इ) अधः दत्तं गद्यं पठित्वा पञ्च प्रश्नान् लिखन्तु ।**

संस्कृतसाहित्यललामभूतस्य विश्वविख्यातस्य नैषधीयचरिताभिधस्य महाकाव्यस्य प्रणेता, विद्वच्चक्रचूडामणिः, कवितार्किकसार्वभौमः, लोकोत्तरप्रतिभावान्, महाकविः श्रीहर्षः। अस्य कवेः मातापितरौ मामल्लदेवीश्रीहीरौ । अयं कविः बाल्ये अतीव चपलमतिः आसीत्। एकदा स्वपितुः शास्त्रार्थे नैय्यायिकसार्वभौमेण उदयनाचार्येण कृतमवमानं कर्णपरम्परया आकर्ण्य, विदीर्णहृदयः स्वजनकावमन्तारं विजेतुकामः लोकोत्तरवैदुष्यावाप्तिकाम्यया सरस्वती - माराधयितुमुद्युक्तोऽभवत् । अचिरेणैव कालेन तेन वाग्देवताप्रसादात् अवाप्यत कापि लोकोत्तरचमत्कारिणी प्रतिभा। ततश्चायं कन्याकुब्जेश्वरराजपरिषदि गत्वा स्वपितुरवमन्तारं उदयनाचार्यं व्यजेष्ट ।

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. नूतनायाः श्रियः फलं किम् ?

२. वेङ्कटरावस्य विद्याभ्यासः कथम् अभवत् ?

३. वृद्धः युवानम् किमवदत् ?

४. विवाहविषये वेङ्कटरावस्य अभिप्रायः कः इति लिखन्तु ।

५. पितुः विषये वेङ्कटरावस्य प्रवृत्तिः कथम् आसीत् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ) अधः दत्तयोः प्रश्नयोः लघुसमाधाने स्वीयवाक्यैः लिखन्तु ।**

१. ग्रामीणानां सहृदयत्वम् अधिकृत्य लिखन्तु ।

२. 'विवाहो नाम वणिग्व्यवहारः' एतद् वेङ्कटरावस्य अभिप्रायः । विवाहविषये भवतः अभिप्रायः कः ? विवाहानन्तरम् आदर्शजीवनाय किम् आवश्यकम् ?

SCERT TELANGANA

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. वेङ्कटरावस्य स्वभावचित्रणं कुर्वन्तु ।

२. 'नीचैः गतिः सहजा जलस्य न तु ऊर्ध्वगतिस्तु तस्य' अयं भावः अस्मिन् पाठे द्योत्यते । अस्य विश्लेषणं कुर्वन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. पाठस्य पठनानन्तरं जाताम् अनुभूतीं व्यक्तीकुर्वन्तः एकं लेखं मित्राय लिखन्तु ।

२. समष्टिकुटुम्बजीवने स्त्रीणां प्राधान्यम् अधिकृत्य दशवाक्यानि लिखन्तु ।

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **पाठे पारिभाषिकपदरूपेण प्रयुक्तानां संस्कृतपदानां आङ्ग्लपदानि विलिख्य तैः संस्कृतपदैः नूतनवाक्यानि लिखन्तु ।**

उदा - राजभटस्थानं = **Police Station**

विदेशगमनसमये गृहरक्षणाय राजभटस्थाने सूचना दातव्या ।

आ) **अधः दत्तानां रेखाङ्कितपदानाम् अर्थान् अवगम्य नूतनवाक्यानि रचयन्तु ।**

१. आत्मनः प्रेम एकस्मिन् तनये <u>केन्द्रीकृत्य</u> जीवितं यापयति स्म ।

२. <u>कुटुम्बजीविकायाः</u> एकः <u>अवलम्बः</u> क्षेत्रं व्ययितमासीत् ।

३. पिता कालस्य प्रतीक्षां कुर्वन् <u>मनोमोदकानि</u> आस्वादयति स्म ।

४. वेङ्कटरावः <u>अन्वर्थनामधेयवत्याः</u> सुशीलायाः सहजं प्रेम कृत्रिममिति मनुते स्म ।

५. एतावत्पर्यन्तं कृतं <u>लोकाराधनं</u> व्यर्थं दृष्ट्वा वेङ्कटरावः <u>भग्नमनोरथः</u> अभवत् ।

६. <u>मानसिकहर्म्याणि</u> निर्मिमाणः वेङ्कटरावः ग्रामीणेषु क्रूरतां प्रदर्शितवान् ।

उदा - ग्रामीणाः <u>सानुनयम्</u> वेङ्कटरावं प्रार्थयामासुः।

सानुनयम् = प्रेमपूर्वकं, सादरपूर्वकम्

माता <u>सानुनयं</u> पुत्रं भोजयति ।

इ) **पाठं पठित्वा क्त्वा, तुमुन्, शानच्, तव्य, ल्यप्, क्तप्रत्ययान्तपदयुक्तानि पञ्च वाक्यानि अन्विष्य लिखन्तु । क्रियापदस्थान् धातूपसर्गप्रत्ययान् विभज्य लिखन्तु ।**

उदा - युवा किञ्चिद्धैर्यं <u>समवलम्ब्य</u> अग्रतो <u>गत्वा</u> अवदत् ।

| | | |
|---|---|---|
| १. | समवलम्ब्य | सम् + अव + लम्ब + ल्यप् |
| २. | गत्वा | गम् + क्त्वा |



SCERT TELANGANA

ई) **अधः दत्तेषु वाक्येषु कानिचन क्रियापदानि सन्ति । तेषां वर्तमान / भूत / भविष्यत्कालिकरूपाणि लिखन्तु ।**

उदा - तस्य वर्धने तत्परः अभवत् ।

| **वर्तमानकालः** | **भूतकालः** | **भविष्यत्कालः** |
|---|---|---|
| भवति | अभवत् | भविष्यति |

१. तस्य विद्यार्थं व्ययितम् आसीत् ।
२. महाधनिकः आत्मनः जामातरम् अकरोत् ।
३. साफल्यं न कदापि लेभे ।
४. आशीः विफलाम् अमन्यत ।
५. द्विगुणेन वेगेन वर्धन्ते ।
६. प्रथमतया लक्ष्यताम् अगमत् ।
७. तत्रैव कञ्चित्कालं यापयामास ।
८. निश्चयेन वक्तुं न शक्यते ।
९. परोपकारदीक्षितः भिषग्वरेण्यः अदृश्यत ।
१०.द्विवारं शासनसभायाः सभ्यत्वम् अलभत ।
११.कः ? कोऽत्र भोः? इति अवदत् ।
१२.महती जुगुप्सा अजायत ।

## २. व्याकरणांशाः

अ) **अधः दत्तानि सन्धिपदानि विघटय्य सन्धिनामानि लिखन्तु ।**

उदा - वणिग्व्यवहारः = वणिक् + व्यवहारः - जश्त्वसन्धिः - झलां जशोऽन्ते

१. परमेश्वरोऽपि  ६. कोऽयम्  २. अस्मास्वनुग्रहः  ७. इत्यवदत्
३. आगतेष्वेकः  ८. कपटोपायम्  ४. चिन्तैव  ५. वैद्योऽपि
९. कोऽपि  १०. खल्विदं

आ) **अधः दत्तानां समासपदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।**

१. सक्रोधम्  २. उत्तमवंशः  ३. रूपसम्पन्नः
४. आशाभङ्गः  ५. भिषग्वरेण्यः

**परियोजनाकार्यम्**

''समाजे विद्या - वैद्यम् द्वे अमृतसमे'' - 'वैद्यो नारायणो हरिः' 'प्राणदाता पितृसमः' इत्यादीनि वैद्यसम्बद्धानि घोषणवाक्यानि लिखित्वा कक्ष्यायां प्रदर्शयन्तु ।

SCERT TELANGANA

तृतीयः भागः

# ९.प्रतिभासम्मानः

**पठन्तु, विचिन्त्य वदन्तु**

पितृवाक्यपरिपालकः श्रीरामः वनवासं कुर्वन् चित्रकूटे वसति स्म । तम् अयोध्याम् आनेतुं भरतः परिवारसहितः तत्र गतवान् । भरतं दृष्ट्वा श्रीरामः तं समीपम् उपावेश्य तस्य राज्यस्य चापि क्षेमं पृष्टवान् । तदङ्गतया अनेकान् राजनीतिविषयान् अपि उपदिष्टवान् । यथा ...

श्लो - कच्चित्सहस्रमूर्खाणाम् एकमिच्छसि पण्डितम् ।
पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निश्रेयसं महत् ॥

श्लो - सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः ।
अथवान्ययुतान्येव नास्ति तेषु सहायता ॥

इत्यादीन् सर्वान् उपदेशान् मनसि निधाय भरतः राज्यं पर्यपालयत् ।

**प्रश्नाः**

१. श्रीरामः किमर्थं वनवासं करोति ।
२. श्रीरामः भरतं किम् उपदिष्टवान् ?
३. श्लोकयोः भावः कः ?

## उद्देश्यम्

* परोपकारगुणवर्धनम् ।
* ज्ञानवर्धनासक्तिविकासनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

### कविपरिचयः

पाठ्यांशोऽयं भोजप्रबन्धात् स्वीकृतः। षट्शतवर्षेभ्यः प्राक्तनः बल्लालो महाकविः नैसर्गिकीं गद्यशैलीमवलम्ब्य ग्रन्थमिमं बबन्ध। भोजराजस्य दानशीलतां, कालिदासस्य विलक्षणप्रतिभां च कविरत्र सुष्ठु प्रादर्शयत्।

### नेपथ्यम्

भोजराजसभायां विद्वद्वरेण्याः, कविधुरंधराः सरस्वतीपुत्रसमाः कवयः बहवः विराजमानाः आसन्। तेषु कविषु अन्यतमः कालिदासः। राजा भोजः सर्वेषु कविषु कालिदासे एव अतीव स्निह्यति स्म। तेन कारणेन पण्डिताः सर्वे यथा कथञ्चित् राज्ञा कालिदासः बहिष्कर्तव्य इति प्रायतन्त। तेषां प्रयत्नानां फलत्वेन कालिदासः राज्ञा राजसभायाः बहिष्कृतो जातः। बहिष्कृतः कालिदासः कथं पुनः प्रत्याहूतः इति अयं पाठयांशविषयः।

### प्रवेशिका

भोजः यदा राज्यं कुर्वति, एकदा अनेके पण्डितकवयः एकत्र मिलित्वा एवं निश्चितवन्तः। "अद्यैव मध्यरात्रे निगूढमेव गच्छामः सम्पत्तिसम्भारमादाय। यदि न गम्यते श्वः राजसेवकाः अस्मान् बलान्निःसारयन्ति। तदा देहमात्रेणैवास्माभिर्गन्तव्यम्" इति सर्वे निश्चित्य गृहमागत्य शकटेषु सम्पद्भारमारोप्य रात्रावेव निष्क्रान्ताः"।

कविताप्रियस्य भोजस्य राज्ये कवीनां दशा किमर्थम् ईदृशी जाता? तेषाम् ईदृशीं स्थितिं दूरीकर्तुं राज्ये कोऽपि समर्थः नास्ति ? एनं विषयं ज्ञातुं प्रस्तुतपाठ्यांशं पठन्तु।

ततो निशानाथहीनेव निशा, दिनकरहीनेव दिनश्रीः, वियोगिनीव योषित्, शक्ररहितेव सुधर्मा न भाति भोजभूपालसभा रहिता कालिदासेन। तदा प्रभृति न कस्यचिन्मुखे काव्यम्। न कोऽपि विनोदसुन्दरं वचो वक्ति।

ततः कदाचिद्राकापूर्णेन्दुमण्डलं पश्यन्पुरश्च लीलादेवीमुखेन्दुं वीक्ष्य भोजः प्राह -

**श्लो - तुलनामण्वनुसरति ग्लौस्सो मुखचन्द्रस्य खल्वेतस्याः।**
कुत्र च पूर्णेऽपि चन्द्रमसि नेत्रविलासाः, कदा वाचो विलसितम्।

प्रातश्चोत्थितः प्रातर्विधीन्विधायसभां प्राप्य राजा विद्वद्वरान् प्राह - 'अहो कवयः, इयं समस्या पूर्यन्ताम्' ततः पठितः -

**श्लो - "तुलनामण्वनुसरति ग्लौस्सो मुखचन्द्रस्य खल्वेतस्याः।"**



SCERT TELANGANA

पुनराह - 'इयं चेत्समस्या न पूर्यते भवद्भिर्मद्देशे न स्थातव्यम्' इति । ततो भीतास्ते कवयः स्वानि गृहाणि जग्मुः ।

चिरं विचारितेऽप्यर्थे कस्यापि नार्थसङ्गतिः स्फुरिता । ततः सर्वैर्मिलित्वा बाणः प्रेषितः । ततः सभां प्राप्याह राजानम् - 'देव, सर्वैर्विद्वद्भिरहं प्रेषितः । अष्टवासरावधिमभिधेहि । नवमेऽह्नि पूरयिष्यन्ति ते । न चेद्देशान्निर्गच्छन्ति ।' ततो राजा 'अस्तु' इत्याह । ततो बाणस्तान् विज्ञाप्य राजसन्देशं स्वगृहमगात् । ततोऽष्टौ दिवसा अतीताः। अष्टमदिनरात्रौ मिलितेषु तेषु कविषु बाणः प्राह - 'अहो तारुण्यमदेन राजसम्मानप्रमादेन किञ्चिद्विद्यापदेन कालिदासो निःसारितोऽभवत् । समे भवन्तः सर्व एव कवयः । विषमे स्थाने तु स एक एव कविः। तं निःसार्येदानीं किं नाम महत्त्वमासीत् ? स्थिते तस्मिन् कथमियमवस्थास्माकं भवेत् ? तन्निःसारे या या बुद्धिः कृता सा भवद्भिरेवानुभूयते । 'अद्यैवावधिः पूर्णः । कालिदासमन्तरेण न कस्यचित्सामर्थ्यमस्ति समस्यापूरणे।

> **विचिन्त्य वदन्तु**
>
> * "स्वकृते गर्ते स्वयं पतति' इति वक्तुमत्र समुचितः दृष्टान्तः दृश्यते । अमुं विषयं समन्वयन्तो भाषन्ताम् ।

**श्लो - सङ्ग्रामे सुभटेन्द्राणां कवीनां कविमण्डले ।**

**दीप्तिर्वा दीप्तिहानिर्वा मुहूर्तेनैव जायते ॥**

ततोऽद्यैव मध्यरात्रे निगूढमेव गच्छामः सम्पत्तिसम्भारमादाय । यदि न गम्यते श्वो राजसेवका अस्मान् बलान्निःसारयन्ति । तदा देहमात्रेणैवास्माभिर्गन्तव्यम् ।' इति सर्वे निश्चित्य गृहमागत्य शकटेषु सम्पद्भारमारोप्य रात्रावेव निष्क्रान्ताः । ततः कालिदासस्तत्रैव रात्रौ पथि गच्छतां तेषां गिरं श्रुत्वा चेटीं प्रेषितवान् । ततः सा समेत्य सर्वानपश्यत् । उपेत्य च कालिदासं प्राह - 'सर्वे च बाणमयूरप्रमुखाः पलायन्ते' इति । कालिदासः वेगेन वासांसि भवनादानय, यथा पलायमानान्विप्रान् रक्षामि ।

**श्लो - किं पौरुषं रक्षति यो न वाऽऽर्तान् किं वा धनं नार्थिजनाय यत्स्यात् ।**

**सा किं क्रिया या न हितानुबद्धा किं जीवितं साधुविरोधि यद्वै ॥**

इत्युक्त्वा चारणवेषं विधाय गत्वा सर्वान्निरूप्य पप्रच्छ चारणभाषया - 'अहो विद्यावारिधयः भोजसभायां सम्प्राप्तमहत्त्वातिशयाः बृहस्पतय इव सम्भूय कुत्र जिगमिषवो भवन्तः ? कच्चित्कुशलं वः राजा च कुशली। अस्माभिः काशीदेशादागम्यते भोजदर्शनाय वित्तस्पृहया च' इति । ततः परिहासं कुर्वन्तः सर्वे निष्क्रान्ताः । ततस्तेषु कश्चित्तद्गिरमाकर्ण्य तं च चारणं मन्यमानः प्राह - 'अहो चारण, शृणु । राज्ञा किलैभ्यो विद्वद्भ्यः पूरणाय समस्योक्ता । तत्पूरणाशक्ताः राज्ञो भयात् देशान्तरे क्वचिज्जिगमिषव एते निश्चक्रमुः' चारणः - 'राज्ञा का वा समस्या प्रोक्ता ।' ततः पठति स विपश्चित् -

**श्लो - तुलनामण्वनुसरति ग्लौस्सो मुखचन्द्रस्य खल्वेतस्याः ।**

चारणः - 'एतत्साध्वेव गूढार्थम् । एतत्पूर्णेन्दुमण्डलं वीक्ष्य राज्ञाऽपाठि । एतस्योत्तरार्धमिदं भवितुमर्हति -

**श्लो - 'अण्विति वर्ण्यते कथमनुकृतिस्तस्य प्रतिपदि चन्द्रस्य ।'**

सर्वे श्रुत्वा चमत्कृताः । ततश्चारणः सर्वान्प्रणिपत्य निर्ययौ । ततः सर्वे विचारयन्ति स्म - 'अहो, इयं साक्षात्सरस्वती पुंरूपेण सर्वेषामस्माकं परित्राणायागता । नायं भवितुमर्हति मनुष्यः । अद्यापि किमपि केनापि न ज्ञायते । ततः शीघ्रमेव गृहमासाद्य शकटेभ्यो भारमुत्तार्य प्रातः सर्वैरपि राजभवनमागन्तव्यम् । न चेच्चारण एव निवेदयिष्यति । ततो झटिति गच्छामः । इति योजयित्वा तथा चक्रुः ।



ततो राजसभां गत्वा राजानमालोक्य 'स्वस्ति' इत्युक्त्वा विविशुः - ततो बाणः प्राह, - 'देव, सर्वज्ञेन यत्त्वया पठ्यते तदीश्वर एव वेद । तथाप्युच्यते -

**श्लो - 'तुलनामण्वनुसरति ग्लौसो मुखचन्द्रस्य खल्वेतस्याः ।**
**अण्विति वर्ण्यते कथमनुकृतिस्तस्य प्रतिपदि चन्द्रस्य ॥**

राजा यथा व्यवसितस्याभिप्रायं विदित्वा 'सर्वथा कालिदासो दिवसप्राप्यस्थाने निवसति । उपायैश्च सर्वं साध्यम् इत्याह । ततो राजा बाणाय रुक्माणां पञ्चदशलक्षाणि प्रादात् । ततो राजा विचारितवान् - 'सर्वथा कालिदासश्चारणवेषेण नगरमध्य आस्ते' इति निश्चित्य तैर्विद्वद्भिः सहाश्वमारुह्य रात्रौ यत्र चारणप्रसङ्गः समजनि, तत्प्रदेशं प्राप्तः । ततो राजा चरतां चौराणां पदज्ञाननिपुणानाहूय प्राह - 'अनेन वर्त्मना यः कोऽपि रात्रौ निर्गतस्तस्य पदान्यद्यपि दृश्यन्ते, तानि पश्यन्तु' इति । ततो राजा प्रतिपण्डित लक्षं दत्त्वा तान् सम्प्रेष्य च स्वभवनमगात् । ते च पदज्ञा राजाज्ञया सर्वतश्चरन्तोऽपि तमनवेक्षमाणा विमूढा इवासन् । ततश्च लम्बमाने सवितरि कामपि दासीमेकां पदत्राणं त्रुटितमादाय चर्मकारवेश्म गच्छन्तीं दृष्ट्वा तुष्टा इवासन् । ततस्तत्पदत्राणं तथा चर्मकारकरे न्यस्तं वीक्ष्य तैश्च तस्याः करान्निषेणादाय रेणुपूर्णे पथि मुक्त्वा तदेव पदं तस्येति ज्ञात्वा तां च दासीं क्रमेण, भवनं विशन्तीं वीक्ष्य तस्याः मन्दिरं परितो वेष्टयामासुः । ततश्च तैः क्षणेन भोजश्रवणपथविषयमभिज्ञानवार्ता प्रापिता । ततो राजा सपौरः सामान्यः पद्भ्यामेव तद्भवनमगात् ।

**विचिन्त्य वदन्तु**

* 'विद्या राजसु पूज्यते' इति विषयं भोजकालिदासयोः समागममभिलक्ष्य वदन्तु ।

ततो गृहं प्रविश्य भोजः कालिदासं दृष्ट्वा ससम्भ्रममाश्लिष्य पादयोः पतति । स राजा पठति च

**श्लो - 'गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।**
**मा भून्मनः कदाचिन्मे त्वया विरहितं कवे ॥'**

कालिदासस्तच्छ्रुत्वा व्रीडावनताननस्तिष्ठति । राजा च कालिदासमुखमुन्नमय्याह -

**श्लो - 'कालिदास! कलावास! दासवच्चालितो यदि ।**
**राजमार्गे व्रजन्नत्र परेषां तत्र का त्रपा ॥'**

राजा नेत्रयोर्हर्षाश्रु मार्जयति कराभ्यां कालिदासस्य । ततस्तत्प्राप्तिप्रसन्नो राजा ब्राह्मणेभ्यः प्रत्येकं लक्षं ददौ । निजतुरगे कालिदासमारोप्य सपरिवारो निजगृहं ययौ ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. पाण्डित्यस्य प्रयोजनानि कानि ? ?
२. भवान् कीदृशस्य मित्रस्य स्नेहं वाञ्छति ?
३. अस्य पाठस्य उचितं शीर्षिकान्तरं सूचयन्तु ।

**आ) अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु ।**

१. ''भोः कवयः इमां समस्यां पूरयन्तु ।
२. राजा कां समस्यां दत्तवान् ?
३. देव ! सर्वज्ञः भवान् यत् पठितवान् तत् भवानेव जानाति ।
४. हे कवे ! त्वं सदा मत्समीपं भवेः ।
५. अस्मान् त्रातुं सरस्वत्येव पुरुषरूपेण आगतवती ।

**इ) अधः दत्तानां वाक्यानां सन्दर्भं लिखन्तु ।**

१. ततः भीतास्ते कवयः स्वानि गृहाणि जग्मुः ।
२. कच्चित्कुशलं वः ? राजा च कुशली ।
३. सर्वथा कालिदासश्चारणवेषेण नगरमध्यास्ते ।
४. राज्ञा किलैभ्यो विद्वद्भ्यः पूरणाय समस्योक्ता ।
५. सर्वे च बाणमयूरप्रमुखाः पलायन्ते ।

**ई) अधः दत्तम्, अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

राष्ट्रमिति स्वतन्त्रेण आजीविकाक्षेत्रेण युक्तानां सुसंघटितानां प्रायेण समानेन आदर्शेन प्रेरितानां जनानां समूहः उच्यते । विकास इति भौतिकरूपेणाऽऽध्यात्मिकरूपेण च उन्नतिः उच्यते । राष्ट्रविकासाय राष्ट्रभावना, शिक्षा, स्वास्थ्यरक्षा, निवासव्यवस्था, परिधानव्यवस्था, भोजनव्यवस्था, मार्गव्यवस्था, कृषिः, उद्योगः, वाणिज्यम्, इत्यादिविषयेषु प्रगतिः आवश्यकी भवति ।


SCERT TELANGANA

राष्ट्रविकासे समाजे प्रसिद्धानां, प्रभावशालिनां, शक्तिमतां जनानां मुख्यं स्थानं भवति । अतः तादृशैः जनैः राष्ट्रकल्याणस्य कृते सम्यक्, कार्यं कर्तव्यम् ! जनैः अपि परस्परं सौमनस्यं च स्थापनीयम् । एवं कृते राष्ट्रविकासः शीघ्रं सुष्ठु च भवेत् ।

१. राष्ट्रमिति किमुच्यते ?
२. राष्ट्रस्य प्रगतिः कथं सिद्ध्यति ?
३. कीदृशैः जनैः राष्ट्रकल्याणाय कार्यं कर्तव्यम् ?
४. राष्ट्रस्य विकासे अस्माकं दायित्वं किम् ?
५. अस्य गद्यांशस्य शीर्षकं लिखन्तु ।

उ) **पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. भोजराजेन दत्तां समस्यां लिखन्तु ।
२. पुंरूपसरस्वती इति कवयः किमर्थमुक्तवन्तः ?
३. भीताः कवयः किं कृतवन्तः ?
४. अष्टमदिनरात्रौ मिलितेषु कविषु बाणः किं प्राह ?
५. कालिदासस्य गृहं प्रविश्य राजा किम् उक्तवान् ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

अ) **अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. भवतः अभिप्रायः भवन्मित्रस्य अभिप्रायेण भिद्यते चेत् किं करिष्यति ?
२. कालिदासकृतस्य समस्यापूरकश्लोकस्य भावं लिखन्तु ।
३. भोजकालिदासयोः सम्बन्धः कथं समुन्नतिं प्राप्तः इति लिखन्तु ।
४. कालिदासस्य स्थाने भवान् भवति चेत् किं करोति ?

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।
२. भवताम् इष्टतमं प्रतिभावन्तं महापुरुषमुद्दिश्य लिखन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. विद्यायाः महत्वम् अधिकृत्य मित्रं प्रति एकं लेखं लिखन्तु ।
२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

శ్రీకృష్ణుడు సుదాముడు బాల్యంలో ఒకే గురువుగారి వద్ద విద్యను నేర్చారు. వారిద్దరూ గొప్ప స్నేహంతో కలిసి మెలిసి తిరిగేవారు. గురువుగారికి సపర్యలు చేసేవారు. కాలక్రమంలో శ్రీకృష్ణుడు ద్వారకాధీశుడైనాడు. సుదాముడు ఎంత పేదరికంలో ఉన్నప్పటికీ ఎవరినీ యాచించక శ్రీకృష్ణుడిని తలచుకుంటూ ఉండేవాడు. భార్య సలహా మేరకు సుదాముడు శ్రీకృష్ణుడిని కలుసుకొని కొన్ని అటుకులని బహుమానంగా ఇచ్చాడు. దానికే సంతోషించిన శ్రీకృష్ణుడు సుదామునికి అష్టైశ్వర్యాలను ఇచ్చాడు.



SCERT TELANGANA

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

अ) **अधः दत्तेषु वाक्येषु रेखाङ्कितानां पदानां पर्यायपदानि लिखन्तु ।**

१. कालिदासः पथि रात्रौ गच्छतां विदुषः अपश्यत् ।
२. बाणः अष्टवासरावधिम् अभ्यर्थितवान् ।
३. भूमेः सहजोपग्रहः इन्दुः ।
४. राजा बाणाय रुक्माणं प्रादात् ।
५. मनस्वी अकार्ये व्रीडां प्राप्नोति ।

आ) **अधः दत्ते अनुच्छेदे रेखाङ्कितानां पदानां विरुद्धार्थकपदानि लिखन्तु । तानि उपयुज्य नूतनवाक्यानि रचयन्तु ।**

मानवेन स्वास्थ्यं सम्यक् परिपालनीयम् । नोचेत् सः अशक्तः भवति । परमाश्रित्य परतन्त्रो भूत्वा आतुरः भवति । अतः निःसंशयेन प्रयत्नपूर्वकं च मानवः स्वास्थ्यनियमान् परिपालयेत् ।

इ) **समुचितान् उपसर्गान् मञ्जूषातः चित्वा रिक्तस्थानानि पूरयन्तु ।**

| सम | अनु | प्र | निः | परि | पर |
|---|---|---|---|---|---|

१. नाटकप्रदर्शनानन्तरं सर्वे -------------------- क्रान्ताः ।
२. भगवान् साधूनां ------------------- त्राणाय सम्भवति ।
३. बालः मातरम् -------------------- सरति ।
४. मम सुहृत् ------------------ देशं गतवान् ।
५. बाणः -------------------- आह देव ! सर्वैर्विद्वद्भिरहं प्रेषितः ।

ई) **कोष्ठकस्थानि अव्ययपदानि प्रयुज्य रिक्तस्थानानि पूरयन्तु ।**

(कुत्र, यदा, तदा, परितः, न, कदा)

१. त्वं ---------- गृहं गमिष्यसि ।
२. गृहम् ---------- वृक्षाः सन्ति ।
३. माता पृच्छति, पुत्र -------- गच्छसि ?
४. -------- उपाध्यायः कक्ष्यायां प्रविशति --------- छात्राः प्रणमन्ति ।
५. अहं मांसाहारं ------- खादामि ।

### २. व्याकरणांशाः

अ) **पाठं पठित्वा अधः दत्तानि सन्धियुक्तानि पदानि चित्वा लिखन्तु ।**

१. सवर्णदीर्घसन्धिः   २. गुणसन्धिः   ३. यणादेशसन्धिः
४. वृद्धिसन्धिः   ५. विसर्गसन्धिः

आ) **अधः दत्तानां समासानां सम्बद्धानि पदानि (समस्तपदानि) पाठे अन्विष्य लिखन्तु ।**

१. षष्ठीतत्पुरुषः   २. कर्मधारयः   ३. बहुव्रीहिः   ४. द्विगुः

इ) अधः दत्तेषु पदेषु स्थितान् उपसर्ग-धातु-प्रत्ययान् विभज्य लिखन्तु ।

| | | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| उदा - | संपश्यन् - | सं | दृशिर् | शतृ |

१. वीक्ष्य  २. प्रविश्य  ३. आश्लिष्य  ४. आकर्ण्य
५. प्रभवितुम्  ६. उन्नमय्य

* अधः दत्तानि सन्धिपदानि परिशीलयन्तु । विवरणमवगच्छन्तु ।

प्र + एजते = प्रेजते (अ + ए = ए)
उप + ओषति = उपोषति (अ + ओ = ओ)

उपरितनोदाहरणेषु

* अकारान्तात् उपसर्गात् एकारादिधातुगते एकारे परे अकार-एकारयोः स्थाने एकारः भवति ।
* अकारान्तात् उपसर्गात् ओकारादिधातुगते ओकारे परे अकार-ओकारयोः स्थाने ओकारः भवति ।

> * अकारान्तात् उपसर्गात् एकार-ओकारादिधातौ परे एकार-ओकारौ क्रमेण एकादेशौ भवतः ।

शिवाय + ओं नमः = शिवायों नमः (अ + ओम् = ओ)
का + ओमिति = कोमिति (आ + ओ = ओ)

- उपरितनेषु उदाहरणेषु अकारात् / आकारात् ओकारे परे अकार-आकारयोः स्थाने ओकारः एकादेशः भवति ।

> अ / आ इत्येतयोः ओमिति परे ओकारः एकादेशः भवति ।

शिव + (आ+इहि) एहि = शिवेहि (अ + ए = ए)
अद्य + (आ+ऊढा) ओढा = अद्योढा (अ+ओ = ओ)
कदा + (आ+ऊढा) ओढा = कदोढा (आ+ओ = ओ)

- उपरितनोदाहरणेषु अकारात् एकार - ओकारयोः परयोः तयोः स्थाने एकार - ओकारौ एव एकादेशौ भवतः ।

> * अ / आ इत्येतयोः (उपसर्गपूर्वक आङ्) ए / ओ परे क्रमेण एकार - ओकारयोः एकार - ओकारौ एव एकादेशौ भवतः ।

अयं पररूपसन्धिः ।

## परियोजनाकार्यम्

काञ्चन महतीम् आपदम् उपायेन दूरीकृतवत् मित्रम् उद्दिश्य सविवरणं लिखित्वा कक्ष्यायां श्रावयन्तु ।



SCERT TELANGANA

तृतीयः भागः

# १०. नालन्दावैभवम्

## पठन्तु, विचिन्त्य वदन्तु

रमेशः - परश्वः विद्यालयस्य प्राङ्गणे स्नातकोत्सवः प्रचलिष्यति । भवान् आगमिष्यति वा ?

राजेशः - अवश्यम् आगमिष्यामि । कार्यक्रमे प्रमाणपत्राणि कः प्रदास्यति ?

रमेशः - अस्माकं विद्यालयस्य कुलपतिः श्रीमान् श्रीनिवासमहोदयः ।

राजेशः - उत्तमम् । सखे ! ''कुलपतिः'' इत्यस्य पदस्य अर्थः कः ? कुलपतिशब्देन कः व्यवह्रियते ?

रमेशः - अस्यार्थः स्मृतिग्रन्थे एवं निर्दिष्टः ।
''मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ।।

राजेशः - बहुकालतः अस्य पदस्य अर्थाय अन्वेषणं करोमि । अद्य भवतः मुखात् शृणोमि । धन्यवादाः ।

**प्रश्नाः**

१. अस्मिन् सम्भाषणे के सम्भाषणं कुर्वन्ति ?
२. 'स्नातकोत्सवः' नाम किमिति भवान् चिन्तयति ?
२. 'कुलपतेः' पदस्य अर्थं विवृण्वन्तु ।

## उद्देश्यम्

* चारित्रिकशैक्षिकस्थलमहत्त्वावगमनपुरस्सरं भारतीयविद्याविकासस्य वैभवप्रदर्शनम्।
* प्राचीनचारित्रिकशैक्षिकसंस्थासु गौरवभावनायाः विकासवर्धनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह च चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।



SCERT TELANGANA

## कविपरिचयः

प्रस्तुतपाठोऽयं 'सार्थः' इत्यस्मात् ग्रन्थात् उद्धृतो विद्यते । 'सार्थः' इति एस्, एल्, भैरवप्पवर्येण कन्नडभाषया विरचितः प्रसिद्धः कथाग्रन्थः । भैरवप्पमहोदयस्य कृतिषु जीवनानुभवः यथा प्रफुल्लितः भवति तथा न कस्यापि अन्यस्य साहित्यकारस्य कृतिषु इत्यत्र नातिशायोक्तिः ।

कन्नडमूलस्य एतस्य कथाग्रन्थस्य संस्कृतानुवादकः मान्यः हेच्.वि. नागराजरावः । एषः संस्कृतक्षेत्रस्य ख्यातः कृतिकारः । मैसूरु नगरे प्राच्यविद्यासंशोधनालये विशिष्टसंशोधकत्वेन कार्यं कुर्वतः नागराजरावस्य स्वतन्त्राः अनूदिताः च बह्व्यः कृतयः एतावता एव प्रकाशिताः सन्ति । सार्थस्य विषयः यथा, तथा शैली अपि गभीरा । ताम् एतां गभीरताम् क्षुण्णतया परिरक्ष्य हृद्यया शैल्या संस्कृतानुवादं सज्जीकृतवानस्ति नागराजराव् महोदयः ।

## नेपथ्यम्

अष्टमे क्रिस्तब्दे भरतखण्डस्य स्थितिमाधारीकृत्य काल्पनिकतया सृष्टः कथाग्रन्थः एवायं 'सार्थः' ।

अश्वगजादीनाम् उपरि शकटेषु च वाणिज्यपदार्थान् आरोप्य देशविदेशेषु सञ्चरतां वणिजां समूहः 'सार्थः' इति पदेन निर्दिश्यते स्म । एतादृशान् ''सार्थान्'' परिशीलयितुं गृहात् बहिः निर्गच्छति नागभट्टः । तदङ्गतया सः अनेकान् धार्मिकप्रदेशान् पश्यन् अन्ते नालन्दाविद्यालयं प्राप्नोति । तत्र तेन प्राप्ताः अनुभूतयः पाठ्यांशरूपेण अत्र निबद्धाः ।

## प्रवेशिका

यौ अतिप्राचीनौ, प्रपञ्चप्रसिद्धौ भारतीयसांस्कृतिकवैभवप्रतीकौ च आस्तां, तावेव नालन्दा-तक्षशिलाविश्वविद्यालयौ । अनयोः विश्वविद्यालययोः शास्त्राणि अधीत्य अनेके पण्डिततल्लजाः भूत्वा अस्मद्देशसंस्कृतिं दशसु दिक्षु प्रासारयन् । विदेशीयपण्डिताः यात्रिकाश्च विश्वविद्यालयावेतौ दृष्ट्वा प्रेरणां प्राप्नुवन् । तादृशयोरेकस्य नालन्दाविश्वविद्यालयस्य प्राशस्त्यमस्मिन् पाठ्यभागे विद्यते । पठित्वा ज्ञायताम्।

SCERT TELANGANA

(अहं नागभट्टः नाम माहिष्मतीपुरवासी । माहिष्मत्याः उत्तरस्यां दिशि गुर्जरप्रतीहाराणां साम्राज्यम्। दक्षिणदिशि राष्ट्रकूटसाम्राज्यम् । मद्राज्ञा नियुक्तोऽहं सार्थवाहैः काशीं गत्वा नालन्दायाः ख्यातिं विज्ञाय नालन्दां प्रविष्टः ।)

बौद्धेतराः राजानः, महाराजाः, वणिजः, श्रीमन्तः च दानानि नालन्दविद्यालयाय दत्तवन्तः इति हेतोः श्रमणत्वम् अस्वीकुर्वन् अपि अहं तत्र छात्रः भवितुं शक्तः अभवम् । मगधस्योपरि आक्रमणं कृतवन्तः गुर्जरप्रतीहाराः अपि स्वप्रतिष्ठां स्थापयितुं नालन्दाय भूरि धनं ग्रामान् च दत्तवन्तः । कतिपयवारं नालन्दक्षेत्रं वैदिकानां क्षत्रियाणां वशीभवति स्म । किन्तु न कोऽपि नालन्दं व्यनाशयत् । तस्य दानग्रामान् न कबलयति स्म । बौद्धान् अपि अतिरिच्य उदारतां प्रदर्श्य दानानि दत्त्वा परधर्मसहिष्णुतां प्राकटयन् । नालन्दस्य निर्माणाय अभिवृद्धये च प्रमुखं दानं दत्तवन्तः गुप्तवंशीयाः राजानः वैदिकाः । एवं च बौद्धेतराः अपि ज्ञानपिपासवः भरतखण्डस्य नानाभागेभ्यः अत्र आगत्य अध्ययनं कुर्वन्ति स्म । विद्याभ्याससमाप्तिवेलायां स्वयम् अविदित्वा एव बौद्धतत्त्वाकृष्टहृदयाः भवन्ति स्म । बौद्धग्रन्थानाम् अध्ययने बौद्धेतराणाम् अपि अवकाशः आसीत् । भूयांसः जनाः कुतूहलेन तादृशाय अध्ययनाय आगच्छन्ति स्म । तेषाम् अध्यापनं निष्णातारः घटिकाः अध्यापकाः कुर्वन्ति स्म । तादृशेषु कुतूहलिषु छात्रेषु बहवः शिक्षां, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पं तथा तर्कशास्त्रम्, मीमांसां, साङ्ख्यं योगं षड्दर्शनीं च अधीत्य स्वायत्तीकृतबहुशास्त्राः अपि भवन्ति स्म । स्वमतदृष्ट्या ते बौद्धदर्शनस्य मितिं गतिं च जिज्ञासन्ते स्म । अहं तादृशानां गणे आसम् । यद्यपि अध्ययनं, तद्दृढताकारि अध्यापनं च त्यक्तवतो मम गतानि द्वादशवर्षाणि । तथापि माहिष्मत्यां वेदान् वेदाङ्गानि न्यायं, वैशेषिकं, साङ्ख्यं योगं तथा जैन-बौद्धमतयोः मूलतत्त्वानि हेतुविद्यां च अहम् अधीतवान् । तर्कसंस्कारो मम बुद्धिमनसोः आसीत् ।

**विचिन्त्य वदन्तु**

* प्राचीनभारतदेशे 'सर्वधर्मसमभावना' सुष्ठु वर्धिता । प्रस्तुतपाठ्यांषशाधारेण एतां भावनां समर्थयन्तो भाषन्ताम् ?

समस्तः परिसरः बौद्धमयः । तथापि इतरेषां सिद्धान्तानाम् अध्यापनम् अपि आसीत् इति कारणात् नालन्दवासः बुद्धिप्रचोदकः आसीत् । अध्यात्मविद्यया साकं ज्योतिष-खगोलविज्ञान-आयुर्वेदादीनां शास्त्राणाम् अध्ययनम् अपि आसीदिति कारणात् उपाध्यायानां प्रवचनानि, विद्यार्थिनाम् अन्योन्यचर्चाश्च आकर्ण्यन्ते स्म । उपन्यासाय अष्टौ महान्ति अङ्गणानि । प्रवचनप्रकोष्ठानां शतत्रयम् । प्रतिदिनं तानि छात्रैः भरितानि शब्दायन्ते स्म । कस्य विद्यार्थिनः अध्ययनं कस्य भवनस्य कस्मिन् प्रकोष्ठे इति, कः उपाध्यायः कस्मिन् प्रकोष्ठे भवतीति व्यवस्थापकान् विना न कश्चिद् वक्तुं पारयति । नवसहस्राधिकाः विद्यार्थिनः । सहस्रसंख्याकाः उपाध्यायाः । एकैकस्यापि उपाध्यायस्य स्वशिष्याणां निकटः परिचयः आसीत् । भूयांसः उपाध्यायाः, भिक्षवः वेतनादिकं किमपि प्रतिफलम्

**विचिन्त्य वदन्तु**

* प्राचीनगुरुकुलव्यवस्था, आधुनिका-वासीयविद्यालयव्यवस्था इत्येतयोः भेदानां विश्लोषणं कुर्वन्तु ।



SCERT TELANGANA

अस्वीकृत्य विहारसङ्घारामेषु भोजनं वसतिं च प्राप्नुवन्तः अध्ययन-चिन्तन-ग्रन्थरचनाध्यापनार्थं स्वजीवितं निक्षेपीकृतवन्तः । विद्यार्थी भिक्षुश्चेत् स स्वगुरुणा साकं तत्प्रकोष्ठे एव वसेत् । गुरोः वस्त्राणि क्षालयित्वा, स्नानमार्जनादिकर्मणे आनुकूल्यं प्रकल्प्य पाकशालातः प्रातः काञ्जिकां, मध्याह्ने सायङ्काले च भोजनं समानीय सेवां कुर्यात् । गुरोः समक्षम् एव शिष्यस्य बुद्धिः शीलं च रूपम् आसाद्य वर्धेत । गुरुवत् शिष्योऽपि तत्रैव प्रकोष्ठे ध्याननिरतः स्यात् । मादृशानां तु नायं निर्बन्धः । चित्रलेखनं, कन्दुकक्रीडा बाणेन लक्ष्यवेधनं, लोकानुकरणं, नाटकावलोकनं, चौर्येण द्यूतम् इत्यादयः प्रमोदाः अस्मादृशानां सुलभाः आसन् । किन्तु तेषु मम आसक्तिः न आसीत् । ते खलु अल्पवयसां कृते ।

सर्वाणि भवनानि चतुर्भूमिवन्ति । एकैकस्मिन् भवने अपि प्रायः शतत्रयं प्रकोष्ठानाम् । मध्ये विशालं चत्वरम् । तत्र कूपः । रत्नोदधिः, रत्नसागरः, रत्नगञ्जक इति प्रसिद्धानां त्रयाणां महासौधानां समुच्चयस्य ग्रन्थागारम् एकत्र । समग्रस्य समुच्चयस्य नाम धर्मगञ्जः इति । रत्नोदधिः नवभौमिकः सौधः। तत्रैव प्रज्ञापारमितासूत्रगुह्यसमाजादयः अतीवमुख्याः ग्रन्थाः संरक्षिताः । तेषां ग्रन्थानां ख्यातेः अनुगुणं भवनौन्नत्यम् । मया तु तावदुन्नतं भवनं न दृष्टपूर्वम् । नालन्दाक्षेत्रे सर्वत्र कति चैत्याः, कति संघारामाः। मादृशाय विद्यार्थिने दीयमानस्य निश्शुल्कभोजनस्य कृते मुख्यग्रन्थानां प्रतिकृतिकरणरूपं कार्यं ते विदधति स्म । दक्षिणेन हस्तेन धृतकण्ठः, वामहस्ताङ्गुलीभिः तालपत्रं दृढं परिमृद्नन् अहं प्रज्ञापारमितशास्त्रस्य प्रतिकृतिम् अकरवम् । निर्दोषो वृत्ताक्षरो मत्कृतः लेखः आचार्येभ्यः रोचते स्म । कर्तव्य - वेतन - सेवारूपेण ग्रन्थानां प्रतिकृतिनिर्माणं सदा प्रावर्तत ।



विद्यालयस्य महाद्वारे श्वेतशिलाफलके पुरा तत्र स्थित्वा विद्यया कीर्तिम् आर्जितवतां महताम् आचार्याणां नामानि टङ्कितानि । चतुर्षु द्वारेषु चत्वारो द्वारपालाः । ते खलु महाविद्वांसः ! विद्यार्थिनः प्रवेशं ते किल निश्चिन्वन्ति । परश्शतपरस्सहस्रक्रोशदूराद् आगत्यापि प्रवेशम् अलब्ध्वा निवर्तमानाः कति ! विद्यार्थिनः भाषाम्, अष्टाध्याय्यादिमूलग्रन्थानां परिज्ञानं, बुद्धिशक्तिं, शीलं चेति एकैकम् अपि अंशं कूलङ्कषं परीक्ष्य एव प्रवेशः दीयते । प्रायशः दशसु द्वावेव प्रवेशं प्राप्नुतः सुदैविनौ । अवशिष्टाः नतोत्तमाङ्गाः निवर्तन्ते । मम बुद्धिशक्त्या अहं प्रवेशं लब्धवान्, उत वज्रपादस्य प्रभावात् ? यद्यपि मया द्वारपालानां सर्वे प्रश्नाः समीचीनतया दत्तोत्तराः कृताः । तथापि वज्रपादस्य प्रभावं विना मया प्रवेशः न लभ्येत इति निश्चप्रचम् । अन्यैः सह गणनायाम् अहं वयसा किञ्चित् ज्यायान् एव । पञ्चत्रिंशद्वर्षे वयसि सर्वस्वं त्यक्त्वा अत्र आगत्य विद्यार्थित्वं प्राप्नुवन्तः विरलाः । बौद्धधर्मावलम्बिनां विषये नैषः नियमः अन्वेति । चीन-सुवर्णद्वीपत्रिविष्टपादिभ्यः दूरदेशेभ्यः

आगच्छन्तः तु स्वदेशे लभ्यं सर्वं ज्ञानं लब्ध्वा तदनन्तरम् एव अत्र आगच्छन्ति । फाहियान् नामा कश्चन महापण्डितः अत्र आगतः किल । पश्चात् कश्चित् हुएनूत्साङ्गनामा अत्र आगत्य अत्रत्यं कञ्चन लोकायतं वादे पराजितवान् किल। चक्रवर्ती हर्षः उत्कलस्थितान् हीनयानपण्डितान् प्रेषयितुं तदानीन्तनाय शीलभद्रपण्डिताय सन्देशं प्रेषितवान् किल । महापण्डिताः सागरमतिप्रज्ञारश्मि-सिंहरश्मि -हुएनूत्साङ्गनामानः शीलभद्रेण तदर्थं प्रेषिताः किल । न केवलं ते, इत्सिङ्ग्, थान्मी, हुएनूच्यु, ताहि इत्यादीनि बहूनि नामधेयानि पण्डितानाम् । चीन-त्रिविष्टप-कोरियादिभ्यः आगतानां तेषां नामानि बुद्धौ धारयितुं दुष्कराणि । इदानीम् अपि आगच्छन्ति, आगमिष्यन्ति च । ''अत्र आगत्य मुख्यान् ग्रन्थान् अधीत्य तेषां प्रतिकृतीश्च कृत्वा स्वदेशं यान्ति । तेषु कतिपये मदपि ज्यायांसः । किन्तु न ते मादृशाः । ते हि श्रद्धालवः ।

## विचिन्त्य वदन्तु

* संस्कृतभाषाम् अधीतवताम् अथवा संस्कृतभाषाभिवृद्धियै प्रयतितवतां पाश्चात्यानां विषये वदन्तु ।

माहिष्मतीपाठशालायामिव अत्रापि प्रातः सायं च पूजाः प्रवर्तन्ते । किन्तु माहिष्मत्यां विग्रहाराधनं न आसीत् । प्रातरुत्थाय तत्रत्याः उपशताः विद्यार्थिनः मिलिताः वेदमन्त्रान् अपठाम । सायमपि सामूहिकं वेदपठनं प्रावर्तत । अपि च एकैकोऽपि व्यक्तिशो निश्शब्दं सन्ध्यावन्दनम् अकरोत् । किन्तु नालन्दे सामूहिकपूजाया एव महत्त्वमधिकम् । अपि च विग्रहाराधनस्य ।

एतावन्ति दिनानि या संस्था माम् अपालयत्, तस्यै धन्यवादान् निवेद्य स्मारं स्मारं नालन्दाम् वन्दमानः महता सन्तोषेण गृहं प्रातिष्ठे ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

**अ) अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. प्राचीनकाले विद्याविधानं कथमासीत् ?
२. भवद्भिः किमपि यात्रास्थलं दृष्टं चेत् तत्र स्थितान् विशेषविषयान् वदन्तु ।
३. कस्यचन ग्रन्थालयस्य स्वरूपं वदन्तु ।

**आ) अधः दत्तानि वाक्यानि पाठमुनुसृत्य क्रमेण लिखन्तु ।**

१. फाहियान्नाम कश्चन महापण्डितः अत्र आगतः किल ।
२. अत्र आगत्य मुख्यान् ग्रन्थान् अधीत्य तेषां प्रतिकृतीश्च कृत्वा स्वदेशं यान्ति स्म ।
३. निर्दोषो वृत्ताक्षरो मत्कृतः लेखः आचार्येभ्यः रोचते स्म ।
४. गुरोः समक्षमेव शिष्यस्य बुद्धिः शीलं च रूपम् आसाद्य वर्धेत ।
५. नालन्दस्य निर्माणाय अभिवृध्दये च प्रमुखं दानं दत्तवन्तः गुप्तवंशीयाः राजानः वैदिकाः ।
६. उपन्यासाय अष्टौ महान्ति अङ्गणानि । प्रवचनप्रकोष्ठानां शतत्रयम् ।



SCERT TELANGANA

## इ) अधः दत्तम् अनुच्छेदं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

प्राचीनभारतीयविश्वविद्यालयेषु अन्यतमः प्राक्तनश्च तक्षशिलाविश्वविद्यालयः । अस्य कालः १००० क्री.पू. तः ५०० क्री.श. । इदानीं पाकिस्थानुदेशे वर्तते तक्षशिलाप्रदेशः। 'तक्ष' इत्याख्येन नगरं निर्मितम् । तक्षः भरतस्य पुत्रः । रामायणे महाभारते च गन्धर्वदेशे नगरमिदं स्थितमिति उट्टङ्कितम् । आश्चर्यकरनिर्माणानि, स्थूपाः, विहाराः तत्र निर्मिताः बभूवुः । अस्मिन् विश्वविद्यालये वेदवेदाङ्गादिभिः साकं कृषि - वाणिज्यादिशास्त्राण्यापि बोधयन्ति स्म । सर्वेषां वर्णानामपि प्रवेष्टुम् अवकाशः भवति स्म । व्याकरणदर्शनप्रवर्तकः पाणिनिः राजनीतिपुङ्गवः, अर्थशास्त्रकोविदः च चाणक्यः, शारीरिकधर्मशास्त्रज्ञः जीवकः इत्यादयः अस्मिन् विश्वविद्यालये एव अध्यगीषत ।

१. तक्षशिलाविश्वविद्यालयस्य कालः कः ? सः कुत्र वर्तते ?
२. तक्षशिलाविश्वविद्यालये के शास्त्रज्ञाः अधीतवन्तः ?
३. विश्वविद्यालयेऽस्मिन् कानि शास्त्राणि अध्यापयन्ति स्म ?
४. 'तक्षशिला' इति नाम कथं प्रसिद्धम् ?
५. विश्वविद्यालये किं किं दृश्यते स्म ?
६. यथोचितं योजयन्तु ।

| क्र.म | नाम | शास्त्रम् |
|---|---|---|
| १. | पाणिनिः | शारीरिकधर्मशास्त्रज्ञः |
| २. | चाणक्यः | व्याकरणशास्त्रनिर्माता |
| ३. | जीवकः | अर्थशास्त्रप्रणेता |

## ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. नालन्दाविश्वविद्यालयस्य निर्माणवैशिष्ट्यं लिखन्तु ।
२. नालन्दाविश्वविद्यालयस्य विद्यार्थिनां प्रवेशः कथं भवति स्म ?
३. नालन्दाविश्वविद्यालये छात्राः कथं भवन्ति स्म ?
४. माहिष्मतीं परितः विद्यमाने साम्राज्ये के ?
५. नालान्दाविश्वाविद्यालये विद्याभ्याससमाप्तिकाले छात्राः बौद्धतत्त्वाकृष्टहृदयाः कथं भवन्ति स्म ?
६. नालन्दाविश्वविद्यालये शिष्याः गुरुन् कथं सेवितवन्तः ?
७. नालन्दाविश्वविद्यालयं प्रति नागभट्टः किमर्थमागतवान् ? कथं प्रवेशं लब्धवान् ?

# II. भावव्यक्तीकरणम् - सर्जनात्मकता

## अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. 'नालन्दाविश्वविद्यालयः प्रमुखविद्याकेन्द्रम् आसीत्' कथमिति निरूपयन्तु ।
२. 'परधर्मसहिष्णुतां प्राकटयन्' इति पाठे अस्ति खलु ! भवन्तः तत्पठित्वा किमवगतवन्तः?
३. नालन्दाविश्वविद्यालये बौद्धभिक्षवः वेतनं विना पाठयन्ति स्म तत्कारणं किमिति भावयन्ति?
४. इदानीन्तनकाले वेतनं विना केऽपि कार्यं कुर्वन्ति वा ? किमर्थञ्च ।
५. नालन्दविश्वविद्यालयनिर्माणार्थं बौद्धेतरजनैः महत् साहाय्यमाचरितं खलु ! तस्य कारणानि कानि ?

आ) **अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. वर्तमानकाले प्राक्-शास्त्रि (Inter) - शास्त्रि (Degree) - आचार्य (M.A.) - वृत्तिशिक्षादीनाम् (B.Ed, M.B.B.S.etc) अध्ययनार्थं परिकल्पितां छात्रप्रवेशपद्धतिं लिखन्तु ।

२. नागभट्टः स्वाधीतनालन्दाविश्वविद्यालयम् उद्दिश्य व्यलिखत् खलु ! भवन्तः भवद्विद्यालयं विवृण्वन्तः दशवाक्यानि लिखन्तु ।

इ) **सर्जनात्मकतया / प्रशंसात्मकतया समाधानानि लिखन्तु ।**

१. भवतः समीपस्थं कलाशालां दृष्ट्वा तेन प्राप्तं स्वानुभवं लिखन्तु ।

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఉన్నతసంస్కృతవిద్యని అభివృద్ధిపరచుటకై భారతప్రభుత్వం తిరుపతిలో రాష్ట్రీయసంస్కృతవిద్యాపీఠమనే' పేరుతో సంస్కృత విశ్వవిద్యాలయాన్ని 1961లో స్థాపించింది. దీనికి డా॥ సర్వేపల్లి రాధాకృష్ణన్ గారు శంఖుస్థాపన చేశారు. పరంపరాగత శాస్త్రాధ్యయన సంరక్షణం మరియు సంస్కృతగ్రంథాలపై వైజ్ఞానిక పరిశోధనలు ఇక్కడ గొప్పగా చేయబడుతున్నాయి. అనేకమంది పండితులు దేశం నలుమూలల నుండి వస్తున్న విద్యార్థులను సంస్కృతశాస్త్ర పండితులుగా తీర్చిదిద్దుతున్నారు. శాస్త్రాధ్యయనానికి కావలసిన అన్ని సదుపాయాలు ఇక్కడ లభ్యమవుతాయి.

## III. भाषांशाः

### १. पदजालाभिवृद्धिः

१. **प्रस्तुतपाठे शास्त्रग्रन्थानां नामानि सन्ति । तानि क्रमेण पट्टिकारूपेण लिखन्तु ।**

| उदा - | क्र.सं. | शास्त्रग्रन्थस्य नाम |
|---|---|---|
| | १ | शिक्षा |

२. **अधः दत्तवाक्येषु रेखाङ्कितपदानाम् अर्थान् ज्ञात्वा तानि पदान्युपयुज्य स्वीयवाक्यानि लिखन्तु ।**

१. देवस्य निकटे श्रद्धा प्रदर्शनीया ।

२. निष्णातः जनः जीवनं सुखमयं करोति ।

३. शिशुः वानरं दृष्ट्वा कुतूहलं प्रदर्शयति ।

४. प्रत्यहं धौतं वस्त्रं धार्यम् ।

५. उदधिः एव नदीनां गतिः ।



SCERT TELANGANA

## व्याकरणांशाः

**अ) सन्धिविच्छेदं कृत्वा सन्धिनामानि निर्दिशन्तु ।**

| | |
|---|---|
| १. बौद्धेतराः | २. विहारसङ्घारामेषु |
| ३. भिक्षुश्चेत् | ४. स्नानमार्जनादिकर्मणे |
| ५. शिष्योऽपि | ६. लोकानुकरणम् |
| ७. नाटकावलोकनम् | ८. इत्यादयः |
| ९. एकैकस्मिन् | १०. रत्नोदधिः |

**आ) अधः दत्तानि पदानि संयोज्य सन्धिनामानि लिखन्तु ।**

| | |
|---|---|
| १. तत्र + एव | २. भवन + औन्नत्यम् |
| ३. तावत् + उन्नतम् | ४. सङ्घ + आरामाः |
| ५. अष्टाध्यायी + आदिमूलग्रन्थानां | ६. एक + एकम् |
| ७. द्वौ + एव | ८. पञ्चत्रिंशत् + वर्षम् |
| ९. दत्त + उत्तराः | १०. प्रतिकृतीः + च |

**इ) अधः दत्तानां समासपदानां विग्रहवाक्यानि समासनामानि च लिखन्तु ।**

| | | |
|---|---|---|
| १. बौद्धेतराः | २. महाराजाः | ३. परधर्मसहिष्णुता |
| ४. ज्ञानपिपासवः | ५. बौद्धतत्त्वाकृष्टहृदयाः | ७. स्वायत्तीकृतबहुशास्त्राः |
| ७. शतत्रयम् | ८. प्रवचनप्रकोष्ठानां | ९. प्रतिफलम् |
| १०. ध्याननिरतः | ११. महासौधानां | |

**ई) पाठे स्थितानि षष्ठीतत्पुरुषसमासपदानि अन्विष्य तेषां विग्रहवाक्यानि लिखन्तु ।**

**परियोजनाकार्यम्**

नालन्दाविश्वविद्यालये पाठ्यविषया ज्ञाताः खलु ! वर्तमानविश्वविद्यालयेषु बोध्यमानान् पाठ्यांशान् ज्ञात्वा पट्टिकारूपेण लिखित्वा प्रदर्शयन्तु ।

**फलमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।**



SCERT TELANGANA

# शब्दरूपाणि

## १. ओकारानतः पुंलिङ्गः गो शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| गौः | गावौ | गावः | - प्रथमा विभक्तिः |
| हे गौः | हे गावौ | हे गावः | - सम्बोधनप्रथमा विभक्तिः |
| गाम् | गावौ | गाः | - द्वितीया विभक्तिः |
| गवा | गोभ्याम् | गोभिः | - तृतीया विभक्तिः |
| गवे | गोभ्याम् | गोभ्यः | - चतुर्थी विभक्तिः |
| गोः | गोभ्याम् | गोभ्यः | - पञ्चमी विभक्तिः |
| गोः | गवोः | गवाम् | - षष्ठी विभक्तिः |
| गवि | गवोः | गोषु | - सप्तमी विभक्तिः |

## २. ऊकारान्तः स्त्रीलिङ्गः वधू शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| वधूः | वध्वौ | वध्वः | - प्रथमा विभक्तिः |
| हे वधु | हे वध्वौ | हे वध्वः | - सम्बोधनप्रथमा विभक्तिः |
| वधूम् | वध्वौ | वधूः | - द्वितीया विभक्तिः |
| वध्वा | वधूभ्याम् | वधूभिः | - तृतीया विभक्तिः |
| वध्वै | वधूभ्याम् | वधूभ्यः | - चतुर्थी विभक्तिः |
| वध्वाः | वधूभ्याम् | वधूभ्यः | - पञ्चमी विभक्तिः |
| वध्वाः | वध्वोः | वधूनाम् | - षष्ठी विभक्तिः |
| वध्वाम् | वध्वोः | वधूषु | - सप्तमी विभक्तिः |

## ३. उकारान्तः नपुंसकलिङ्गः मधु शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| मधु | मधुनी | मधूनि | - प्रथमा विभक्तिः |
| हे मधु | हे मधुनी | हे मधूनि | - सम्बोधनप्रथमा विभक्तिः |
| मधु | मधुनी | मधूनि | - द्वितीया विभक्तिः |
| मधुना | मधुभ्याम् | मधुभिः | - तृतीया विभक्तिः |
| मधुने | मधुभ्याम् | मधुभ्यः | - चतुर्थी विभक्तिः |
| मधुनः | मधुभ्याम् | मधुभ्यः | - पञ्चमी विभक्तिः |
| मधुनः | मधुनोः, मध्वोः | मधुनाम् | - षष्ठी विभक्तिः |
| मधुनि | मधुनोः, मध्वोः | मधुषु | - सप्तमी विभक्तिः |

SCERT TELANGANA

## ४. जकारान्तः पुंलिङ्गः भिषक् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| भिषक् | भिषजौ | भिषजः | - प्रथमा विभक्तिः |
| हे भिषक् | हे भिषजौ | हे भिषजः | - सम्बोधनप्रथमा विभक्तिः |
| भिषजम् | भिषजौ | भिषजः | - द्वितीया विभक्तिः |
| भिषजा | भिषग्भ्याम् | भिषग्भिः | - तृतीया विभक्तिः |
| भिषजे | भिषग्भ्याम् | भिषग्भ्यः | - चतुर्थी विभक्तिः |
| भिषजः | भिषग्भ्याम् | भिषग्भ्यः | - पञ्चमी विभक्तिः |
| भिषजः | भिषजोः | भिषजाम् | - षष्ठी विभक्तिः |
| भिषजि | भिषजोः | भिषक्षु | - सप्तमी विभक्तिः |

## ५. सकारान्तः पुंलिङ्गः विद्वस् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| विद्वान् | विद्वांसौ | विद्वासः | - प्रथमा विभक्तिः |
| हे विद्वन् | हे विद्वांसौ | हे विद्वासः | - सम्बोधनप्रथमा विभक्तिः |
| विद्वासम् | विद्वांसौ | विदुषः | - द्वितीया विभक्तिः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः | - तृतीया विभक्तिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः | - चतुर्थी विभक्तिः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः | - पञ्चमी विभक्तिः |
| विदुषः | विदुषोः | विदुषाम् | - षष्ठी विभक्तिः |
| विदुषि | विदुषोः | विद्वत्सु | - सप्तमी विभक्तिः |

## ६. दकारान्तः पुंलिङ्गः यद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| यः | यौ | ये | - प्रथमा विभक्तिः |
| यम् | यौ | यान् | - द्वितीया विभक्तिः |
| येन | याभ्याम् | यैः | - तृतीया विभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | - चतुर्थी विभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | - पञ्चमी विभक्तिः |
| यस्य | ययोः | येषाम् | - षष्ठी विभक्तिः |
| यस्मिन् | ययोः | येषु | - सप्तमी विभक्तिः |

SCERT TELANGANA

## ७. दकारान्तः स्त्रीलिङ्गः यद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| या | ये | याः | - प्रथमा विभक्तिः |
| याम् | ये | याः | - द्वितीया विभक्तिः |
| यया | याभ्याम् | याभिः | - तृतीया विभक्तिः |
| यस्यै | याभ्याम् | याभ्यः | - चतुर्थी विभक्तिः |
| यस्याः | याभ्याम् | याभ्यः | - पञ्चमी विभक्तिः |
| यस्याः | ययोः | यासाम् | - षष्ठी विभक्तिः |
| यस्याम् | ययोः | यासु | - सप्तमी विभक्तिः |

## ८. दकारान्तः नपुंसकलिङ्गः यद् शब्दः

| ए. व | द्वि. व | ब. व | |
|---|---|---|---|
| यत् | ये | यानि | - प्रथमा विभक्तिः |
| यत् | ये | यानि | - द्वितीया विभक्तिः |
| येन | याभ्याम् | यैः | - तृतीया विभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | - चतुर्थी विभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | - पञ्चमी विभक्तिः |
| यस्य | ययोः | येषाम् | - षष्ठी विभक्तिः |
| यस्मिन् | ययोः | येषु | - सप्तमी विभक्तिः |

शान्तिः पुष्टिः तुष्टिश्चास्तु ।

SCERT TELANGANA

# धातुरूपाणि

## परस्मैपदिधातुरूपाणि

### १. मिल - सङ्गमे

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| मिलति | मिलतः | मिलन्ति |
| मिलसि | मिलथः | मिलथ |
| मिलामि | मिलावः | मिलामः |

#### भविष्यति लृट्

| | | |
|---|---|---|
| मेलिष्यति | मेलिष्यतः | मेलिष्यन्ति |
| मेलिष्यसि | मेलिष्यथः | मेलिष्यथ |
| मेलिष्यामि | मेलिष्यावः | मेलिष्यामः |

#### अनद्यतनभूते लङ्

| | | |
|---|---|---|
| अमिलत् | अमिलताम् | अमिलन् |
| अमिलः | अमिलतम् | अमिलत |
| अमिलम् | अमिलाव | अमिलाम |

#### विध्याशिषोः लोट्

| | | |
|---|---|---|
| मिलतु, मिलतात् | मिलताम् | मिलन्तु |
| मिल, मिलतात् | मिलतम् | मिलत |
| मिलानि | मिलाव | मिलाम |

#### विधिलिङ्

| | | |
|---|---|---|
| मिलेत् | मिलेताम् | मिलेयुः |
| मिलेः | मिलेतम् | मिलेत |
| मिलेयम् | मिलेव | मिलेम |

### २. इष् - इच्छायाम्

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| इच्छति | इच्छतः | इच्छन्ति | प्रथमपुरुषः |
| इच्छसि | इच्छथः | इच्छथ | मध्यमपुरुषः |
| इच्छामि | इच्छावः | इच्छामः | उत्तमपुरुषः |

#### भविष्यति लृट्

| | | | |
|---|---|---|---|
| एषिष्यति | एषिष्यतः | एषिष्यन्ति | प्रथमपुरुषः |
| एषिष्यसि | एषिष्यथः | एषिष्यथ | मध्यमपुरुषः |
| एषिष्यामि | एषिष्यावः | एषिष्यामः | उत्तमपुरुषः |

#### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| ऐच्छत् | ऐच्छताम् | ऐच्छन् | प्रथमपुरुषः |
| ऐच्छः | ऐच्छतम् | ऐच्छत | मध्यमपुरुषः |
| ऐच्छम् | ऐच्छाव | ऐच्छाम | उत्तमपुरुषः |

#### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| इच्छतु, इच्छतात् | इच्छताम् | इच्छन्तु | प्रथमपुरुषः |
| इच्छ, इच्छतात् | इच्छतम् | इच्छत | मध्यमपुरुषः |
| इच्छानि | इच्छाव | इच्छाम | उत्तमपुरुषः |

#### विधिलिङ्

| | | | |
|---|---|---|---|
| इच्छेत् | इच्छेताम् | इच्छेयुः | प्रथमपुरुषः |
| इच्छेः | इच्छेतम् | इच्छेत | मध्यमपुरुषः |
| इच्छेयम् | इच्छेव | इच्छेम | उत्तमपुरुषः |

SCERT TELANGANA

आन्ध्रप्रदेशप्रभुत्वस्य निश्शुल्कवितरणम्

## ३. गण - संख्याने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| गणयति | गणयतः | गणयन्ति |
| गणयसि | गणयथः | गणयथ |
| गणयामि | गणयावः | गणयामः |

### भविष्यति लृट्

| | | |
|---|---|---|
| गणिष्यति | गणिष्यतः | गणिष्यन्ति |
| गणिष्यसि | गणिष्यथः | गणिष्यथ |
| गणिष्यामि | गणिष्यावः | गणिष्यामः |

### अनद्यतनभूते लङ्

| | | |
|---|---|---|
| अगणयत् | अगणयताम् | अगणयन् |
| अगणयः | अगणयतम् | अगणयत |
| अगणयम् | अगणयाव | अगणयाम |

### विध्याशिषोः लोट्

| | | |
|---|---|---|
| गणयतु, गणयतात् | गणयताम् | गणयन्तु |
| गणय, गणयतात् | गणयतम् | गणयत |
| गणयानि | गणयाव | गणयाम |

### विधिलिङ्

| | | |
|---|---|---|
| गणयेत् | गणयेताम् | गणयेयुः |
| गणयेः | गणयेतम् | गणयेत |
| गणयेयम् | गणयेव | गणयेम |

## ४. कथ - वाक्यप्रबन्धे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| कथयति | कथयतः | कथयन्ति | प्रथमपुरुषः |
| कथयसि | कथयथः | कथयथ | मध्यमपुरुषः |
| कथयामि | कथयावः | कथयामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| कथयिष्यति | कथयिष्यतः | कथयिष्यन्ति | प्रथमपुरुषः |
| कथयिष्यसि | कथयिष्यथः | कथयिष्यथ | मध्यमपुरुषः |
| कथयिष्यामि | कथयिष्यावः | कथयिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अकथयत् | अकथयताम् | अकथयन् | प्रथमपुरुषः |
| अकथयः | अकथयतम् | अकथयत | मध्यमपुरुषः |
| अकथयम् | अकथयाव | अकथयाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| कथयतु, कथयतात् | कथयताम् | कथयन्तु | प्रथमपुरुषः |
| कथय, कथयतात् | कथयतम् | कथयत | मध्यमपुरुषः |
| कथयानि | कथयाव | कथयाम | उत्तमपुरुषः |

### विधिलिङ्

| | | | |
|---|---|---|---|
| कथयेत् | कथयेताम् | कथयेयुः | प्रथमपुरुषः |
| कथयेः | कथयेतम् | कथयेत | मध्यमपुरुषः |
| कथयेयम् | कथयेव | कथयेम | उत्तमपुरुषः |

SCERT TELANGANA

## आत्मनेपदिधातुरूपाणि

### ५ जनी - प्रादुर्भावे

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| जायते | जायेते | जायन्ते |
| जायसे | जायेथे | जायध्वे |
| जाये | जायावहे | जायामहे |

#### भविष्यति लृट्

| | | |
|---|---|---|
| जनिष्यते | जनिष्येते | जनिष्यन्ते |
| जनिष्यसे | जनिष्येथे | जनिष्यध्वे |
| जनिष्ये | जनिष्यावहे | जनिष्यामहे |

#### अनद्यतनभूते लङ्

| | | |
|---|---|---|
| अजायत | अजायेताम् | अजायन्त |
| अजायथाः | अजायेथाम् | अजायध्वम् |
| अजाये | अजायावहे | अजायामहे |

#### विध्याशिषोः लोट्

| | | |
|---|---|---|
| जायताम् | जायेताम् | जायन्ताम् |
| जायस्व | जायेथाम् | जायध्वम् |
| जायै | जायावहै | जायामहै |

#### विधिलिङ्

| | | |
|---|---|---|
| जायेत | जायेयाताम् | जायेरन् |
| जायेथाः | जायेयाथाम् | जायेध्वम् |
| जायेय | जायेवहि | जायेमहि |

### ६ विद् - सत्तायाम्

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| विद्यते | विद्येते | विद्यन्ते | प्रथमपुरुषः |
| विद्यसे | विद्येथे | विद्यध्वे | मध्यमपुरुषः |
| विद्ये | विद्यावहे | विद्यामहे | उत्तमपुरुषः |

#### भविष्यति लृट्

| | | | |
|---|---|---|---|
| वेत्स्यते | वेत्स्येते | वेत्स्यन्ते | प्रथमपुरुषः |
| वेत्स्यसे | वेत्स्येथे | वेत्स्यध्वे | मध्यमपुरुषः |
| वेत्स्ये | वेत्स्यावहे | वेत्स्यामहे | उत्तमपुरुषः |

#### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अविद्यत | अविद्येताम् | अविद्यन्त | प्रथमपुरुषः |
| अविद्यथाः | अविद्येथाम् | अविद्यध्वम् | मध्यमपुरुषः |
| अविद्ये | अविद्यावहे | अविद्यामहे | उत्तमपुरुषः |

#### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| विद्यताम् | विद्येताम् | विद्यन्ताम् | प्रथमपुरुषः |
| विद्यस्व | विद्येथाम् | विद्यध्वम् | मध्यमपुरुषः |
| विद्यै | विद्यावहै | विद्यामहै | उत्तमपुरुषः |

#### विधिलिङ्

| | | | |
|---|---|---|---|
| विद्येत | विद्येयाताम् | विद्येरन् | प्रथमपुरुषः |
| विद्येथाः | विद्येयाथाम् | विद्येध्वम् | मध्यमपुरुषः |
| विद्येय | विद्येवहि | विद्येमहि | उत्तमपुरुषः |

SCERT TELANGANA

# पदकोशः

## अ

अक्षमा = అసమర్థురాలు

अग्रजन्मनाम् = పూర్వజుల యొక్క / బ్రాహ్మణాదుల యొక్క

अङ्कः = ఒడి / తొడ

अङ्घ्रिद्वयम् = రెండుపాదములు

अधुना = ఇప్పుడు

अधिक्षेपः = తిరస్కారము

अध्येतरि = చక్కగా చదివిన వానియందు

अध्रुवं = అస్థిరమైనది

अध्वश्रमं = మార్గాయాసమును

अनर्थाय = కీడుకొరకు

अनलेन = అగ్ని చేత

अनुजः = తమ్ముడు

अनुबद्धं = కూడిన

अपमानम् = అవమానమును

अन्तेवासिनः = శిష్యులు

अपकृतीः = అపకారములను

अभिधानायां = పేరుగలదైనటువంటి

अभिरतिः = అభిరుచి

अभ्यर्थितः = ప్రార్థించబడిన

अमः = నిర్భాగ్యుడు

अभ्युदये = అభివృద్ధియందు

अमर्षशून्येन = కోపములేని వానిచేత

अमेयरूपः = కొలవడానికి సాధ్యముకానివాడు

अम्भोजं = కమలం

अम्भोजभूः = (కమలంలో పుట్టినవాడు) బ్రహ్మ

अरिभिः = శత్రువుల చేత

अलकाः = ముంగురులు

अलङ्क्रिया = అలంకారం

अवद्यम् = నిందించదగినది

अवधीः = చంపినావో

अवन्ध्यकोपस्य = వ్యర్థము కాని కోపము గల వాని యొక్క

अवस्थाप्य = ఉంచి

अविरक्तः = ఆసక్తుడు

अविवेकिता = వివేకం లేకపోవడం

अश्रुपूर्णे = కన్నీళ్ళతో నిండిన

असंवृताङ्गान् = కవచముచేత కప్పబడని శరీరముకలవారలను

अहिं = పామును

## आ

आखण्डलतुल्यधामभिः = ఇంద్రునితో సమానమైన పరాక్రమముగల వారిచేత

आचचक्षे = చెప్పెను

आतुरे = ఉద్వేగము గల వానియందు

आत्तसत्क्रिये = సన్మానింపబడిన

आशा = దిక్కు

आश्लिष्ट = ఆక్రమించబడిన

## इ

इषवः = బాణములు

इह = ఇక్కడ

## ई

ईरयित्वा = చెప్పి

## उ

उचितज्ञता = సమయానికి అనుగుణమైన దానిని చేయు తెలివి

उच्चशिखः = ఉన్నతమైన (పెద్దదైన) జ్వాల

उच्चता = ఉన్నతత్వము

उत्कर्षः = ఉన్నతంగా ఉండుట అతిశయం

उच्छ्वसित = ఉబికిన, పైకొచ్చిన

उत्तीर्य = దాటి

SCERT TELANGANA

| | | |
|---|---|---|
| उत्प्लुत्य | = | పైకి ఎగిరి |
| उत्सङ्गः | = | ఉపరితలమునందు/ సమీపమునందు |
| उदरस्थं | = | పొట్టలో ఉన్న |
| उद्गारम् | = | స్రవించుచున్న |
| उदुम्बरवृक्षः | = | మేడి చెట్టు |
| उन्मूलयति | = | నిర్మూలిస్తున్నది / న్నాడు |

## ऋ

| | | |
|---|---|---|
| ऋषिपरम्परातः | = | ఋషిపరంపరనుండి |

## ए

| | | |
|---|---|---|
| एकैकं | = | ఒక్కొక్కటి |

## क

| | | |
|---|---|---|
| कनकं | = | బంగారం |
| करबदरसमानम् | = | చేతిలోని రేగుపండ్లతో సమానం |
| कर्मलुप्तता | = | కార్యలోపము |
| कलिता | = | పెంపొందింపజేయు |
| कविमार्गजुषाम् | = | కవుల దారిని అనుసరించిన |
| कातराः | = | భీతులు, భయపడినవారు |
| कापटिकेन | = | మోసగాడైన |
| कामधेनुः | = | కోరినవిచ్చే ఆవు |
| कार्मुकम् | = | ధనుస్సు |
| कार्श्यम् | = | బక్కచిక్కినతనాన్ని, కృశత్వమును |
| कामिनी | = | స్త్రీ |
| कुक्कुटाण्डानि | = | కోడిగుడ్లు |
| कासः | = | దగ్గు |
| किरन् | = | వెదజల్లుచూ (ప్రసరింపజేస్తూ) |
| किसलयानि | = | చిగురుటాకులు |
| कुठारस्य | = | గొడ్డలి యొక్క |
| कुन्दम् | = | మల్లె |
| कुमुदम् | = | తెల్లకలువ |
| केतकी | = | మొగలి |
| कृपणः | = | (పిసినారి) కార్పణ్యంగలవాడు |
| कृष्णासदनम् | = | ద్రౌపది యొక్క గృహమునకు |
| कृपणां | = | దీనురాలిని |
| कोटरम् | = | చెట్టు రంధ్రం |
| कोविदः | = | తత్త్వము నెఱిగిన వాడు |
| क्षमा | = | ఓర్పు |
| क्षान्तिः | = | ఓర్పు |
| क्षुधार्तः | = | ఆకలి చేత పీడింపబడినవాడు |
| कुक्षिः | = | పొట్ట |

## ग

| | | |
|---|---|---|
| गतयः | = | గమనములు |
| गाम् | = | భూమిని |
| गिरा | = | వాక్కు చేత |
| गुणलुब्धाः | = | మంచిగుణములయందు ఆసక్తికలవారు |
| गृहम् | = | ఇల్లు |

## च

| | | |
|---|---|---|
| चन्दनतरुः | = | గంధపు వృక్షము |
| चन्द्रिका | = | వెన్నెల |
| चिकीर्षुः | = | చేయవలెనని కోరికగలవాడు |
| चिरसञ्चितं | = | చాలాకాలం నుంచి దాచినది/ పోగుచేసినది |
| चेष्टितम् | = | ఇష్టమైన పని |

## छ

| | | |
|---|---|---|
| छेदेऽपि | = | రంధ్రమునందు కూడా |

## ज

| | | |
|---|---|---|
| जगतां | = | లోకములకు |
| जर्जरवंशखण्डेन | = | శిథిలమైన వెదురుకొయ్యతో |
| जनकः | = | తండ్రి |
| जनन्यनन्यचरणयोः | = | అసామాన్యములైన తల్లి పాదములయందు |
| जनपदस्यार्थे | = | ప్రాంతముకొరకు |
| जम्बू | = | నేరేడు |

SCERT TELANGANA

| | | |
|---|---|---|
| जलबिन्दुनिपातेन | = | నీటిబిందువులు పడటం చేత |
| जिह्मम् | = | సంతోషములేని వానిని, అప్రసన్నుని |
| जातः | = | జన్మించెను, పుట్టెను |
| ज्ञातिः | = | బంధువు |

**त**

| | | |
|---|---|---|
| तदा | = | అప్పుడు |
| तरुणीम् | = | యువతిని |
| तदानीन्तनी | = | ఆ కాలంనాటి |
| तमसाम् | = | అజ్ఞానమును, చీకటుల యొక్క (తమసానదిని) |
| तर्पणं | = | జలాంజలి దానం |
| तुला | = | త్రాసు, తక్కెడ |
| तुल्यं | = | సమానము |
| तृषार्तः | = | కోరిక గలవాడు/ దప్పికగొనినవాడు |
| तृष्णां | = | ఆశను |
| त्वयि | = | నీయందు |
| त्रयीगिराम् | = | మూడువేదాల వాక్కులయొక్క |
| त्रासार्थं | = | భయపెట్టుటకు |

**द**

| | | |
|---|---|---|
| दयिता | = | భార్య, ప్రియురాలు |
| दर्पणः | = | అద్దము |
| दातृत्वं | = | దానం చేసే స్వభావం |
| दारेषु | = | భార్యయందు |
| दिव्यौषधैः | = | గొప్పనైన ఔషధములచేత |
| दुकूलम् | = | పైట |
| दुनोति | = | బాధించుచున్నది / న్నాడు |
| दुर्भिक्षे | = | కరువుయందు |
| दुस्सहम् | = | భరింపలేనిది |
| दुहिता | = | కుమార్తె |
| देहिनां | = | శరీరధారుల (మనుషుల) యొక్క |
| दूर्वा | = | గడ్డి విశేషము |
| दौहित्रः | = | మనవడు (కుమార్తె యొక్క కుమారుడు) |
| द्विषताम् | = | శత్రువుల యొక్క |

**ध**

| | | |
|---|---|---|
| धटः | = | తక్కెడ, తక్కెడలోని ఒక పళ్ళెం |
| धूतकण्ठः | = | పూర్వకాలంలో గ్రంథం రాయడానికి ఉపయోగపడెడు కలము వంటిది.(ఘంటం) |
| धनसम्पत्तिः | = | ధనము వలన కలిగిన సంపద |
| धर्मिणि | = | ధర్మం కలిగిన వాడైన (వానియందు) |
| धर्मिष्ठाः | = | ధర్మాన్ని ఆచరిస్తున్నవారు |
| धात्रा | = | బ్రహ్మదేవునిచేత |
| धामवताम् | = | తేజోవంతుల యొక్క |
| धियम् | = | బుద్ధిని |
| धीरत्वं | = | ధైర్యగుణం |
| ध्रुवाणि | = | స్థిరములైనవి |
| ध्येयपथिक साधक | = | లక్ష్యాన్ని సాధించాలని బయలుదేరినవాడా ! |
| ध्येयसाधनव्रताः | = | లక్ష్యాన్ని సాధించాలనే వ్రతం కలిగినవారు |

**न**

| | | |
|---|---|---|
| नयापादितसिद्धिभूषणः | = | నీతితో కూడిన కార్యసాధనే అలంకారముగా కల |
| नभसि | = | శ్రావణమాసమున, ఆకాశమునందు |
| नागदन्तके | = | చిలుక కొయ్యయందు |
| निकारम् | = | పరాభవమును |
| निजफालपट्टलिखितं | = | తన నుదిటిపై రాయబడిన |
| नितराम् | = | మిక్కిలి |
| निर्णेजकान् | = | కడుగువారిని |
| निर्वर्त्य | = | చేసి |
| निषाद ! | = | బోయవాడా ! |
| निशम्य | = | విని |
| निषीदतः | = | తిరుగుచున్నవి |

SCERT TELANGANA

निष्क्रयम् = సరితూగువస్తువును
निष्यन्द = జాలువారుతున్న
निहन्त्रीं = నాశనము చేయువానిని

**प**

पक्ष्म = కనురెప్ప
पयोनिधौ = సముద్రమందు
परान्नभोजी = ఇతరుల భోజనము భుజించువాడు
परप्रत्ययनेयबुद्धिः = పరులయందు ప్రమాణ బుద్ధి ఉండుట
परश्वानं = ఇతరుల కుక్కను
परहितरतः = ఇతరుల మేలుయందు ఆసక్తికలిగినవాడు
परिचर्या = సేవ, శుశ్రూష
परिच्छेदः = విషయ విభాగము
परिमातुम् = కొలుచుటకు
परिणीतवान् = వివాహమాడెను
परिव्राजकः = సన్యాసి
परीक्ष्य = పరిశీలించి
परीवाहः = అలుగు, అడ్డుకట్ట
पाणिः = చేయి
पाथांसि = నీళ్ళు
पान्थः = బాటసారి
पाषाणखण्डेषु = రాళ్ళముక్కలయందు
पुङ्गवः = పురుషులలో శ్రేష్ఠుడు
पुरन्ध्रिः = పతివ్రత / పురస్త్రీ
पुराणं = ప్రాచీనమైనది
पुष्करम् = పన్నెండు సంవత్సరములు, (కమలము)
पूजास्थानं = పూజించుటకు దగిన స్థానం/ పూజించదగినది
प्रकृतिसिद्धम् = సహజసిద్ధమైనది
प्रणिपत्य = నమస్కరించి
प्रतिहारी = ద్వారపాలకుడు
प्रत्यग्रैः = కొత్తవైన (వాటిచేత)
प्रत्यहं = ప్రతిరోజు
प्रथमः = మొదటివాడు
प्रधनपिशुनं = యుద్ధసూచకము
प्रभुत्वं = ఆధిపత్యం
प्रमत्तः = అశ్రద్ధ చేసినవాడు,
प्रमदाजनोदितम् = స్త్రీజనుల చేత చెప్పబడినది
प्रशमः = శాంతి
प्रशमाभरणं = శాంతి అనెడి అలంకారం
प्रश्रयं = ఆశ్రయమును/వినయమును
प्रसभम् = బలవంతముగా
प्राक् = పూర్వము
प्राचेतसः = ప్రచేతసుని కుమారుని యొక్క వాల్మీకి యొక్క
प्राज्यम् = అధికము
प्रासादशिखरस्थः = ఎత్తైన భవనము పై నున్న
प्रियवक्तृत्वं = ప్రియంగా మాట్లాడే స్వభావం

**फ**

फालः = నొసలు

**ब**

बहुमायिकः = ఎన్నోమాయలు కలవాడు
बहुश्रुताः = సకలశాస్త్రకోవిదులు

**भ**

भणितम् = చెప్పబడినది
भयकातरः = భయము చేత పిఱికితనాన్ని పొందినవాడు
भारतवर्षे = భారతదేశమందు
भूषणैः = అలంకారముల చేత
भृतकान् = సేవకులను
भृत्यान् = సేవకులను
भ्रंश = జారిపడిన
भ्राता = సోదరుడు
भ्रातृवत् = సోదరునివలె

**म**

मधु = తేనెను
मधुकरः = తుమ్మెద

SCERT TELANGANA

मनस्विनः = అభిమానవంతుని యొక్క
मन्युव्यवसायदीपिनी= క్రోధమును, ప్రయత్నమును ఉత్తేజపరిచేటువంటిది
मरुस्थले = ఎడారి ప్రదేశమందు
माता = తల్లి
मातुलः = మేనమామ
मानिनः = అభిమానులు
मान्यान् = పూజనీయులను
मायिनः = మాయావులు
मिथुनम् = జంట
मुक्ताजालैः = ముత్యాలసరములతో
मूढः = మూర్ఖుడు
मूढैः = మూర్ఖులచేత
मूर्तरूपताम् = ఆకారాన్ని
मूर्ध्ना = తలతో

**य**

यशसि = కీర్తియందు
युधि = యుద్ధమందు

**र**

रसना = నాలుక
रत्नसंज्ञा = రత్నాలయొక్క గుర్తు
रुजन्ति = నాశనము చేయుచున్నది, భగ్నము చేయుచున్నది బాధపెట్టుచున్నది/ న్నాడు
रेणुरूषितः = ధూలిచేత మలినమైన

**ल**

लोचनाभ्यां = రెండు కనులచేత

**व**

वक्रः = వంకర
वक्त्रं = ముఖము
वनौकसः = వనంలో సంచరించేవాడు
वन्द्या = పూజింపదగినది
वपुः = శరీరం
वल्कलम् = నారచీరలను
वल्मीकः = పుట్ట
वाक्पटुता = మాటలాడుటలో నేర్పరితనము
वामाः = స్త్రీలు
वाल्मीकिः = పుట్ట నుండి వచ్చినవాడు ఆదికవి వాల్మీకి
वारिणा = ఉదకముచేత, నీటిచేత
वासवोपमः = ఇంద్రునితో సమానుడు
विकचं = వికసించునదిగా
वित्तम् = ధనము
वित्तवत्सु = ధనికులయందు
विद्विषः = శత్రువులు
विनिवेद्य = తెలిపి
विपदि = ఆపదయందు
विप्रः = బ్రాహ్మణుడు
विभवक्षये = ఐశ్వర్యం నశించినప్పుడు
विलापिनी = ఏడ్చుచున్నదైన
विमृश्यकारिणं = ఆలోచించి చేసేవాడిని
विवरं = రంధ్రం
विषण्णचित्ता = బాధపడుచున్న మనస్సుకలది
विष्वक् = అంతట
विहिताभियोगाः = పట్టుదల కలవారు
वृकोदरः = భీముడు
व्याधः = బోయవాడు, వేటగాడు
व्यसनं = దురలవాటు, ఆపద, దుఃఖపడుట, శ్రేయోమార్గం నుండి తొలగుట
व्यसने = దుఃఖమునందు
व्यसनागमे = కష్టాలు పొందినపుడు
व्रीडा = సిగ్గు

**श**

शठः = మోసగాడు
शार्दूलं = పెద్దపులిని
शित = తీక్షణమైన
शीलेन = స్వభావం చేత

SCERT TELANGANA

| | | |
|---|---|---|
| शिशुत्वं | = | బాల్యం |
| शुचिः | = | దోషం లేని, శుద్ధమైన |
| श्रुतौ | = | వేదమందు |
| श्रियं | = | లక్ష్మిని (సంపదను) |
| श्रीः | = | సంపత్తి |
| श्रीमतां | = | ధనవంతులకు/యొక్క |
| श्रुतं | = | శాస్త్రజ్ఞానం |

**स**

| | | |
|---|---|---|
| सकृत् | = | ఒక్కసారిగా |
| संस्कारशौचेन | = | సంస్కారం వలన ఏర్పడిన శుభ్రత చేత |
| सङ्गताः | = | నిమగ్నులైనవారు |
| सदसि | = | సభయందు |
| सन्तः | = | సత్పురుషులు |
| समाजपोषकाः | = | సమాజాన్ని అభివృద్ధి చేసేవారు |
| समाजपोषिताः | = | సమాజం చేత పోషింపబడేవారు (అభివృద్ధి చేయబడేవారు) |
| सम्राट् | = | చక్రవర్తి |
| सर्पैः | = | పాములచేత |
| सलिलम् | = | జలము |
| सविता | = | సూర్యుడు |
| सञ्चितः | = | కూడబెట్టబడినది |
| सह | = | కలసి |
| सहसा | = | వెంటనే |
| सतां | = | సజ్జనులకు |
| साधु | = | మంచి |
| साधुपदवीं | = | మంచి స్థానాన్ని |
| सुतः | = | పుత్రుడు, కుమారుడు |
| सुरभिः | = | పరిమళము |
| सुवासिनी | = | ముత్తైదువ |
| सुहृत् | = | మిత్రుడు |
| सूक्तिः | = | మంచిమాట |
| सोपानपंक्तिः | = | మెట్లవరుస |
| स्तोकं | = | కొంచెం |
| स्त्रैणं | = | స్త్రీత్వం, స్త్రీ సమూహము |
| स्निग्ध | = | దట్టమైన,చిక్కని |
| स्रस्त | = | జారిన, |
| स्रोतांसि | = | నదులు |
| स्रोतः | = | నదీ ప్రవాహము |
| स्वदारेषु | = | తన భార్యయందు |
| स्वादु | = | రుచికరమైన |
| स्वार्थलेपनम् | = | స్వార్థంతో కూడి యుండటం |

**ह**

| | | |
|---|---|---|
| हेतुः | = | కారణం |
| हेरम्बः | = | వినాయకుడు |
| हतम् | = | తేబడిన |



SCERT TELANGANA

# क्रियापदकोशः

## अ

| | | |
|---|---|---|
| अकथयत् | = | చెప్పెను |
| अकरोः | = | చేసితివి |
| अकारयत् | = | చేయించెను |
| अगात् | = | వెళ్ళెను |
| अघोषयत् | = | చాటింపు వేసెను |
| अङ्गीकुर्यात् | = | అంగీకరించాలి |
| अचिन्तयत् | = | చింతించెను |
| अजागरयत् | = | మేలుకొల్పెను |
| अतिचक्राम | = | దాటెను/అతిక్రమించెను |
| अतिष्ठत् | = | ఉండెనో / ఉండెను |
| अदात् | = | ఇచ్చెను |
| अदूयत | = | బాధపడెను |
| अनिन्दम् | = | నిందించితిని |
| अनुतप्ये | = | బాధపడుతున్నాను, పశ్చాత్తాప పడుచున్నాను |
| अनुनय | = | ఊరడించు |
| अनुभूयते | = | అనుభవింపబడుచున్నది |
| अनुयाहि | = | అనుసరించు |
| अनुवर्तन्ते | = | అనుసరిస్తారు |
| अनुविद्धम् | = | కొట్టబడిన/ కూర్చబడినది |
| अन्वभवत् | = | అనుభవించెను |
| अन्वयुङ्क्त | = | ఆదేశించాడు |
| अन्वेति | = | అన్వయించుచున్నది/డు |
| अपठाम | = | చదివితిమి |
| अपश्यत् | = | చూసెను |
| अपहारयेत् | = | అపహరింప చేయాలి |
| अपृच्छत् | = | అడిగెను |
| अपाठि | = | చదవబడెను |
| अपालयत् | = | పాలించెనో |
| अब्रवीत् | = | పలికెను, |
| अभवम् | = | అయితిని |
| अभिगम्य | = | పొంది |
| अभिघातव्यः | = | వధింపబడవలెను/ వధింపబడ వలసినవాడు |
| अभूत् | = | అయ్యెను |
| अभिधेहि | = | చెప్పుము |
| अभिध्यायेः | = | మిక్కిలి ధ్యానం చేయాలి |
| अभिध्यायेत् | = | మిక్కిలి ధ్యానం చేయాలి |
| अभ्यसूये | = | అసూయపడుచున్నాను |
| अयाचत | = | యాచించెను, అడిగెను |
| अवदन् | = | చెప్పిరి |
| अवाप | = | పొందెను / చేరెను |
| अशिक्षत | = | నేర్చుకొనెను |
| अश्रुणवम् | = | వింటిని |

## आ

| | | |
|---|---|---|
| आकर्ण्यन्ते स्म | = | వినబడుచుండెడివి/ వినబడెను |
| आगम्यते | = | రాబడుచున్నది/ వచ్చుచున్నాడు |
| आचचक्षे | = | చెప్పెను |
| आचरामि | = | ఆచరిస్తాను |
| आजगाम | = | వచ్చెను |
| आज्ञापयत् | = | ఆజ్ఞాపించెను |
| आदिदेश | = | ఆదేశించెను |
| आनन्दयामास | = | ఆనందించెను |
| आप्नोति | = | పొందుచున్నాడు |
| आभाति | = | ప్రకాశించుచున్నది |
| आरप्स्यते | = | మొదలవుతుంది/ ప్రారంభించబడగలదు |
| आलोकयामास | = | చూసెను |
| आविश्चकार | = | ఆవిష్కరించెను |
| आसम् | = | ఉంటిని |
| आस्ते | = | ఉంది / ఉండెను |
| आस्म | = | ఉంటిమి |
| आसीत् | = | ఉండెను |
| आहुः | = | పలికిరి |

SCERT TELANGANA

### उ

उत्पाटयन्ति स्म = పెకిలించుచుండెడిది / పెకిలించెను.
उदाजहार = పలికెను / ఉదహరించెను
उद्घाटयतु = తెరువు / ప్రారంభించుము
उन्मूलयति = నిర్మూలిస్తున్నది / న్నాడు
उपजायते = పుట్టుచున్నది
उवाच = పల్కెను

### ऋ

ऋणद्धि = అడ్డగిస్తున్నాడు / ది

### ए

एति = పొందుచున్నాడు / ది

### क

कथ्यते = చెప్పబడుచున్నది
कबलयति स्म = కబళించుచుండెడివాడు / కబళించెను.
करिष्यति = చేయగలదు / డు
कुत्सयामि = కోప్పడతాను / నిందిస్తాను
कुर्याम = చేయుదము / చేస్తాము

### ख

खेलन्ति = ఆడుచున్నారు

### ग

गच्छ = వెళ్ళు
गच्छाव = మనిద్దరం వెళ్దాం
गत्वा = వెళ్ళి
गरुडायते = గరుడపక్షిత్వాన్ని పొందుచున్నది / డు, గరుడ పక్షివలె ఆచరించుచున్నాడు.
गर्हे = నిందించుచున్నాను.
गृहाण = పట్టుకొనుము, గ్రహించుము

### घ

घ्नन्ति = చంపుచున్నవి

### च

चकति = సంతోష పెట్టుచున్నది.
चकार = చేసెను
चक्रे = చేసెను
चन्दन्ति = ఆహ్లాదపరచుచున్నవి
चरन्ति स्म = తిరుగుచుండెడివి
चलति = వెళ్ళుచున్నది

### छ

छिन्दि = నరుకు

### ज

जग्राह = తీసుకొనెను
जग्मुः = వెళ్ళిరి
जनयते = పుట్టిస్తున్నది
जनिष्यते = పుట్టగలదు/కాగలదు
जवति = పరుగెడుచున్నది
जहि = వదిలివేయుము
जानीयात् = తెలుసుకోవలెను
जिगमिषा = వెళ్ళుటకు ఇష్టపడుట
जोतते = ప్రకాశించుచున్నది.
ज्ञात्वा = తెలిసికొని
ज्ञास्यसे = తెలుసుకొనగలవు

### त

तकति = నవ్వుచున్నది.
तनोतु = వ్యాపింపజేయుగాక !
तिष्ठतु = నిలబడుగాక/ఉండుగాక
तोषयामि = సంతోషపెడతాయి
त्यजेत् = విడిచిపెట్టాలి
त्यक्ष्यन्ति = వదిలిపెట్టగలరు.

### द

ददौ = ఇచ్చెను
दद्याम् = ఇస్తాను
दीयते = ఇవ్వబడుచున్నది
दुनोति = బాధించుచున్నది / న్నాడు
दोद्रीति = మిక్కిలి ద్రవించుచున్నది
द्रढयति = గట్టిపరుస్తున్నాడు/ది
द्योतते = ప్రకాశించుచున్నది

### न

निगृह्य = గ్రహించి
निदधाति स्म = చేస్తుండెడివాడు
निद्राति स्म = నిద్రించుచుండెడివాడు
निध्यायतः = మనోవేదనతో కూడిన / ఆలోచిస్తున్న
नियोजयेत् = నియమించాలి
निरगात् = వెళ్ళెను

| | | |
|---|---|---|
| निर्गच्छतु | = | వెళ్ళు |
| निर्गच्छन्ति | = | వెళ్ళుచున్నారు |
| निर्जगाम | = | వెడలినది / వెళ్ళెను |
| निर्ययौ | = | వెళ్ళెను |
| निवर्तन्ते | = | మరలుచున్నారు / వు |
| निवसन्ति स्म | = | నివసించుచుండెడివారు |
| निश्चक्रमुः | = | వెళ్ళిరి (నిష్క్రమించిరి) |
| निश्चिन्वन्ति | = | నిశ్చయించుచున్నారు |
| निषसाद | = | కూర్చుండెను |
| निषीदतः | = | కూర్చున్నారు.(ఇద్దరు) |
| निस्ससार | = | బయలువెడలినది |
| न्यधात् | = | ఉంచెను |
| न्यवेदयत् | = | నివేదించెను / చెప్పెను |
| न्यवेशयत् | = | కూర్చొనబెట్టెను |

**प**

| | | |
|---|---|---|
| प्रणिनाय | = | రచించెను |
| पठ्यते | = | చదవబడుచున్నది. |
| पणध्वम् | = | కొనండి |
| पर्यशोचत | = | బాధపడెను |
| पप्रच्छ | = | అడిగెను |
| परित्यजेत् | = | విడిచిపెట్టాలి / విడవాలి |
| परिषेवते | = | సేవిస్తాడు |
| परिष्वज्य | = | కౌగిలించుకొని |
| परीक्ष्यते | = | పరిశీలించబడుచున్నది |
| पर्येषि | = | అంగీకరించుచున్నావు |
| पालय | = | పాలించు |
| पुनीते | = | పావనం చేయుచున్నది/డు |
| पूषन्ति | = | అభివృద్ధినొందుచున్నవి. |
| प्रख्यापय | = | దాచుకో, బాగాచెప్పు |
| प्रतिगृह्यताम् | = | తిరిగి తీసుకొనండి |
| प्रतिभाति | = | ప్రకాశించుచున్నది |
| प्रत्यपादयत् | = | ప్రతిపాదించెను |
| प्रदीयताम् | = | ఇవ్వుము, ఇవ్వండి, ఈయబడుగాక |
| प्रदुग्धे | = | పితుకుచున్నాడు / ది |
| प्रधावये | = | నడిపిస్తాను/పరుగెత్తించెదను |
| प्रबेधयेत् | = | మేల్కొల్పాలి |
| प्रभाषन्ते | = | బాగా మాట్లాడుచున్నారు |
| प्रभवामः | = | తగుదుము, సమర్థులమగుదుము |
| प्रमार्ष्टि | = | తొలగిస్తున్నాడు / ది |
| प्रवक्ष्यति | = | ప్రవచించగలడు |
| प्रविश्य | = | ప్రవేశించి |
| प्रशंसन्ति | = | మెచ్చుకుంటారు / ప్రశంసిస్తారు |
| प्रशाधि | = | శాసించు |
| प्राकटयत् | = | ప్రకటించెను |
| प्राकटयन् | = | ప్రకటించిరి |
| प्रातिष्ठत् | = | బయలుదేరెను |
| प्रादात् | = | ఇచ్చెను |
| प्राप | = | పొందెను |
| प्रापयामि | = | పంపిస్తాను |
| प्रणेमुः | = | నమస్కరించిరి |
| प्राप्नुतः | = | ఇద్దరు పొందుచున్నారు/ రెండు పొందుచున్నవి |
| प्राप्नुयाम | = | పొందెదము |
| प्राप्नुवन्ति स्म | = | పొందుచుండెడివాడు |
| प्राप्नोषि | = | పొందుచున్నావు |
| प्रोवाच | = | పలికెను |
| प्राहिणोत् | = | పంపించెను |
| प्रतस्थे | = | బయలుదేరెను |

**ब**

| | | |
|---|---|---|
| बभ्रमुः | = | తిరిగిరి |
| ब्रूहि | = | చెప్పు |

**भ**

| | | |
|---|---|---|
| भज | = | సేవించు |
| भजन्ते | = | సేవించుచున్నారు / వి |
| भवतु | = | కానిమ్ము / ఉండు |
| भुङ्क्ते | = | తినుచున్నాడు / ది |
| भूषयते | = | అలంకరింపజేస్తుంది / డు |
| भूषयति | = | అలంకరింపజేస్తున్నాడు / ది |
| भ्रमन्ति स्म | = | తిరుగుచుండెడివి |

**म**

| | | |
|---|---|---|
| मज्जयामास | = | ముంచెను |
| मन्ये | = | తలుస్తాను |
| मा कृथाः | = | చేయకుము |
| मानय | = | గౌరవించు |
| मार्जयति | = | తుడుస్తున్నాడు |
| मुह्येत् | = | మోహించాలి |

SCERT TELANGANA

**य**

यच्छन्ति स्म = ఇచ్చుచుండెడివారు
ययौ = వెళ్ళెను
याति = వెళ్ళుచున్నాడు / ది
यापयामि = గడుపుచున్నాను, గడుపుతాను
व्यजिज्ञपत् = తెలిపెను

**र**

रचयामास = రచించెను
रुजन्ति = నాశనము చేయుచున్నది, భగ్నము చేయుచున్నది, బాధించుచున్నవి.
रोचते स्म = ఇష్టమై ఉండెడిది
रोचयसे = ఇష్టడగుచున్నావు
रोदिति स्म = ఏడ్చుచుండెడివాడు

**ल**

लभ्येत = పొందబడాలి
लभ्यन्ते = పొందబడుచున్నవి
लेभे = పొందెను

**व**

वन्दमानः = నమస్కరిస్తున్నవాడై
वर्तये = ఉంటాను
वर्धेत = అభివృద్ధి చెందాలి
वशीभवति = అధీనంలోనికి వస్తుంది
वसेत् = నివసించాలి
विकासयति = వికసింపజేస్తున్నాడు/ది
विक्रीणीते = అమ్ముతున్నాడు
वितस्तार = విస్తరించెను
विदधति = చేస్తారు
विदधाति = చేయుచున్నాడు
विदधीत = చేయాలి
विधीयते = చేయబడుచున్నది
विवेश = ప్రవేశించెను
वृणते = వరించుచున్నవి
वेत्सि = తెలుసుకొనుచున్నావు
वेष्टयामासुः = చుట్టుముట్టిరి
व्यनाशयत् = నశింపజేసెను
व्यवस्यति = ప్రయత్నిస్తున్నాడు.
व्याक्रियताम् = వివరింపబడుగాక
व्याजहार = చెప్పెను
व्रजन्ति = పొందుతున్నారు / వెళ్ళుచున్నారు

**श**

शङ्कसे = సందేహించుచున్నావు
शब्दायन्ते स्म = శబ్దం చేస్తుండెడివారు
शरणं व्रजामि = శరణుపొందెదను
शुश्रूषे = సేవిస్తున్నాను
शुश्रूषस्व = సేవచేయుము
श्रुत्वा = విని
श्रूयते स्म = వినబడుచుండెడిది
श्रन्थते = స్వేచ్ఛగా, సంతోషంతో ప్రవహించుచున్నది

**स**

सलति = ప్రవహించుచున్నది
संचरेत् = సంతాపము చెందును
सञ्चक्राम = సంక్రమించెను
संन्यलीयत = రహస్యంగా దాగెను
संप्रतस्थे = బయలుదేరెను
सस्मार = గుర్తించెను, జ్ఞప్తికి తెచ్చుకొనెను
समजनि = పుట్టెను / కలిగెను
समतुष्यत् = సంతోషించెను
समसूचयन् = సూచించిరి
सम्पत्स्यन्ते = పూర్తికాగలవు
सम्प्रयच्छामि = ఇచ్చుచున్నాను / ఇస్తాను
सुरभीकरोति = సువాసనను వెదజల్లుతున్నది/ సుగంధము కలదిగా చేయుచున్నది
सह्यन्ति = ఓర్పును పొందుచున్నారు
सूते = ప్రసవించుచున్నది / డు
सेवस्व = సేవించుము
स्कुन्दते = దొర్లుచున్నది
स्यात् = ఉండాలి
स्यन्दते = ద్రవించుచున్నది / పారుచున్నది
स्नपयामि = స్నానం చేయిస్తాను
स्व्यकुर्वन् = స్వీకరించిరి

**ह**

हन्मि = చంపుతాను
हृष्येत् = సంతోషించవలెను.

SCERT TELANGANA